श्रीमद्राघवेन्द्रतीर्थानां कृतिसंग्रहः

स्तोत्रसंपुटम्

सम्पादकः
डा० वा० रा० पञ्चमुखी

श्री रा० स्वा० पञ्चमुखी
भारतीय तत्त्वसंशोधनकेन्द्रम्, नवदेहली

स्तोत्रसंपुटम्

प्रधानसम्पादकः
डा० वा० रा० पञ्चमुखी

प्रकाशकः
श्री रा० स्वा० पञ्चमुखी
भारतीय तत्त्वसंशोधनकेन्द्रम्, नवदेहली

प्रकाशकः
श्री आर० एस० पञ्चमुखी इन्डोलोजिकल रिसर्च सेन्टर
नई दिल्ली

प्रथम संस्करण २००३

मूल्य : ३५०-००

मुद्रकः
अमर प्रिंटिंग प्रैस
८/२५, विजय नगर, दिल्ली-११०००९
दूरभाष : ७२५२३६२

VIDYARATNA SHRI R.S. PANCHAMUKHI

(Born : May 1898 --- Expired : October 4, 1982)

Vidyaratna, Mahamahimopadhyaya, Vidyabhushana Shri R.S. Panchamukhi was a well known erudite Scholar in Sanskrit, Indology, History, Epigraphy and Archaeology. Born in a village called Jalihal in Karnataka State, he had his school education in Jalihal, Bagalkot, and Dharwar and his higher education in Deccan College, Pune and Karnatak College Dharwad. He had responded to the call for Freedom Movement by boycotting the College in Pune and starting a 'National School' in Bagalkot. He got his B.A. and M.A. degrees in First class First positions and was awarded the coveted Deepak Sanskrit Prize, Gold Medal and the First Daxina Fellowship of the Karnatak College. He was the first post graduate from the family and he belonged to the first batch from the Karnatak College of great repute.

After serving as Epigraphist in the Department of Archaeology in Madras and Ootacmund, Vidyaratna Sri Panchamukhi became the first Director of the Kannada Research Institute, Dharwar, newly started by then Government of Bombay. Under his able intellectual stewardship, this Institute soon earned a place of honour on the Archaeological and Research map of India. A number of discoveries of high historical importance were made through extensive excavations and collection of rare manuscripts, inscriptions and monuments. A unique Archaeological Museum was established at the Kannada Research Institute, which soon became a place of attraction for study and discussion not only for Indian scholars but also for foreign Archaeologists and historians. After retirement from this Government Institute in 1963, he was invited by the Karnatak Historical Research Society, Dharwar, one of the oldest research centres of India, to be its President, Chairman and Chief Editor.

He was also holding the position as President of the Society since 1980. This Society, under his able guidance and consistent painstaking efforts, soon gained the status of a recognized research institute of high standards. He had been re-elected as its President.

Vidyaratna Panchamukhi is the author of more than twenty five books of great research value and a large number of research articles. His scholarly contributions include, among others, 'Haridasa Sahitya of Karnataka', 'Sanskriti Sangrama', 'Karnatakada Arsumanetanagalu' (Dynasties of Karnataka), Vedaapourusheyattva Vadah', 'History of Karnataka', 'Guru Sarvabhouma SaptaRatrotsava Champu' (in Sanskrit), etc. He has edited several rare manuscripts of literary, philosophical and historical value. A number of students completed their Ph.D. under his guidance and throughout his life he was busy in training the young and the old in Indian philosophy and culture. In 1978, he was elected as the President of All India Epigraphical Society.

Vidyaratna Sri Panchamukhi had been honoured with the award of titles such as Vidyaratna, Vidyabhushana, Mahamahimopadhyaya, Haridasa Sahityalankara, Panditaraja, etc., by many Indian Institutions and by the Scholar community throughout the country. In 1980 Vidyaratna Sri Panchamukhi was awarded the coveted Certificate of Honour in Sanskrit by the President of India. In 1981, the Government of Karnataka honoured him by awarding the State Award of Man of Scholarship and Research.

Even at the ripe age of 84, Vidyaratna Sri Panchamukhi was an embodiment of intellectual rigour, discipline and enthusiasm for all noble activities. Throughout his life, he was like a Maharshi in disciplined living, simplicity, sense of detachment and profound thinking.

INTRODUCTION

In this volume, we have compiled twelve compositions of Sri Raghavendratirtha, which could be broadly categorised as Stotras. These compositions provide a brief account of the profound philosophical tenets, which Sri Raghavendratirtha has expounded in greater detail in his major philosophical works. Sri Raghavendratirtha excels in presenting many detailed events, in a brief and succinct style and in an easy language. He can also expand brief statements into greater details, to bring out the subtle messages contained in those enigmatic brief statements.

'Prameya Navamalika', also called as 'AnuMadhwa Vijaya', is the composition of Sri Narayana Panditacharya, who has also composed the major work called 'Sri SuMadhwa Vijaya', in 16 cantos. 'Anumadhwa Vijaya is a briefer version in just 33 slokas, of the major work-viz. SuMadhwaVijaya, consisting of 1008 slokas. These 33 slokas capture the essentials of the major work. Sri Raghavendra tirtha has written the commentary, called 'GudhaBhava - Prakasika', on 'Anu Madhwa Vijaya'. This commentary was written by him before he took Sanyasa Ashrama and became known as Raghavendra tirtha. His Purvashrama name was Venkata Bhatta, (Venkatanatha). It is believed that Venkatanatha was initiated to Sanyasa Ashrama and to the Peetha of lineage of Sri Madhwacharya, because he wrote this profound commentary on 'AnuMadhwaVijaya', the major life story of his Mula Guru Sri Madhwacharya.

As the title 'Gudha Bhava Prakashika' indicates, this commentary of Venkatabhatta, reveals many hidden meanings and purports of 'Anu Madhwa Vijaya'.

The reader would greatly enjoy the linkages which Sri Raghavendra Tirtha establishes between the phrases of 'Anumadhva Vijaya' and the slokas of 'Madhva Vijaya'.

'Sri Ramacharitra Manjari' is a unique composition of just 12 slokas, presenting the entire Ramayana story and the messages that it has for mankind. It is believed that by reciting 'Rama Charitra Manjari', one would gain the merit (Punya) that one derives by reciting the entire Ramayana. Sri Raghavendra Tirtha is superb in his style of presentation, when all the details of Rama's Charitra are summed up in small small phrases. While one phrase narrates the abduction by Ravana, of the image of Sita, another phrase tells the story of return to Ayodhya in the Pushpaka Vimana. It is interesting to find that every sloka has prayer that "such" Rama may protect us and make us happy.

Sri Krishna Charitra Manjari is yet another elegant but brief composition of just 29 slokas, giving an impressive account of the story of Lord Krishna-right from childhood until his disappearance from this world. As in the case of Rama Charitra Manjari, very crypt phrases convey elaborate stories of Krishna's life. Further, each sloka has in it a prayer to Lord Krishna that he may protect us from all evils and miseries. The first 11 slokas describe the period of childhood until Kamsa is killed. Then the personality of Krishna, as an administrator and statesman is described. Qualities such as all-pervasiveness, omnipotence and omniscience are also indicated in the pretext of the narration of the different events of his life. Krishna's role in the feud between the Pandavas and Kauravas, is also described very elegantly in two slokas. The 28th sloka sums up the divine

personality of Lord Krishna in all its dimensions and ends up in describing Lord Krishna as भगवान् and सर्वसम्पत्समृद्ध ।

The entire narration of multifarious events of Krishna's life, closely follows the description given in the tenth and eleventh skandas of Sri Bhagavata Purana. By reading these 28 slokas, one feels that one has read all the slokas of these two skandas of Bhagavatam. What a great mastery of Sri Raghavendra Tirtha on the Puranas! Since the purpose of Sri Bhagavata Purana is to arouse sincere Bhakti in Bhagavan, the narration of Mahatmya of Lord Krishna, in its multiple dimensions given in Krishna Charita Manjari, is also aimed at arousing Bhakti in Lord Krishna.

Rama Charitra Manjari and Krishna Charitra Manjari are both adorned with detailed commentaries of Sri Laxmi Narayanacharya, son of Sri Raghavendra Tirtha in his Purvashrama. The latter commentary gives references to the appropriate slokas from Bhagavatam thereby showing that this Stotram derives its substance from Bhagavatam. Sri Laxmi Narayanacharya gives, in his masterly style, the details of the events indicated by the crisp phrases contained in the Krishna Charitra Manjari.

The final sloka (sloka No. 29) gives the name to the composition as Krishna Charitra Manjari and pronounces that this composition is such that it bestows upon those who recite it or listen to it, profound benevolence of Lord Krishna and hence bestows upon them all their cherished desires.

Bharata Tatparya Nirnaya Bhava Sangraha is the composition of Sri Raghavendra Tirtha, aimed at presenting in a brief manner the essential purport of the work of Sri Madhvacharya, entitled "Mahabharata Tatparya Nirnaya". The main purpose of Mahabharat Tatparya Nirnaya is to give satisfying answers to a number of

puzzling questions and doubts that arise in regard to a few events of Mahabharat. For example, Why did Bhaimasena not earn proficiency in Dhanurvidya like Arjuna? How did Bhimasena violate the Dharma of a Kshatriya, when he went out in Ekachakra Nagar during Ajntavasa, to beg for food during Bhikshatana? Why did Krishna run away when Jarasandha when his huge army attacked Krishna? Why did Dronacharya act cruelly in regard to Ekalavya? etc. Further, it provides ingenious Adhyatmic interpretations to a number of characters and events of Mahabharata Purana. For example, Dharmaraja is described to be the personification of Dharma. Bhimasena is the symbol of Bhakti, Jnana, Vairagya, Courage etc. Arjuna stands for the instruments of Sadhana, such as Shravana, Manana, Dhyana etc. Nakula and Sahadeva symbolise good conduct and modesty. Droupadi is described to be the personification of all education and learning. This unique work of Madhvacharya, also presents the essence of all Shastras and narrates in the six Adhyayas from third to ninth, the story of Rama and Hanuman. One may ask the question as to why did Madhvacharya include the story of Ramayana during the analysis of the events of Mahabharata? There are many answers to this query. Sri Madhva wanted to indicate that he is the Avatara of Vayu-Hanuman, and Bhima being the two earlier Avataras and hence he told the story of Rama and Hanuman first and then proceeded to describe the Avatara of Vedavyasa and then the story of Krishna and Bhimasena, in that sequence. We may also argue that in this Great Bharata Desa, its spiritual essences are conveyed by the great personalities like, Rama, Vedavyasa, Krishna, Hanuman, Bhima and others.

In this unique work, one sloka is devoted to one Adhyaya of Mahabharata Tatparya Nirnaya. Thus, there

are 32 slokas here corresponding to the 32 Adhyayas of the Mahabharata Tatparya Nirnaya. What a great ingenuity of Sri Raghavendra Tirtha in summarising the essentials of bigger texts in a brief manner?

The special message in all the slokas is that it is the Paramatman, who is the ultimate performer of all deeds. Sri Raghavendra Tirtha prays Lord Rama, Lord Vedavyasa, or Lord Krishna in the different slokas, clearly indicating that it is Paramatman, who "causes" events to take place.

We have again the succinct commentary by Sri Laxmi Narayanacharya which brings out as to how each sloka is the summary of the entire Adhyaya of Mahabharata Tatparya Nirnaya.

Pratah-Sankalpa Gadhyam is yet another unique composition of Sri Raghavendra Tirtha, which is in Gadya style. This gives the Statement of Vow which each person should take in the morning of everyday. This vow essentially prescribes that each person should perform his or her duties as per the mandates of the Varna and the Ashrama to which he or she belongs. This statement of Vow is structured in such a way that it fully reflects the tenets of profound philosophy and perfect understanding of Tatwajanana.

There is only one sentence through out the Gadya. Essentially, it means as follows: "I would perform my duties-as prescribed by my Varna and my Ashrama-and I would also make my relatives, friends and subordinates to perform their duties, being induced to do so by Sri Mukhya-Prana, - who is always governed by your orders, Oh, Ramachandra, Lord of Seetadevi whose feet are worshipped by the venerable Hanuman and who is the internal commander of our Mulaguru Sri Anandatirtha, who is the Avatara of Sri Mukhya Prana."

The Gadya consists of several adjectives to (i) Sri Anandatirtha, (ii) Sri Ramachandra, (iii) to Sri Mukhya Prana. There are 39 adjectives to the term श्रीमदानन्दतीर्थश्रीमच्चरणानाम् in the first set of passages. Then, there are 70 adjectives to the word श्रीरामचन्द्र in the second phase. Finally, there are 39 adjectives to the word श्रीमुख्यप्राणेन. There are several subsidiary adjectives to the main adjectives, and also subsidiary phrases which elaborate some concepts. Once this structure of the main sentence is known, then the meaning of the flow of the Gadya will be properly understood.

This work of Sri Raghavendratirtha gives one of the fundamental principles of leading a systematic life based on prescribed norms of behaviour and codes of conduct. It advocates that each person should take a Vow, everyday morning that I sincerely perform my prescribed duties and should pray that Sri Mukhya Prana may induce us to do so. This sermon on individual's commitment to perform his duties, is based on the profound principle that happiness in individual's life, and peace and harmony in the society, can be realised only when each one performs his own duties. All miseries and distresses in life are caused by the fact that individuals fail in performing their own duties but expect others to perform their respective duties. Such an environment cannot lead to happiness and tranquillity.

Sri Raghavendratirtha has supplemented this Gadya with another profound Gadya called Sarvasamarpana Gadyam. After having taken a vow that we perform our duties, and observe our Dharma, we must dedicate all our actions at the feet of the Lord as his service. At the end of the day, we must take stock of all our deeds, - good deeds and also misdeeds-and surrender all of them to the Lord. Sri Madhvacharya defines Dharma as

follows: स्वस्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमो धर्मः। तद्विरुद्धः सर्वोऽप्यधर्मः।

Dharma is nothing but performance of one's own prescribed duties as service to God. Anything else is Adharma. These two Gadyas together preach the observance of Dharma in the right manner and with the right kind of knowledge base.

Nadi Taratmya Stotram is another stotram, attributed to Sri Raghavendratirtha. This stotram is based on the evidence given in Brahmanda Purana. It is an interesting Stotram making a gradation of the various rivers of this Punyabhumi viz. Bharata Desa. The gradation of the rivers is based on the nature of the deities that pervade the different rivers. Ganga, being originated from the lotus-like feet of Lord Vishnu is the greatest of all the rivers. It has unparalled capacity to ward off the sins of all those who take bath in Ganga and take the water. Next in order are Godavari, Krishnaveni, Swamichandra, Pushkarini etc. Sri Raghavendratirtha has given a rank-ordering of select rivers in an illustrative manner and the message in this stotram is that the degrees of the purifying attributes are different for the different rivers and they depend upon the nature of the commanding deities of the rivers. This knowledge of gradation of the rivers should help us in choosing the venue of our Sadhana Marga. Why did Parikshit Maharaja choose the bank of Ganga river for his final Yajna of knowledge? Because, he wanted to have the quickest redressal of his sins since he had got only seven days left for his Sadhana Marga.

Even in our everyday life, we find that all the rivers are not of equal value in life, in terms of their abilities to provide on a regular basis, water to the fields, water for drinking, facility for navigation etc. The physical and chemical properties of the waters of the different

rivers are also different. Hence gradation, is indeed a natural attribute we should look for, in regard to all the objects and events around us.

Sri Raghavendratirtha was a great Yogin-who had profound knowledge of the theory and who was also an ardent practitioner of Yoga. Sri Bhagavadgita makes distinction of various types of Yoga, viz. ज्ञानयोग, भक्तियोग, कर्मयोग, ध्यानयोग etc. All these yogas are highly interdependent and the prescription is that one should make a beginning with one of the Yogas. Normally, it is conceived that Dhyana Yoga could be a good starting point. The sixth canto of Bhagavadgita provides the most practical tips for the practice of Dhyana Yoga. In this composition called भगवद्ध्यानप्रकरणम्, Sri Raghavendratirtha, presents a scientific integrated framework for the observance of Dhyana Yoga. It prescribes the nature of the Asana and the posture, as described in Bhagavadgita. It is commended that the meditator, should conceive the lustrous Murthi of Narayana sitting on the lotus inside the heart, as prescribed in Tantrasara, of Sri Madhvacharya. The form of Narayana should be conceived to be possessing thirty-two noble characteristics of a magnanimous personality. The meditator should meditate on this personality as an entity perfect in all attributes, full of bliss and free from all blemishes. This kind of meditation should continue until Aparoksha Jnana is realised. Sri Raghavendratirtha calls this composition as a Chapter on meditation, suggesting thereby that meditation is only one part of the Sadhana Marga.

In Tantrasara Mantroddhara, Srī Raghavendratirtha, presents forty, select Mantras from the Tantrasara Sangraha, of Sri Madhvacharya. This work contains, the mention of the Rishi, Chandas and Devata for each mantra. Except for the first Mangalasloka, there is no other independent composition of Sri Raghavendra tirtha.

The purpose of this brief work is to make explicit presentation of the select Mantras taken from the bigger work, called "Tantra Sara Sangraha" of Srī Madhvacharya. This latter work contains, not only a large inventory of the Mantras but also authentic narration on other themes such as contruction of a temple, characteristics of GarbhaGriha, details of the Puja-Krama, etc, Sri Raghavendratirtha, therefore found it necessary to present at one place, some select Mantras only, from TantraSara-Sangraha, with a view that such selective adoption of the Mantras would be useful in the observance of the Nityakarmas by the Sadhakas.

Mantra is an instrument of Sadhana, combining in it, the theme for meditation and the power for protection from the Ocean of Sansara.

Mantras provide powerful instrumentality for achieving even the apparently impossible tasks. It is said that Bhagavan tought to Chatumukha Brahman, several Mantras with a view to bestowing upon him the capabilities to accomplish the task of creation of the Universe. He composed "Tantrasara", as a compendium of Mantras and also as source of Knowledge on some related subjects like temple construction, characteristics of idols of Gods etc., Srī Madhvacharya has composed Tantrasara Sangraha, as an abidged version of Tantrasara. Sri Raghavendratirtha has given only a complilation of some Mantras selected from Tantrasara Sangraha.

This compcsition called Tantrasara Mantroddhara, does not display the same characteristics of depth and wise reflections, as are found in the other works of Sri Raghavenratirtha. For this reason, some scholars raise doubts about the authorship attributed to Sri Raghavendratirtha. We have included this work in this Volume, without prejudging the issue.

"Prameya Sangraha" is a unique composition of Sri Raghavenratirtha, presenting many tenets of philosophy and fundamental knowledge. It covers topics such as, Avataras of the Lord, in particular, those of Vasudeva, Pradyumna, Sankarshana and Anirudha, the process of creation, creation of the three Gunas, the measure of Time, Gradations, and the expanse of the earth etc. It presents the essentials of Vedas, Upanishasds, and Puranas, in particular, Bhagavata Purana. The style of presentation is very communicative in the form of raising doubts and providing clarifications. For example, at one place, it is argued that there are seven coverings around this earth, viz water, fire, wind, sky, Ahankaratatwa, Mahattatwa and the group of the three Gunas. However, in Bhagavatam, it is narrated that mother Yashoda saw nine coverings around the earth, in the mouth of her child--Lord Krishna. The explanation is given that Yashoda could see the earth, as distinct manifestation of the three Gunas viz Satva, Rajas and Tamas. In this way, on many issues, doubts are presented and suitable clarifications are provided so that the final knowlege is authentic and certain.

"Daśavatara Stotram" is the stotram in praise of the ten Avataras of Vishnu, which Sri Raghavenra tirtha is supposed to be reciting during his puja of Samsthana Pratimas, when he was actually having the Darshan of the different Avataras of Lord Vishnu. This stotram is included in the canto of Srī Ṛaghavendra Vijaya, composed by Sri Laxminarayanacharya, the Purvashrama son of Sri Raghavendra tirtha. While reading Sri Raghavendra Vijaya, one gets the feeling that these slokas might well be the composition of the author of Raghavendra Vijaya and not the actual utterances of Sri Raghavendra tirtha. Since the slokas contain the prayer of Sri Raghavendra tirtha,in the first person,- such as, I

surrender, I perceive etc. and also since they contain some expressions of 'conversation" with the Lord, one would believe that these were the compositions of Sri Raghavendratirtha, bodily lifted for incorporation in Raghavendra Vijaya, by its author. There are one or two slokas for each of the eight Avataras, and the Avataras of Budha and Kalki are subsumed in the last sloka mentioning that there are varieties of Avataras of Lord Vishnu.

It is believed that Recitation of these slokas in praise of the Avataras of Vishnu, as perceived by Sri Raghavendra tirtha brings immense virtue and hence happiness to those who recite them.

The last composition included in this volume is in Kannada. Bhakti Geeta, composed by Sri Raghavendratirtha, when he had Pratyaksha Darshana of Krishna. This Kannada song --perhaps the only Kannada compostion of Sri Raghavendra tirtha, brings to him the credit of having contributed to both Vyasa Sahitya and Dasa Sahitya. This Bhakti Geetha invokes Karuna rasa and displays the emotion of complete surrender and dedication, which Sri Raghavendra tirtha possesses in abundant measure. This song reflects the feelings of a common man who is caught up in the whirlpool of this Samsara. It preaches that at some phase in one's life, man should realise his mistakes, repent for them and make a plea to Lod Krishna for emancipation from this Samsara since no one else is capable of awarding this redemption from the cycle of births and deaths. Dhira VenuGopala is the Ankita nama of Sri Raghavendratirtha.

It is quite posible that Sri Raghavendratitha might have composed a few other songs which are not available with us now.

Towards the end of the volume, we have given the आद्यन्तश्लोक's of all the works of Sri Raghavanra tirtha.

There are in all 42 works identified and these belong to Sutra Prasthana, Upanishad Prasthana, Geeta Prasthana, Purana Prasthana, Sarwa Mula Granthas of Srī Madhvacharya and Stotrams. It is believed that Sri Raghavendra tirtha had written commentaries on the three Veas, - known as Vedatraya Vivruttis. Unfortunately, these are not presently available. We hope that some day will come when these will be retrieved from the hidden archives of our Masuscripts.

9-10-2002
नवरात्रोत्सवः

V.R. Panchamukhi
P.R. Panchamukhi
A.R. Panchamukhi

विषय सूची

१. प्रमेयनवमालिकाव्याख्या	१-२९
२. रामचारित्रयमञ्जरी	३०-४०
३. कृष्णचारित्र्यमञ्जरी	४१-७४
४. भारततात्पर्यनिर्णयभावसङ्ग्रहः	७५-८६
५. प्रातः सङ्कल्पगद्यम्	८७-९०
६. सर्वसमर्पणगद्यम्	९१
७. नदीतारतम्यस्तोत्रम्	९२
८. भगवद्ध्यानप्रकरणम्	९३-९५
९. तन्त्रसारमन्त्रोद्धारः	९६-१०४
१०. प्रमेयसङ्ग्रहः	१०५-१२३
११. दशावतारस्तोत्रम्!	१२४-१२५
१२. इन्दु एनगे गोविन्द	१२६
श्री राघवेन्द्रतीर्थकृतकृतिरत्नानां आद्यन्तश्लोकाः	१२७-१३४

गूढभावप्रकाशिका

प्रमेयनवमालिकाव्याख्या

।। श्रीमदणुमध्वविजयव्याख्या ।।

श्रीशप्रीत्यै प्रजातः सुमहितमहिमा श्रीहनूमान्निदेशा-
द्रामस्योल्लङ्घिताब्धिः सहरिरथगतः सेतुना पिष्टदुष्टः।
भूभृन्नी रावणारिं पुरगमुरुदयं पूजयित्वा ससीतं
पश्यन्किंपूरुषे तं सततमपि महान्प्राणमुख्योऽवतान्माम्।।

।।श्रीगुरुभ्यो नमः।।

ॐ इन्दिरापतिमानम्य पूर्णबोधान्गुरूनपि।। व्याख्यास्यामि यथाबोधं प्रमेयनवमालिकाम्।। १।। इहान्वयमुखेनैव श्लोकार्थोऽपि निरूप्यते।। गूढभावप्रकाशश्च क्रियते प्रीतये हरेः।। २।। इह खलु संसारकान्तारे सञ्चारोदर्कदुःखानलसन्तप्तनिजजनकुमुदवृन्दान्यनुजिघृक्षुर्नारायणपण्डिताचार्यः निखिलसन्तापशामकभगवप्रसादोन्मीलकतद्भक्तिनिदानाखिलगुरुवायुभक्तिजनकतदवतारलीलानुसंधानायतल्लीलाः सञ्जिघृक्षुरादौ हनुमदवतारलीलां सङ्गृह्णाति।।

श्रीशेति। श्रीशस्य **प्रीत्यै** प्रीतये। **ङिति ह्रस्वस्य वा नदीत्त्वं**। प्रजातः केसरिणः सकाशादञ्जनायामवतीर्णः। **जनेरकर्मकत्त्वाद्गत्यर्थाकर्मके**त्यादिना कर्तरि क्तः। सुमहितमहिमा देवैः सुपूजितमाहात्म्यः **श्रीहनूमान्**। अनेन जननानन्तरमेवोद्यदादित्यं ग्रसितुमभ्युत्पतंन्नादित्यसमीपस्थं तत्कान्त्या रक्तं राहुं दृष्ट्वाऽऽदित्यं त्यक्त्वा राहुमेवाभिससार। राहुश्चेन्द्रं शरणं प्राप, इन्द्रश्च तस्मै शिशवे वज्रं मुमोच। तेन भङ्गमापेत्यादिचरितं सूचितं भवति। **रामस्य निदेशात्**। सीतामन्वेषमाणाय याहीत्यनुशासनादु**ल्लङ्घिताब्धिः** उत्तीर्णवारिधिः। उल्लङ्घिताब्धिरितिसामान्योक्त्या द्विरुल्लङ्घनस्याप्युक्तत्वेन लङ्कायां प्रति गन्तुमब्धिं तीर्त्वा लङ्कायां सर्वत्र सीतामन्विष्याशोके तां दृष्ट्वा रामाङ्गुलीयं तस्यै दत्त्वा

ततः चूडामणिमादायाशोकवनमुन्मूल्य रावणस्य तृतीयभागबलं हत्वा लङ्कां दग्ध्वा पुनरब्धिं तीर्णवानित्येतावदुक्तं भवति। **अथ** रामं दृष्ट्वा सकलवृत्तान्तविज्ञापनानन्तरम्। सहरिः। रामेण सहितः, हरिभिः कपिभिः सहित इति वा। **सेतुना**। समुद्रसेतुबन्धेन लङ्कां प्राप्तः **गत्यर्थत्वात्कर्तरि क्तः**। **पिष्टदुष्टः**। पिष्टः मुष्टिना चूर्णीकृतो दुष्टो रावणो येन सः। **भूभृतं** गन्धमादनपर्वतं नयति प्रापयति कपीनुज्जीवयितुमिति भूभृन्नीः। **सत्सूद्विषेत्यादिना क्विप्**। संहितायां रोरीति रेफस्य लोपात् **लोप** इति दीर्घश्च। **रावणारिं** रावणं हतवन्तम्। ततः पुरमयोध्यां गच्छतीति पुरगः। **अन्येभ्योऽपि दृश्यत इति गमेर्डः**। रावणं हत्वा स्वपुरं गत्वा पट्टाभिषिक्तं इत्यर्थः। **उरुदयं**। उर्वी दया यस्येति तथोक्तः तं। स्वस्मिन्नधिकदयां कुर्वाणम् इत्यर्थः। **स्त्रियाः पुंवदित्युरुशब्दे** पुंवद्भावः। गोस्त्रियोरिति दयाशब्दे ह्रस्वः। **ससीतं** सीतासमेतं रामं **पूजयित्वा** सर्वैः करणैः संपूज्य। **किंपूरुषे**। किंपुरुषखण्डे तं रामं सततं पश्यन्नपरोक्षीकुर्वन्। **महान् प्राणमुख्यः** प्राणेषु जीवेषु यद्वा इन्द्रियाभिमानिषु श्रेष्ठः। स मामवताद्रक्षतु। **अव रक्षणे आशिषि लोट्। तुह्योस्तातङित्ति वा तातङ्**।। १।।

(२)

भीमोऽभूद्यो न भेद्यश्चकितरिपुकृतापत्प्रणोदी सलीलं
रक्षोघ्नः प्राप्तकृष्णो मखकृदुत वने दुष्टहा कीचकघ्नः।
हत्वा दुर्योधनादीन् स्वपदमधिगतो यद्विषः क्रोधतन्त्रा
भूत्वा भूमौ कुशास्त्रं व्यधिषत मणिमत्पूर्वकाः पातु सोऽस्मान्।। २।।

द्वितीयावतारलीलां संगृह्णाति। **भीम इति**। यो भीमः भीमनामा सन् वायुरंशात्कुन्त्यामभूत्। यो भीमः अनभेद्यः अविदार्यः। अनेन जननीकराग्राच्छतशृङ्गगिरौ पतितः सन् शतशृङ्गगिरिं स्वदेहसंङ्गाच्छतधा शीर्णवानिति। वज्रात्कठिणतरशरीर इति भावः। **चकितरिपुकृतापत्प्रणोदी**। बाल्ये भीमबलं वीक्ष्य चकिताः भीताः ये रिपवो दुर्योधनादयस्तैः कृताः या आपदः विषभोजनविषभृद्दंशनगांग्यजलपातनादिकाः ताः प्रणुदति तिरस्करोतीति स तथोक्तः। **सलीलं** लीलया सहितं यथा भवति तथा। रक्षोघ्नः रक्षः बकासुरं हन्तीति स तथोक्तः। **प्राप्तकृष्णः**। कृष्णं वेदव्यासं कृष्णां द्रौपदीं वा प्राप्तः प्राप्तकृष्णः। प्राप्तापन्ने च द्वितीययेति समासः (२-२-४)। **मखकृत्** राजसूययज्ञकृत्। दुर्योधनादितोऽर्धराज्यं लब्ध्वा जरासन्धं हत्वा राजसूयं कृतवानिति भावः। उत अनन्तरं **वने** वनवासकाले **दुष्टहा** दुष्टान् मणिमदादिदैत्यान् हंतीति स तथोक्त। **कीच-**

कघ्नः वनवासानन्तरमज्ञातवासे षडुत्तरशतकीचकान् दुर्योधनादींश्च हत्वा **स्वपदं** स्वलोकमधिगतः प्राप्तः। यद्विषः भीमं द्विषन्तीति यद्विषः मणिमत्पूर्वकाः मणिमदाख्यदैत्यपूर्वकाः **क्रोधतन्त्राः** कोपपरवशाः सन्तः **भूमौ भूत्वा** सङ्करादिनामत्वेनोत्पद्य कुशास्त्रं दुःशास्त्रं व्यधिषताकार्षुः। **डुधाञ् धारणपोषणयो**र्लुङात्मनेपदेष्वनतत्यदादेशः। **स** भीमः **अस्मान् पातु** रक्षतु पा रक्षणे लोट्।।

(३)

अज्ञानोत्सादनार्थं सुरवरवचसा सूचितो रूप्यभर्त्रा
जातो मध्यालयार्याद्गुरुमतितपसो वासुदेवाभिधानः।
गोदात्रे मोक्षदाता रजतपतिपदासेवको भूतभर्त्रा
मान्यः प्राणः कुलित्थैरपि निजसहजातर्पितः प्रीयतां मे।। ३।।

तृतीयावतारलीलां सविस्तरं विवक्षन्नादौ तावदवतारप्रकारं वदन् बाललीलाश्च ब्रूते। **अज्ञानेति।** रूप्यभर्त्रा रूप्यस्य भर्तेति **याजकादित्वेन** समासोपपत्तिः। एवमुत्तरत्रापि। रूप्याख्यग्रामाधिष्ठात्रा विष्णुना सूचितः ज्ञापितः। यदा सङ्करकृतदुःशास्त्रेण छिन्नतात्वज्ञानाः रूप्यभर्तृविष्णोरुत्सवं द्रष्टुं मिलितास्तदा रूप्यभर्त्रा तत्त्वज्ञानोपदेशकर्तारमपेक्षमाणान् दीनान् दृष्ट्वा कञ्चनाकुशलं पुरुषमाविश्य स्वध्वजस्याग्रमुत्पत्य बाहुमुद्धृत्य जनानाभाष्य भवतामुपदेष्टा विश्वज्ञः कश्चन पुमान् शीघ्रम् उत्पत्स्यते इति वाचा ज्ञापित इति भावः। रूप्यपुरस्य शिववल्ली(शिवल्ली)उडुपि इत्यपभ्रष्टनाम। सुरवरवचसा सुरवरो हरिस्तद्वचनेन। तत्त्वज्ञानहीनान् सज्जनानवलोक्य दयया ब्रह्मादिभिः प्रार्थितस्य हरेः **'हे वायो त्वं रूपान्तरेणावतीर्य मम सद्गुणान्प्रकाशयेत्यादि'** वचसेत्यर्थः। किञ्च **सुरवरो** देवेन्द्रः तद्वचसा **'स्वामिन् भूमाववतीर्य सर्वानुद्धरेति'** याञ्चारूपवचसेत्यर्थः। **अज्ञानोत्सादनार्थम्** अज्ञानस्य ज्ञानविरुद्धस्य मिथ्याज्ञानस्य चोत्सादनार्थं नाशार्थं **गुरुमतितपसः** गुरुणी उत्कृष्टे मतितपसी यस्य सः तस्मात्। अनेककुतर्कैरप्यचञ्चलज्ञानस्तथा सत्पुत्रकामनया तीव्रतपा इत्यर्थः। **मध्यालयार्यान्म**ध्यगेहभट्टाख्यद्विजात्। जनिकर्तुः प्रकृतिरिति पञ्चमी। **वासुदेवाभिधानः** वासुदेवनामा सन्। **जातः** अवतीर्णः। **कर्तरि क्तः। गोदात्रे।** स्वस्य शिशुत्वदशायां पयःपानाय गां दत्तवते पूर्वालयविप्राय। दातृशब्दस्य तृजंतत्वे शेषषष्ठीत्वेन गोदातेति षष्ठीतत्पुरुषः। तृन्नन्तत्वेन वा गा दातेति गम्यादित्वेन द्वितीयासमासो वा बोद्धव्यः। एवमुत्तरत्रापि। **मोक्षदाता** तं देहं त्यक्त्वा स्वसुतपुत्रत्वेन जाताय तस्मै तत्वज्ञानोपदेशेन मोक्षदातेत्यर्थः।

रजतपतिपदासेवकः। रजतपतेः रूप्यपीठभर्तुः पदयोरासेवकः। यदा **मध्यगेहभट्टः** शिशुभूतमात्मानमादाय पाजकक्षेत्रात् रूप्यपुरमागत्यैनमुपायनत्वेन भगवते आर्पयत्त-दायं मनसा तत्पदं सेवितवानिति भावः। **भूतभर्त्रा** भूतानां ग्रहाणां भर्त्रा स्वामिना महाग्रहेण ब्रह्मराक्षसेनेति यावत्। **मान्यः** पूज्यः। रूप्यपतिं संसेव्य वासुदेवनामानं शिशुमादाय निशीथे परिवारेण सह मध्यगेहभट्टस्य स्वगृहं प्रतिगमनसमये कश्चन ग्रहः मार्गमध्ये सहगन्तारं कञ्चन संपीड्यान्यामाविश्य भो जनाः, अयं शिशुः समर्थः यद्र-क्षिता भवन्तो मया न हताः इत्यादि बहुधा शिशुं स्तुतवानित्यर्थः। **कुलित्थैः निजस-हजातर्पितः** निजसहजया भगिन्या तर्पितः भोजितः। यदा माता कदाचित्पुत्रं स्तन्येन सन्तर्प्य कन्याहस्ते दत्त्वा स्वयं गृहान्तरं ययौ। तदातीवक्रदन्त बालं दृष्ट्वा कन्या पक्वं कुलित्थं बहु भोजयामास। तथापि न तस्य कश्चन रोगोऽभवदिति भावः। स मे **प्रीयतां** प्रीणातु। **प्रीङ् प्रीणने** कर्तरि लडात्मनेपदी।। ३।।

(४)

आनन्दं मन्दहासामृतरसकलया सन्दधानः प्रजाना-
मास्येन्दोः शोभमानैरपि कलवचनैर्बाललीलाविलासैः।
गोपुच्छालम्बनाद्यैर्वृषपतिविहितापत्प्रणोदी प्रणुद्या-
दज्ञानाद्यापदं मे स्वयमिह भगवान्वासुदेवोऽसुदेवः।। ४।।

आनन्दमिति। आस्येन्दोर्मुखचन्द्रस्य **मंदहासामृतरसकलया** मन्दस्मिताख्यामृत सकलया। **प्रजानां** साधूना**मानन्दं संदधानः** कुर्वाणः। कुलित्थभक्षणेन स्वस्यापायशक-योद्विग्नानां पित्रादीनां मुखेन्दुदर्शनेन सन्तोषं कुर्वाण इति भावः। शोभमानैः शोभायुक्तैः **कलवचनैः** अव्यक्तमधुराक्षरोपेतभाषणैः। **गोपुच्छालन्बनाद्यैः** गोर्वृषभस्य पुच्छं तदालम्बनम् आद्यं येषां तैः **बाललीलाविलासैः** जानुचंक्रमण-गमनादिबालक्रीडाविनोदैरपि। **आनन्दं सन्दधानः**। एकाहः प्रातरुत्थाय स्वकीयवृषब्दकः लाङ्गूलं गृहीत्वा वनं गत्वा तत्र तत्र प्रविचार्य सायं गृहमागतवानिति भावः। **वृषपतिविहितापत्प्रणोदी**। वृषपतिना वृषविक्रेत्रा विहितां कृताम् अभोजनादिरूपामापदं प्रणुदतीति स तथोक्तः। **ताच्छी-लिको णिनिः**। कश्चन मध्यगेहाय वृषभं विक्रीय मौल्यादानायान्नभोजनं प्रतिरुरोध स कानिचिद्बीजानि मौल्यस्थाने दत्त्वा मोचितवानिति भावः। **भगवान्** पूज्यः स्वयं मुख्य-तयाऽसुदेवः प्राणदेवः। वासुदेवनामा मे **इह अज्ञानाद्यापदम्** अज्ञानदुःखादिविपदम्। **प्रणुद्याद**पनुद्यान्नुदप्रेरणेति(आशीर्लिङ्)लिङ्।। ४।।

(५)

एकाकी योजनाभ्यां व्यवहितमगमद्यस्त्रिवर्षोऽमरौको
यो लाल्यो लोकमात्रा स्वलिपिपरिचये तातविस्मेरताकृत्।
प्राज्ञं मन्यं शिवाख्यं परिषदि जितवान् शाखिनामर्थमूचे
दुर्गं पित्रोपनीतः सुरवरमहितो मह्यतां मे वचोभिः।।

एकाकीति। त्रिवर्षः त्रिवर्षवयस्कः यः वासुदेवनामा। **एकाकी** असहायः सन् **योजनाभ्यां** योजनद्वयेन व्यवहितम्। **अमरौकः** अमरस्य देवस्य विष्णोः ओकः आलयम्। धिष्ण्यमोकोनिवसनमित्यमरः। स्ववासभूमेः पाजकक्षेत्राद्योजनद्वयव्यवहितदेवालयं गृहे उत्सवासक्ताभ्यां मातापितृभ्यामविज्ञातः एकाकित्वेन गृहान्निर्गत्य। स्वामिसेव नायेतिभावः। अगमद्गतवान्। गम्लृ गतौ लुङ्। कथमेकाकिनः शिशोः कान्तारे सञ्चार इत्यत आह। य इति। यः वासुदेवनामा **लोकमात्रा** दुर्गया पाजकक्षेत्रगतविमानगिरौ परशुरामेण प्रतिष्ठापितया दुर्गया। लाल्यः रक्ष्यः। स्वलिपिपरिचये स्वस्य लिपीनां मातृकाक्षराणां परिचये अभ्यासविषये। **तातविस्मेरताकृत्।** तातस्य स्वपितुः विस्मेरतां आश्चर्यवत्तां करोतीति तथोक्तः। विपूर्वस्य स्मयतेः **नमिमेकंपिस्म्यजसकमहिंसदीपोर** इति रः (३-२-१६७)। स्वतातेन स्वस्य लिपीः परिचाययितुं पूर्वेद्युरुल्लिखिता एव पुनः परेद्युरुल्लिखिता वीक्ष्य किमर्थं परिचिता एव पुनर्लिखसीति स्वबुद्धिं किञ्चित्प्रकाश्य विस्मयं प्रापितवानिति भावः। **प्राज्ञंमन्यं** आत्मानं प्राज्ञं मन्यत इति प्राज्ञंमन्यः। अहमेव प्राज्ञ इति मन्यमानस्तम्। **आत्ममाने खश्चेति** खशिखित्यनव्ययस्येति पूर्वस्य मुमागमः। शिवाख्यं शिवभट्टं **परिषदि** सभायां **जितवान्** जिग्ये। यदा स्वमाता स्वेन सह घृतवल्याख्यं ग्रामं जगाम तदा तत्र ग्रामे अनेकपण्डितमण्डलमध्ये पुराणं वाचयन् शिवभट्ट आसीत्। तदा तमन्यथार्थं वर्णयसीत्याक्षिप्य वास्तवार्थमुक्त्वा जितवानितिभावः। **दुर्गं** दुःखेन ज्ञातव्यं कठिणमिति यावत्। **सुदुरोरुपसंख्यानमिति गमेर्डः। शाखिनां** वृक्षविशेषवाचकशब्दानां दुर्गं दुःखेन ज्ञातव्यं कठिणमिति यावत् लिकुचेत्यस्यार्थं वाच्यार्थमूचे। ब्रूञ् व्यक्तायां वाचि, लिट् ब्रुवो वचिरिति वचिरादेशः। तेनात्मनेपदं साधूक्तम्। कदाचित्स्वपित्रा पुराणकथने वृक्षविशेषवाचकानां लिकुचादिपदा(र्था)नामर्थमविदुषा तान् शब्दान् त्यक्त्वोपरितनपदानामर्थे वर्ण्यमाने सति तदा स्वयं तेषां पदानामर्थमूच इति भावः। **पित्रा** स्वतातेनोपनीतः कृतोपनयनः। **सुरवरमहितः**। सुरवरैर्देवोत्तमैः महितः पूजितः। उपनयनोत्सवे देवाः सस्त्रीकाः

सन्तः नभस्थलम् अलङ्कृत्य दृष्ट्वा पूजितवंत इत्यर्थः। मे वचोभिः स्तुतिवचनैः मह्यतां पूज्यतां मे स्तुतिविषयो भवेदित्यर्थः। मह पूजायां कर्मणि लोट्।। ५।।

(६)

पायान्मां यो भुजङ्गं सदरिमदमयद्द्रागुपाध्यायसेवी
विश्वेभ्योऽवेगदूरप्लवनजवनियुद्धादिवीर्यातिशायी।
येनास्ता मूढशङ्का श्रुतिशुचिवचसाऽलंगुरोः शीर्षशूला
सख्युर्नारायणज्ञोऽथ य उपनिषदं व्याख्यतास्मै सुरार्थ्यः।। ६।।

पायादिति। यः सदरिं सतामरिं शत्रुभूतम् असुरस्वरूपमिति यावत्। **भुजङ्गं** सर्परूपं। **द्राक्** सपदि। **द्राङ्मंक्षु सपदि द्रुतमित्यमरः। अदमयद्** दमयामास। दमु दमने लङ् मित्वादुपधाह्रस्वः। पाजकक्षेत्रगतविमानगिरौ संचरन् सर्पमयोऽसुरः कदाचिद्गिरि-समीपे स्वगृहांगणे स्थितं वटुमालोक्य गिरेरवरुह्यातितीव्रविषोल्बणं स्वमस्तकमुद्यम्यो-पददंश तदा सोंऽगुष्ठेन तच्छिरश्चूर्णयामासेति भावः। **उपाध्यायसेवी** उपाध्यायः स्वस्य वेदाध्यापकस्तं सेवत इति स तथोक्तः। वेदाध्ययनार्थं गुरुसेवीत्यर्थः। **विश्वेभ्यः** सर्वे-भ्यः सवयस्केभ्यः। **अवेगदूरप्लवनजवनियुद्धादिवीर्यातिशायी।** अवेगेन दूरधावनेन विनैव दूरप्लवनम्। जवो वेगः। **नियुद्धं द्वन्द्वयुद्धं** एतान्येवादीनि येषां जलविहारगुरुत-रशिलोद्धरणादीनां तेषु यद्वीर्यं सामर्थ्यं तदतिशेतुं शीलमस्यास्तीति स तथोक्तः। ताच्छीलिको णिनिः। प्रत्यहमध्ययनावसाने सखिभिः समं यथेष्टं विहृत्य तान् सर्वान-त्येतीतिभावः। **येन** वासुदेवनाम्ना वटुना गुरोरध्यापकस्य। **मूढशङ्का** मूढ इति सन्देहः। श्रुतिशुचिवचसा श्रुतेः अधीतवेदस्य शुचिवचसा शोभनवचसा। **अलं** सम्यक् अस्ता निरस्ता। क्रुद्धेनाध्यापकेन व्याख्यातमपठसि सदा विहरसीत्युक्ते सति तदा अधीतं सर्वं तत्पुरतः प्रोच्य स्वस्याज्ञानित्वशङ्कां गुरोर्विद्यमानां निरास्तेतिभावः (निरास्थदिति भावः)। **सख्युः** स्ववयस्यस्य शीर्षशूलां शिरोवेदनां च अलमस्तेत्यन्व-यः। जन्मारभ्यानुवर्तमानां केनापि निवर्तयितुमतिदुःसहां स्वगुरुपुत्रशीर्षशूलां स्वमुख-वायुना तच्छ्रोत्रे फूत्कृत्य व्युदासेतिभावः। अथ साङ्गवेदाध्ययनानन्तरम्। **यः सुरार्थ्यः।** अयि स्वामिन् गुरुकुलवासविडंम्बेनालं दुर्जनविजयार्थं प्रवर्तस्व। विष्णोर्गुणान्प्रकाश-येत्यादिरूपेण देवैर्याच्यमानः। **नारायणज्ञः** परतत्वज्ञोऽस्मै अध्यापकाय **उपनिषदम्** ऐतरेयोपनिषदं व्याख्यत व्याचख्यौ। **चक्षिङ् व्यक्तायां वाचि। चक्षिङः ख्यालुङ्**

ख्यादेशः अस्यतिवक्तिख्यातिभ्योऽङ् इति अङादेशः। गुरुदक्षिणतया एकान्ते ऐतरेयोपनिषदः पाठव्याजेनात्मपरतया गुरवे तदर्थम् उपदिष्टवानिति भावः। स वासुदेवनामा मां पायात् रक्षतु। **पा रक्षणे आशिषि लिङ्**।। ६।।

(७)

संन्यासे बद्धबुद्धिः कृतहरिनमनः पार्थपूज्यं यतिं प्राक्
प्राज्ञं गुर्वाज्ञयाऽलं सगुणहरिविदं सत्तपस्तृप्तदेवात्।
प्राप्तं सर्वज्ञशिष्याख्यवरमुपगतो द्विःस्वतातं निषेध्दुं
प्राप्तं चानुत्तरं यो व्यधित सहजवान्मातरं चावतान्माम्।।

संन्यास इति। **यः** वासुदेवनामा बटुः। **संन्यासे** तुरीयाश्रमे **बद्धबुद्धिः** दृढनिश्चयः। **कृतहरिनमनः** अनुज्ञार्थं कृतं हरेर्नमनं येन सः। **प्राक्** पूर्वजन्मान्तरे। **पार्थपूज्यं** पार्थैः **पाण्डवैः** पूज्यं पूर्वजन्मान्तरे (पूर्वजन्मनि) पाण्डवालये द्रौपदीकरार्पितभोजनेन शुद्धान्तःकरणमिति भावः। **प्राज्ञं** सर्वशास्त्राभिज्ञम्। **गुर्वाज्ञया** स्वगुरोरनुज्ञया। **अलं** निःसन्देहं। **सगुणहरिविदं** सगुणं गुणोपेतं हरिं वेत्तीति स तथा। अयं भावः। निर्गुणोपासकस्य मम गुरोश्च न किंचिदपरोक्षमासीदतस्त्वं निर्गुणोपास्तिमविश्वस्य सगुणं ब्रह्मोपास्वेति गुर्वाज्ञया सगुणमेव ब्रह्मो(ह्मेत्यु)पासकमिति। सञ्च तत्तपश्च तथोक्तं तेन तृप्तं, तञ्च तद्दैवं च तस्मा**त्सत्तपस्तृप्तदैवात्**। प्राचीनसमीचीनतपसा सन्तुष्टात्परमात्मनः सकाशात् **सर्वज्ञशिष्याख्यवरं**। सर्वज्ञश्चासौ शिष्यश्च स इत्याख्या यस्य तं वरं प्राप्तं प्राप्तवन्तम्। तत्त्वबुभुत्सुः सन् तपसा रूप्यपीठस्थं विभुं सन्तोष्य कश्चन तव शिष्यो भविष्यति तेन तत्त्वं विद्धीति भगवता वरं लब्धवन्तमितिभावः। यतिमच्युतप्रेक्षनामान**मुपगतः** प्राप्तः। **सहजवान**नुजवान्। निषेध्दुं पुत्रसन्यासं प्रतिरोध्दुं **द्विर्द्विवारं**। द्वित्रिचतुर्भ्यः सुजितिसुच्। प्राप्तमागतं। **स्वतातं** मध्यगेहभट्टं अनु तदनंतरं। निरुत्तरं च। मातरञ्च निरुत्तरामिति सम्बन्धः। **व्यधिता**कार्षीत्। डुधाञ् धारणे लुङ्। अयं भावः। पूर्वमागत्य पुत्रं नत्वा। सयाचनं निरुन्धानं तातं दृष्ट्वोत्तमेनाधमो न नम्यः। नतं च मह्यं भवता अतो ज्ञायते विधात्रा स्वयमेव मम सन्यासानुज्ञा दापितेति वदन्निरुत्तरं कृत्वा प्रेषितवान्, पुनः पुत्रं स्मृत्वा क्षुभितमनाः सन् पुनरागत्य पुत्र, वृद्धौ मातापितरौ, मृतानेकपुत्रकावनाथावावां हित्वा तव परिव्रजनं न धर्म इत्यादि वदन्तं पितरं प्रति 'युवयोर्मदनुजः पालको भविष्यति। किञ्च ज्ञानिनस्तव शुभप्रतिघातो नोचित' इत्यादि वदन्निरुत्तरं चकारेति। **यः सः माम् अवतात्**। अव रक्षणे आशिषि लोट्।। ७।।

(८)

पूर्णप्रज्ञाख्य आसीद्यतिकुलतिलको यः शुभाचार ईश-
प्रत्तोऽस्मा ईश्वराज्ञागतसुरसरिति स्नानकृज्जैत्रपत्रः।
दुष्पद्यच्छिञ्च लोके प्रवचनचतुरः सत्पुराणेतिहास-
स्योक्तौ मेधाप्रदर्शी दिशतु शुभदृशं मह्यमृज्वग्रणीः सः

यः पूर्णप्रज्ञाख्यः पूर्णप्रज्ञनामा सन्। **यतिकुलतिलकः** यतिकुलश्रेष्ठः। **शुभाचारः** आश्रमोचितानेकधर्मशीलः। आसीदभवत् **अस भुवि लङ्**। अच्युतप्रेक्षादाश्रमं स्वीकृत्य पूर्णप्रज्ञ इति नाम ततो लेभे इति भावः। **अस्मै** अच्युतप्रेक्षाय **ईशप्रत्तः** ईशेन रूप्यपीठभर्त्रा विष्णुना दत्तः। आश्रमानन्तरं स्वगुरुणा अच्युतप्रेक्षेण सह रूप्यपीठं गत्वा तत्रत्यस्वामिनं प्रणनाम। तदेशः कञ्चन पुरुषमाविश्य पूर्णप्रज्ञहस्तं गृहीत्वा अच्युतप्रेक्षहस्ते तत्त्वबुभुत्सया चिरेण त्वया तपश्चीर्णं तत्फलमिदं तुभ्यं ददामीत्युक्त्वा दत्तवानिति भावः। **ईश्वराज्ञागतसुरसरिति** ईश्वरस्य रूप्यपीठभर्तुर्विष्णोः आज्ञया। आगच्छतीत्यनुशासनादागतायाम्। सुरसरिति गङ्गायां **स्नानकृत्स्नानं** कुर्वाणः। यदा पूर्णबोधः गङ्गां गन्तुमुद्यतःसन् स्वगुरुमाज्ञामयाचत तदा सोऽच्युतप्रेक्षस्तद्वियोगभीरुः स्वस्वामिनं ययाचे। स्वामी च कञ्चनपुरुषमाविश्येतस्तृतीये दिवसे गङ्गा त्वदर्थम् अस्मत्तटाकमागमिष्यत्यतस्त्वं मा गच्छेति पूर्णबोधमवदत्। तदाज्ञागतगङ्गायां जनैः सह सस्नाविति भावः। **जैत्रपत्रः** जैत्रं जयशीलपत्रं यस्य स तथोक्तः। सन्यासानन्तरं गत्वा चत्वारिंशद्दिवसागमे सति तत्र पत्रावलम्बनं कृत्वा बहून् जिगायेति भावः। **दुष्पद्यं** इष्टसिद्ध्याख्यमायावादिग्रन्थस्याद्यपद्यं छिनत्तीति सः। यदा पूर्णबोधं वाग्मिनं चिकीर्षुः अच्युतप्रेक्षस्तस्मै इष्टसिद्ध्याख्यं ग्रन्थं व्याचख्यौ तदा स तदाद्यश्लोके द्वात्रिंशषणान्युवाचेति भावः। **लोके प्रवचनचतुरः** प्रवचने इष्टसिद्ध्याख्यग्रंथव्याख्याने कुशलः चतुरः। अच्युतप्रेक्षे इष्टसिद्ध्याख्यं ग्रन्थं व्याकुर्वति सति तद्दूषकं पूर्णबोधं दृष्ट्वा जनास्तर्हि त्वमेव प्राज्ञत्वाद्व्याकुर्वित्यवदन्। तदा ससंप्रदायम् इष्टसिद्ध्याख्यग्रन्थं जनसंसदि व्याख्यातवानिति भावः। **सत्पुराणेतिहासस्य** सच्चतत्पुराणं च भागवतादि तेन सहित इतिहासः भारतं तस्योक्तावभिधाने। **मेधाप्रदर्शी** मेधां बुद्धिं प्रदर्शयतीति। स कदाचिदच्युतप्रेक्षसमीपे पञ्चषैर्द्विजैः भागवते प्रकारान्तरेण वाच्यमाने सति, तदा स्वयं नेयं व्यासकृतिः, किंत्वन्यैवेति प्रकारान्तरेण कथिते सति स्वगुरुणा, **'यदि त्वं व्यासकृतिं वेत्थ तदात्रैव पञ्चमेऽध्याये किञ्चिद्वदेति'** साक्षेपमुक्तेसति। तमध्यायं

सर्वमुक्त्वा स्वबुद्धिं प्रकाशितवानिति भावः। स ऋज्वग्रणीः ऋजवो ब्रह्मत्वयोग्या जीवास्तेषामग्रणीराद्यः मुख्यवायुरिति भावः। **मह्यं शुभदृशं** समीचीनज्ञानं **प्रदिशतु** ददातु। **दिश अतिसर्जने आशिषि लोट्।**

(९)

साक्षादानन्दतीर्थोऽनुमितिभिरुरुजिद्योऽनुमातीर्थनामा
विद्याब्धिं वादिसिंहं सपदि विजितवान् दुष्टभाष्यापनोदी।
अच्छेद्योक्तिः प्रमोदं पितुरपि कृतवान्नर्मगर्भं गुरूक्तो
भाष्यं कर्तुं ह्यवोचत्प्रियसखयतये सूत्रभावं स माऽव्यात्।। ९।।

साक्षादिति। यः साक्षान्मुख्यतया **आनन्दतीर्थनामा।** अयं भावः। अच्युतप्रेक्षः वेदान्तविद्यासांम्राज्यपालनायैनं वारिभिरभिषिच्यानन्दतीर्थेति सन्नाम चकार। तन्नाम तस्यान्वर्थमासीत्तथाहि। आनन्दस्य परमात्मनः तीर्थं पात्रमाश्रय इति यावत्। पुण्यक्षेत्रे तथा पात्रे तीर्थं, स्यात्पट्टनेऽपिचैत्यभिधानात्। आ सम्यगानन्दं सुखं यस्मात्तदानन्दं सुखकरं तीर्थं शास्त्रं यस्मात्सइत्यानन्दतीर्थ इति। **तीर्थंशास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिष्वि**त्याभिधानात्। अनुमितिभिरनुमानैरुरुजिदुरून् उद्धतान् जयतीति उरुजित्। अनुमातीर्थनामा। अनुमातीर्थइति नाम यस्य स तथोक्तः। कदाचिदच्युतप्रेक्षस्य सखा कश्चिद्यतिः तर्ककोविदैः बहुभिः शिष्यैः परिवृतो अच्युतप्रेक्षसमीपमाजगाम। तच्छिष्याः उद्धताः संतो बहूनि अनुमानानि प्रयुज्य पूर्णबोधं जेतुं ऐच्छन्। पूर्णप्रज्ञश्च तानि अनुमानानि प्रत्यनुमानैर्निरस्य तान्सर्वान् जिगाय। तदा सर्वे जनाः **पूर्णबोधमनुमातीर्थमाहुरितिभावः।** किञ्च **विद्याब्धिं** विद्यासागराख्यं वादिसिंहं वादिसिंहनामानं च। एतौ प्रचण्डकोविदावपि सपदि तत्क्षण एव जितवान्। **अच्छेद्योक्तिः** अच्छेद्या केनाप्यदूष्योक्तिर्यस्य स तथा सन्। **दुष्टभाष्यापनोदी।** दुष्टभाष्यापनोदी। दुष्टस्य सङ्करस्य भाष्यं दुष्टं च तद्भाष्यं चेति वा तदपनुदतीति तथोक्तः। कदाचित्संसदि सङ्करभाष्यं व्याकुर्वन् भाष्यस्य सूत्राणाञ्च परस्परसम्बन्धं प्रदर्श्य बहूनि दूषणान्युक्त्वा स्वयं प्रकारान्तरेण सूत्रार्थं वर्णयामासेतिभावः। **पितुरपि** स्वतातस्य मध्यगेहभट्टभ्य कदाचिद्रष्टुमागतस्य। **प्रमोदं** सल्लापैः सन्तोषं कृतवानितिभावः। **नर्मं** लीलागर्भं यथास्यात्तथा सूत्रभाष्यं कर्तुं गुरूक्तः गुरुणा अच्युतप्रेक्षे णोक्तः। **सूत्रार्थविच्चेत्कुरुभाष्यमञ्जसे** त्यादिप्रकारेणोक्तः। कदाचिद्गुरुणा उच्युतप्रेक्षेण समं लीलाविवादे सति पराजितेन तेन साक्षेपं शक्तश्चेत्सूत्रभाष्यं कुर्वित्युक्तः सन् गुरूक्तवाक्ये

आक्षेपमुपेक्ष्य कुर्विति विधानमात्रमंगीचकारेति भावः। यः **प्रियसखयतये** प्रियश्चासौ सखा च प्रियसखः स चासौ यतिश्च तस्मै। **सूत्रभावं** सूत्राणां ब्रह्मसूत्राणां वेदव्यासाभिमतभावम् अभिप्रायमितियावत्। **अवोचदुक्तवान्। वच परिभाषणे लुङ् वच उमिति उमागमः।** कदाचिदच्युतप्रेक्षस्य शिष्याय स्वज्येष्ठाय सूत्रभावं तत्वतो मह्यं प्रदिशेति सौहार्देन याचमानाय यतये सूत्रभावं वर्णितवानिति भावः। सः पूर्णबोधः मां 'त्वामौ द्वितीयाया' इत्यस्मादमादेशः अव्यात् अवतादाशिषि लिङ्।।

(१०)

याम्याशां यान् प्रभोक्ता बहुफलसमितेः क्षीरिणीं प्रेक्ष्य यान्तीं
स्यानंदूरे च दैत्यं सपदि विजितवान् फाल्गुनं तीर्थमाप्तः।
सेतुं चात्रापहास्यं खलमथ कृतवान् सर्वजिद्रङ्गनाथं
नत्वा यान् विश्ववन्द्यो ह्युपनदि विबुधौकस्यवेन्मां संधन्यः।।

याम्याशामिति। यमसबन्धिनीं दिशं दक्षिणां दिशं प्रतीत्यर्थः। **दिशस्तु ककुभः काष्ठा** इत्यमरः। यान् गच्छन्। **बहुफलसमितेः** बहूनां कदलीफलानां समितेः। समूहस्य कर्मणि षष्ठी। **प्रभोक्ता** भक्षकः। **विष्णुमंगलक्षेत्रे** भिक्षावसानकाले। भिक्षाप्रदात्रा परीक्षकेन दत्तानि द्विशताधिकानि कदलीफलनि भक्षितवानितिभावः। यान्तीं शीघ्रं प्रवहन्तीं क्षीरिणीं पयस्विनीं नदीं प्रेक्ष्य दृष्ट्वा। **स्यानंदूरे** अनंतशयने देत्यं उकपुतुनाख्यकुले पुनरुत्पन्नं सङ्करं। **सपदि** तत्क्षणे एव **जितवान्। फाल्गुनं** फल्गुनेनार्जुनेन कृतं तीर्थं कन्याकुमाराख्यं तीर्थं। **सेतुं** च प्राप्तः सेत्वादिकं प्राप्तः। तत्र तत्र तीर्थेषु स्नात इति भावः। अत्र सेतौ खलं दुष्टं तमेव सङ्करम्। **अपहास्यं** अपहासविषयं कृतवान्। श्रीमध्वं वेदादिकं सत्यजगत्कर्तृत्वेन सर्वजीवोत्तमत्वेन विष्णुपरतया व्याकुर्वाणं दृष्ट्वा कोपेनास्य दण्डं खण्डयामीनि ब्रुवन्तमुपलभ्य दण्डं खण्डयेत्युक्त्वा। खण्डने असमर्थं तं सर्वजनापहास्यं विधाय जितवानितिभावः। **सर्वजित्**पुनरन्यान् बहून् जयतीति। अथ सेतौ चातुर्मास्य सङ्कल्पानन्तरं। **रङ्गनाथं** श्रीरंगक्षेत्राधिपतिं नत्वा। **विश्ववन्द्यः** स तु यानुत्तरां दिशं प्रति गच्छन् सायः श्रीमध्वः**उपनदि नद्याः**पयस्विन्याः समीप इति भावः। **अव्ययं विभक्ती**त्यादिना समीप्यार्थे अव्ययीभावः। नदीपौर्णमास्याग्रहायणीभ्य (५-४-११०) इति समासांतस्य विभाषितत्वादुपनदीति साधु। **विबुधौकसि** विबुधस्य देवस्यौकसि आलये पयस्विनीनदीसमीपस्थे कस्मिंश्चिद्देवालये तस्थाविति शेषः। तं प्राप्य तत्रावसदित्यर्थः। स मध्वः मामवतु **अव रक्षणे लोट्**।। १०।।

(११)

विश्वादीनां शतार्थप्रवचनचतुरो दानसूक्तार्थवादी
दिव्यज्ञानप्रकाशी सकलजिदखिलज्ञाभिधः प्राप्तरूप्यः।
भीमो वा भीमसन्धः खलकुलदमने गीतिकाभाष्यकारी
गुर्वर्ची यानुदीचीं मम मनसि लसेत्तीर्थशोधी स मध्वः।।

विश्वेति। विश्वादीनां विश्वं विष्णुर्वषट्कार इत्यादिसहस्रनामगतविश्वादि पदानामित्यर्थः। शतार्थप्रवचनचतुरः शतसंख्याकाः येअर्थाः। तेषां प्रवचने व्याख्याने चतुरः कुशलः। इदमत्राकूतं पयस्विनीसमीपस्थ देवालयावस्थानसमये अधीतषडङ्गवेदाः विप्रास्तदर्थं जिज्ञासवः सन्तः पूर्णबोधमाप्य ऋक्शाखायां कस्यचित्सूक्तार्थमप्राक्षुः। तत्सूक्तं मध्वो विष्णुपरतया व्याचख्यौ। तं दृष्ट्वा विप्राः अन्यपरतां मन्यमाना प्रत्यवतस्थिरे। मध्वश्च **त्रयोर्थाः सर्ववेदेषु दशार्थाः सर्वभारते। विष्णोर्नामसहस्रन्तु निरन्तरशतार्थकम्** इति वचनं पठित्वा अन्यपरत्वमप्यनुमेने। तदा विप्रैराश्चर्यवद्भिः कथं सहस्रनाम्नां शतार्थत्वं? तर्हि वर्णयेत्युक्ते भगवान्वर्णयामासेति। तत्प्रकारश्च मध्वविजयटीकादितोऽवगन्तव्यः। **दानसूक्तार्थवादी।** अन्नदानप्रशंसाकारिसूक्तार्थं वदतीति सतथा। स्थलान्तरे कैश्चिद्विप्रैः श्रीमध्वं परीक्षमाणैः **न वा उ देवाः क्षुधमिद्वधं ददुरुतासितमुपगच्छन्ति मृत्यव** इत्यादिसूक्तार्थे पृष्टे तदर्थं वर्णितवानिति भावः। किञ्च दानसूक्तस्य कन्यकायै इंद्रकर्तृक कांतिदानप्रतिपादकसूक्तस्यार्थवादीत्यर्थः। पुनः सभान्तरे कैश्चिद्विप्रैः **कन्य वारवायतीसोममपिस्रुताविदत्। अस्तं भरंत्यब्रवीदिंद्रायसुनेकत्वां शक्राय सुनवै त्वे** त्यादिसूक्तार्थे पृष्टे। पूर्णबोधः इन्द्रः कन्याया दत्तं तं सोमरसं पीत्वा तां सूर्यसदृशकांतिमतीं चकारेत्याद्यर्थमूचे इति भावः। दिव्यमलौकिकम् अत्याश्चर्यकरमिति यावत्। तच्च तज्ज्ञानं प्रकाशयतीति स तथा ताच्छीलिको णिनिः। अयं भावः। स्वेनोक्ते दानसूक्तार्थे विप्रेषु विवदमानेषु सत्सु अपालाशब्दस्य अतितरुणीत्यर्थे मध्वेनोक्ते, श्वित्रिणी तत्पदवाच्येति विप्रेषु विवदमानेषु **अत्र कश्चिद्विपश्चिदायास्यति। ततः संवादं कुरुत** इत्युक्त्वा स्वयं निर्गतः। स विपश्चिदागत्य तथैवोक्तवान्। तदा सर्वे मध्वस्यातीतानागत सर्वविषयकज्ञानमस्तीति मेनिरे इति। **सकलजित्स**कलान्वेदशास्त्रविदो जयतीति स तथोक्तः। **अखिलज्ञाभिधः** अखिलज्ञोऽसीतिसर्वैरुच्यमानः प्राप्तरूप्यः रूप्यपीठपुरं प्राप्तः प्राप्तरूप्यः **प्राप्तापन्नेचेति** समासः तत्र सभासु स्वज्ञानं प्रकाश्य सर्वान् विजित्य सर्वैः विश्वज्ञोऽसीति स्तूयमानः सन् क्रमेण

रूप्यपीठं (रूप्यपीठपुरं) प्राप्तवानिभावः। **खलकुलदमने** खलानां दुर्वादिनां कुलस्य वृन्दस्य दमने पराजये। **भीमो** वा भीमसेनः इव **उपमायां विकल्पे** इत्यमरः। **भीमसन्धः** भीमा भयंकरी सर्वान् दुर्वादिनो जेष्यामीत्येवंरूपा संधा प्रतिज्ञा यस्य स तथोक्तः तादृशः सन् **गीतिकाभाष्यकारी** गीतिकायाः भगवद्गीतिकायाः, स्वार्थे कः, भाष्यं करोतीति स तथा। **गुर्वर्चीः** गुरुम् अच्युतप्रेक्षम् **अर्चतीति** पूजयतीति स तथा। गीताभाष्यं कृत्वा अच्युतप्रेक्षाय दत्त्वा तं संपूज्य 'बदरिकाश्रमं गमिष्यामीत्येवं संप्राथ्यानुज्ञां गृहीतवानिति भावः। उदीचीम् उत्तरां दिशं प्रति यान् गच्छन् तीर्थशोधी तीर्थानि शोधयतीति स तथा मार्गे तत्र तत्र तीर्थेषु स्नात्वा तानि पवित्रीकुर्वाण इति भावः। स एवंविधचरितो मध्वः मम मनसि लसेत् भासेल्लसकान्तावाशिषि लिङ्।। ११।।

(१२)

गङ्गातारी सुकर्मोपगतबदरिकान्तोऽत्र नारायणं यो
नत्वैकान्ते समुद्यत्प्रवचनकृदथो सत्तपाः कृष्णनुन्नः।
आप्तेभ्यः कार्यलेखी स्वमनुगतनिजप्रेरकः पाणिमात्रान्-
मारुत्याभः प्रपश्यन् हरिमपि गिरिणा सार्धमृद्ध्यै स मे स्यात्।।

गङ्गेति।। यः गङ्गातारी गङ्गां तरतीति स तथा। **सुकर्मा** तत्र तत्र शोभनचरितः सन् **उपगतबदरिकान्तः** उपगतः प्राप्तः बदरिकायाः अन्तः समीपं येन स तथा। **अत्र** बदरिकाश्रमे **नारायणम्** अर्चायां सन्निहितं नारायणम्। **नत्वैकान्ते समुद्यत्प्रवचनकृत्सम्य**गुत्थापितं प्रवचनं व्याख्यानं करोतीति स तथा। यदा गीताभाष्यं बदरिकाश्रमस्थविष्णवे उपायनत्वेनार्पयत् तदा विष्णुना व्याकुर्वित्यशरीरवचनतयोक्तं वचनं श्रुत्वा शिष्येभ्यो व्याख्यातवानिति। अथो व्याख्यानानन्तरम्। **सत्तपाः** समीचीनकाष्ठमौनाख्यतपोवान्। **कृष्णनुन्नः** कृष्णेन वेदव्यासेन नुन्नः स्वाश्रमं प्रत्यागन्तुम् प्रेरितः। पाठानन्तरं वेदव्यासः महाबदरिकाश्रमादणुबदरिकाश्रमं प्रति जनानां किञ्चित् अप्रकाशितया गत्वात्रत्यं पूर्णबोधं स्वाश्रमं प्रत्यागच्छेत्युक्तवानितिभावः। **आप्तेभ्यः** आप्तशिष्येभ्यः। **कार्यलेखी** कार्यं महाबदरिकां प्रति गमनरूपं लिखतीति सः तथा। व्यासाश्रमं प्रति गमिष्यामि भवन्तोऽत्रैवतिष्ठन्त्विति शिष्यान्प्रति इमां वाचं काष्ठमौनभंगभिया भूमौ लिखितवानितिभावः। पाणिमात्रात्पाणिरेव पाणिमात्रम्। तस्मात्केवलपाणिवायुनैवेति यावत् स्वं स्वात्मानम्। **अनुगतनिजप्रेरकः** सहैवानुगच्छन् योनिजः स्वीयः शिष्यः तस्य प्रेरकः गच्छेति प्रेरक इत्यर्थः। महाबदरिकाश्रमं

प्राप्तुं शीघ्रं धावन्पूर्णबोधः स्वविरहासहिष्णुतया आसायं अनुधावन्तं सत्यतीर्थं दृष्ट्वा पर्वतात्पर्वतान्तरमवप्लुत्य गच्छन्। स्वपाणिवायुनाणुबदरिकाश्रमं सत्यतीर्थं प्रापितवानितिभावः। **मारुत्याभः** मारुतेर्हनुमतः आभेवाभा यस्यसः। हनुमानिव पर्वतात्पर्वतान्तरं उत्प्लुत्य गच्छन्। **मारुत्याभः** मरुत्कुमारः भीमसेन इव शत्रुभयंकरस्सन्नित्यर्थः। **गिरिणा** हिमवत्पर्वतेन सार्धं हरिं श्रीकृष्णं **पश्यन्नी**क्षमाणः नानारत्नविभूषितं हिमालयं दृष्ट्वा श्रीकृष्णं सस्मारेतिभावः। **हरिं** वेदव्यासं इति वा। स पूर्णबोधः मे ऋद्ध्यै अभिवृद्ध्यै स्यादस्तु। **अस भुवि लिङ्**।। १२।।

(१३)

योऽपश्यत्स्वाश्रमाग्र्यं मुनिमहितगुणो दिव्यसालं च चित्रं
तत्रर्षीणां समाजे हरिमपि मुनितः सत्यवत्यां प्रजातम्।
कर्तारं भारतादेर्भरतवरगुरुं ब्रह्मसूत्रस्य चाहो
निर्दोषं नित्यपूर्णागणितगुणमसौ प्रीयतां मे स चेशः।।

योऽपश्यदिति।। **यः** पूर्णबोधः **स्वाश्रमाग्र्यं** शोभमानाश्रमेषु श्रेष्ठं बदरिकाश्र**ममपश्यन्मुनिमहितगुणः** मुनिभिः बदरिकाश्रमस्थैर्व्यासपरिवारभूतैर्महिताः पूजिताः नानाप्रकारेणोत्प्रेक्षिताः गुणाः कल्याणधर्माः यस्य स तथा। आगच्छन्तं मध्वं दृष्ट्वा मुनयः किं ब्रह्मा किं वायुरुत सूर्यः इत्यादिप्रकारेण उत्प्रेक्षितवन्त इत्यर्थः। चित्रं नानावर्णं **दिव्यसालं** दिव्यं लोकविलक्षणं सालं तरुं तस्मिन्नाश्रममध्ये कञ्चन वेदव्याससमीपस्थं बदरीवृक्षं चापश्यदित्यन्वयः। **तत्रा**श्रममध्यस्थबदरीवृक्षस्याधःप्रदेशे **ऋषीणां समाजे** समूहे हरिमपश्यदित्यन्वयः। कीदृशमित्यतस्तं विशिनष्टि मुनित इत्यादिना मुनितः पराशरात्सत्यवत्या प्रजातमाविर्भूतं वेदव्यासमिति यावत्। भारतादेः अष्टात्यां दशपुराणानां च **ब्रह्मसूत्रस्य** च कर्तारं प्रणेतारम्, **कर्तृकर्मणोः कृतीति षष्ठी** (२-३-६५)। **भरतवरगुरुं** भरतेषु वराणां श्रेष्ठानां पाण्डवानां गुरुं हितोपदेशकर्तारम्। **निर्दोषं नित्यपूर्णागणितगुणं** नित्याः प्रत्येकं पूर्णा अगणिताः गुणाः कल्याणधर्मा ज्ञानानंदादयः। यस्य तम्। एतादृशगुणविशिष्टत्वेनापश्यत्। ततः तेषां विशेषणानामुक्तिः। असावेवंविधगुणविशिष्टतया वेदव्यासस्य द्रष्टा मध्वः सचेशः वेदव्यासश्च मे प्रीयतां। प्रत्येकं सम्बन्धः तेनैकवचनं साधु **प्रीङ् प्रीणने आशिषि कर्तरि लोट्**।। १३।।

(१४)

सर्वाङ्गैः सर्ववन्द्यैर्विमलकुवलयश्यामलैः शोभमानं
विज्ञानानन्दतेजःप्रवरगुणमयैः पूर्णलावण्यरूपैः।
बिम्बोष्ठं पद्मपादं शुभकपिशजटं सैणचर्माणमीशं
दृष्ट्वा नत्वोपगूढः स गुरुरवतु मां सूपविष्टो मुनीष्टः।।

पुनः कथमपश्यदिति तत्राह **सर्वेति**।। **सर्ववन्द्यैः** सर्वैर्लक्ष्म्यादिभिर्वन्द्यैः स्तूयमानैः। **विमलकुवलयश्यामलैः** विमलानि विकसितानि कुवलयानींदीवराणि तद्वत् श्यामलैः नीलैः। **विज्ञानानंदतेजःप्रवरगुणमयैः** विज्ञानं च आनन्दश्च तेजश्च तान्येव प्रवराणि प्रमुखानि गुणानां ते प्रचुराः प्राचुर्यं येषां तैः। **'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधे'** ति वचनात्। **पूर्णलावण्यरूपैः** पूर्णेन लावण्ये रूपैः पूर्णसौंदर्येण प्रशस्तैः **'प्रशस्तायां रूपबिति रूपप् प्रत्ययः'**। पूर्णलावण्यमेव रूपं येषां तैरिति वा। **सर्वाङ्गैः** करचरणादिसर्वावयवैः। **शोभमानं** विराजमानम्। बिंबोष्ठं बिंबपक्कफलवदोष्ठौ यस्य तम्। **'ओत्वोष्ठयोः समासे वेति'** पररूपम्। पद्मपादं पद्मवत्पादौ यस्य तम्। **शुभकपिशजटं** शुभा कपिशा पिंगा जटा यस्य तम्। सैणचर्माणं इणाया इदमैणं तच्च तच्चर्म च तेन सह वर्तत इति सैणचर्माणं कृष्णाजिनवसानमित्यर्थः। 'अजिनं चर्मकृत्तिस्त्री' त्यभिधानात्। ईशं परमसमर्थं **दृष्ट्वा नत्वा** समीपं मत्वा प्रणम्येत्यर्थः। **उपगूढः** प्रणतं हस्ताभ्यामुत्थाप्य वेदव्यासेनालिङ्गितः। **सूपविष्टः**। तदनुज्ञया मुनिभिर्दत्त आसने सम्यगुपविष्टः। **मुनीष्टः** वेदव्यासमुखेन विज्ञातस्वस्वरूपाणां मुनीनामिच्छाविषयः स गुरुः पूर्णबोधः मां अवतु **रक्षतु**। **अव रक्षणे आशिषि लोट्**।। १४।।

(१५)

शिष्यं व्यासस्य नारायणमथ च गतं सर्वसेतुं सुमात्स्यं
साश्वास्यं कूर्मकोलौ नृहरिमथ मनुं वामनं बुद्धरामौ।
व्यासं काकुत्स्थकृष्णावतिचिरमितरानन्दनं कल्कियज्ञौ
सिद्धेशं नौमि धन्वन्तरिवरवनिताख्यं तमेनं स्मरन्तम्।।

इदानीमेकान्ते व्यासमुखात् भारतपञ्चरात्रवेदपुराणसूत्रादीनां यथावद्भावं विज्ञाय तत्रैव स्थलान्तरे तपसा वसन्तमिव स्थितं नारायणं प्राप्य तं नानावतारवत्तया दध्यावित्याह**शिष्यमिति**।। **व्यासस्य शिष्यं** व्यासेनोपदिष्टम्। अथ व्यासादुपदेशलाभानन्तरं

नारायणं धर्मपुत्रं **गतं** प्राप्तम्। कर्तरि क्तः। **तमेनं स्मरन्तं** ध्यायन्तं श्रीमध्वं **नौमि** स्तौमि चेत्यन्वयः। नु स्तुतौ लट्। कथं स्मरन्तं इत्यत आह-**सर्वसेतुमिति**। **सर्वसेतुं** सर्वजगदाश्रयम्। **मात्स्यं** शोभनमात्स्यरूपम्। **साश्वास्यम्** अश्वस्यास्येन मुखेन सहितम्। हयग्रीवावतारमिति यावत्। **कूर्मकोलौ** कूर्मवराहौ। **नृहरिं** नृसिंहम्। **अथ**शब्दोऽवताराणां समुच्चयार्थः। **मनुं** यज्ञनामक मन्ववतारम्। वामनम्। बुद्धरामौ बुद्धपरशुरामौ। **व्यासं** वेदव्यासम्। **काकुत्स्थकृष्णौ** रामकृष्णौ। अतिचिरं बहुकालम्। **इतरानंदनं** इतरायाः कुमारम् ऐतरेयम्। कल्कियज्ञौ सिद्धेशम्। कपिलम्। धन्वतरिवरवनिताख्यं धन्वन्तरिरिति वरवनितेति उत्तमस्त्री नारायणीति आख्या। यस्य तं तमेनं स्मरन्तमित्थं इत्यर्थः।। १५।।

(१६)

दत्तात्रेयं कुमारं हृदि दधदृषभं हसंकृष्णौ हरिं तं
धार्मं नारायणाख्यं सदश-शत-सहस्राद्यनन्तावतारम्।
तन्नुन्नस्तत्त्वसूक्त्यै वरमुचितनरैरेव सेव्यत्वमाप्तः
कृच्छ्राद्यात्रोन्मुखो मे स गतिरपि हरिर्व्यासनारायणाख्यः।।

दत्तेति।। यो मध्वः **दत्तात्रेयं** दत्तात्रेयावतारम्। **कुमारं** कुमारावतारम्। **ऋषभं** ऋषभनामानम्। हंसकृष्णौ हंसावतारधर्मपुत्रकृष्णावतारौ। धार्मं धर्मपुत्रं तं हरिं धार्मं नारायणाख्यम्। धार्ममित्युभयत्र संबध्यते। स **दशशतसहस्राद्यनन्तावतारं**। दश मत्स्यादिः। शतं नारायणादिः। सहस्रं विश्वादिः। आदिपदादजिताद्यनन्तावतारम्। बहुव्रीहिः समासः। **हृदि** हृन्मंदिरे। दधद्दधानः तं स्मरन्निति यावत्। **'नाभ्यस्ताच्छतुरि'**ति नुमभावः। **तत्त्वसूक्त्यै** तत्त्वानां परापरवस्तुतत्त्वानां सूक्त्यै सम्यङ् निरूपणाय। ब्रह्मसूत्रभाष्यं कर्तुमिति भावः। **तन्नुन्नः** तेन नारायणेन नुन्नः प्रेरितः। **उचितनरैरेव** योग्यपुरुषैरेव। **सेव्यत्वं** सेवनीयत्वं वरं रूपं आप्त प्राप्तः। सूत्रस्य यथावत्तया भाष्यं कृत्वा सर्वेभ्यस्तत्त्वमुपदेष्टुं गच्छेति नारायणेनोक्तो मध्वः **'स्वामिन्नधुना कलिमलकलुषीकृत मनसामयोग्यानां निंदितं तत्त्वोपदेशनं कर्तुं मां न नियोक्तुमर्हसी'** त्यभाषत। तदा नारायणः योग्या एव त्वां भजन्तु अयोग्यास्त्वद्विमुखा भवन्त्विति वरं दत्तवानिति भावः। **कृच्छ्रात्** कष्टात्। तद्विरहासहिष्णुत्वात् इति भावः। यात्रोन्मुखः यात्रायां दक्षिणदिशं प्रति गमने उन्मुखः उद्युक्तः। अभूत्। स गुरुः पूर्णबोधः व्यासनारायणाख्यः व्यासनारायणनाभा हरिरपि मे गतिः प्राप्यः।। १६।।

(१७)

लब्ध्वाऽनुज्ञां मुकुन्दात्स्वजनमुपगतोऽनेकभिक्षाप्रभोक्ता-
ऽतुल्यं भाष्यं च कुर्वन् स्वगुणसमगुणं संप्रयातः पुनर्यन्।
षट्च्छास्त्राशेषशाखास्वखिलविजयवान् शोभनं सूरिवर्यं
शिष्यं लब्ध्वाऽतिजैत्रं पुनरपि विविधान् प्राप्तरूप्यो गतिर्मे।।

लब्ध्वेति।। मुकुन्दाद् व्यासादनुज्ञां लब्ध्वा स्वजनं स्वशिष्यवर्गम् अणुबदरिकास्थम् इति भावः। **उपगतः** प्राप्तः। **अनेकभिक्षाप्रभोक्ता** एका न भवतीत्यनेका सा च सा भिक्षा चानेकभिक्षा, यद्वा अनेकैः पुरुषैर्दत्ता अनेकैः पृथक्पृथक् आनीतं सर्वमप्यन्नं, तस्याः प्रभोक्ता भक्षकः **तुल्यम्** अनुरूपं व्यासहृदयानुसारीति यावत्, यद्वा **अतुल्य**मिति वा पदछेदः असदृशमित्यर्थः। **स्वगुणसमगुणं** स्वस्य ये गुणाः हरिगुणप्रकाशकत्वपरपक्षदूषकत्वमिति वा कामितार्थप्रदत्वादयस्तत्सदृशगुणोपेतं च भाष्यं सूत्रभाष्यं कुर्वन् कुर्वाणः। संप्रयातः अणुबदरिकाश्रमाद्दक्षिणां दिशं प्रस्थितः **पुनः यन्** तत्सभासु गच्छन्। इणः शत्रन्तस्य रूपम्। **षट्शास्त्राशेषशाखासु** षट्शास्त्राणि भाट्ट, प्राभाकर, वैशेषिक, नैयायिक, बौद्ध, चार्वाकशास्त्राणि। अशेषा अखिलाश्च ताः शाखाश्च ता अशेषशाखाः तासु विषयसप्तमी। **अखिलविजयवान्** अखिलानां पुरुषाणां तद्विषय इति यावत्। विजयवान् अणुबदरिकायां सूत्रभाष्यं कृत्वा स्वशिष्यैः सह तत्र तत्र सभासु वादिनो जेष्यन् क्रमेण गोदावरीतटं प्राप्य बहुभिर्विद्वद्भिरनेकशाखासु षट्सु तन्त्रेषु च परीक्ष्यमाणः सर्वान् जितवानिति भावः। **सूरिवर्यं** सूरिषु विद्वत्सु वर्यं श्रेष्ठं। **अतिजैत्रम्** अत्यन्तजयशीलम्। **शोभनं** शोभनभट्टाख्यशिष्यम्। **लब्ध्वा** प्राप्य। **पुनर्विविधानपि** शिष्यानिति संबध्यते, लब्ध्वेत्यन्वयः। **प्राप्तरूप्यः** रूप्यपीठपुरं प्राप्तः। '**प्राप्तापन्ने द्वितीयये**'ति समासः। **द्विगुप्राप्ते**त्यादिना परवल्लिंगतानिषेधः(२-४-२६) । सः मध्वः। मे गतिः प्राप्यः स्यादिति शेषः।। १७।।

(१८)

सख्ये व्याख्याय भाष्यं कलिमलमपनीयाच्युतज्ञाय चालं
कार्ष्णीमर्चामचाल्यां त्रिदशकतरुणैर्लीलयानीय रूप्ये।
आस्थाप्यो(प्प्यो)दस्य यज्ञप्रतिहतिनिरतान् कारयित्वास्य यज्ञं
व्यासं नत्वा पुनश्च प्रतिगतरजतः संप्रसीदेत्स मध्वः।।

सख्य इति।। सख्ये सखिभूताय कस्मैचिद्यतये **अच्युतज्ञाय** अच्युतप्रेक्षाय च स्वगुरवे **भाष्यं व्याख्याय।** कलिमलं कलिमलकलुषितमनःकल्मषं **अलमपनीयापास्य कार्ष्णी** कृष्णसम्बन्धिनीं। **त्रिदशकतरुणैः** त्रित्वविशिष्टदशसंख्या एषां तैः तरुणैः युवभिः त्रिंशत्तरुणपुरुषैरित्यर्थः। **अचाल्यां** चालयितुमशक्यां वासुदेवसन्निधानेनातिगुरुत- मामित्यर्थः। **अर्चां** प्रतिमां **लीलया आनीय** स्वयमेव रूप्यपीठपुरं प्रापय्य। **रूप्ये** रूप्यपीठपुरे **आस्थाप्य** प्रतिष्ठाप्य। **यज्ञप्रतिहतिनिरतान्** यज्ञस्य प्रतिहतौ विधूतौ निरतान् **व्युदस्य** स्वयज्ञं स्वगुरुपुत्रस्य यज्ञं **कारयित्वा।** केचिदात्मनो यायजूकत्वं मन्यमानाः परेषां यज्ञं विघ्नन्तस्तस्थुः। तान्निरस्य स्वाध्यापकगुरुपुत्रं याजयामासेति भावः। **पुनश्च व्यासं** बदरिकाश्रमस्थं वेदव्यासं **नत्वा।** प्रतिगतरजतः रजतपीठपुरं प्रति गतः स तथा। पुनः बदरिकां गत्वा व्यासं नत्वा पुनः रूप्यपीठपुरं प्राप्तवानित्यर्थः। स मध्वः संप्रसीदेत् प्रसन्नो भवेत्। षद्लृ विशरणगत्यवसादनेषु लिङ्।। १८।।

(१९)

सागस्त्वादीशदेवं परवशखननं यो व्यधादप्लवः स्वैः
गङ्गातारी स्वरीत्या वशितयवनराट् वर्त्मनि क्वापि चोरान्।
हन्तुं यातान्मिथोऽहन्क्वचिदपि निजशिष्येण चाद्रावयद्द्रा-
ग्योगेनासीच्छिलाभः क्वचिदपि सगणस्तं महेक्षं दिदृक्षे।।

श्रीमध्वस्य पुनर्व्यासाश्रमं प्रति गमनागमनयोः कृतचरितान्याह **सागस्वादिति।। यो** मध्वः। **ईशदेवं** ईश्वरदेवनामानं राजानं **सागस्त्वात्** आगसाऽपराधेन सह वर्तत इति सागाः तस्य भावस्तत्त्वम्। तस्मात्। **परवशखननं** परवशं स्वावशं खननं यस्य तं व्यधात् अकरोत्। श्रीमध्वः बदरिकाश्रमं गच्छन् मार्गमध्ये क्वचित्पान्थान् बलात् गृहीत्वा तटाकखननं कारयन्तं स्वात्मानमपि पथि गच्छन्तं खननार्थमाकर्षन्तमीश्वरदेवाख्यं दुष्टं राजानं दृष्ट्वा खननप्रकारं मम प्रकाशयेत्युक्त्वा तत्प्रकाशायोप्रक्रान्तं तं स्वयमन्तःप्रेर्य निश्शेषखननमकारयत्। स्वैः स्वकीयैः शिष्यैः सह **आत्मीये स्वोऽस्त्रियां धने**, त्यमरः। **अप्लवः** प्लवशब्देन **प्रवाहतरणसाधनमुच्यते।** न विद्यते प्लवो नौर्यस्यासावप्लवः सन्। **उडुपं तु प्लवः कोलः** इत्यमरः। **गङ्गातारी** गङ्गां तारयतीति गङ्गातारी। शत्रुशङ्कया प्लवहीनांगङ्गां स्वकटिभागावलम्बिभिः शिष्यैः सह स्वहस्ताभ्यां तीर्णवानिति भावः। **स्वरीत्या** स्वशब्दः समभिव्याहतयवनराजपरामर्शी, तथा च स्वस्य त्वरकराजस्य रीत्या तदीयभाषयेत्यर्थः। **वशितयवनराट्** वशितः स्ववशीकृ-

तः यवनराट् म्लेच्छराजो येन स तथा। रिपुनृपवीरशङ्कया राजभटैर्हननेच्छया राजसमीपं नीयमानो मध्वो राजानं दृष्ट्वा देशकालोचिततदीयभाषया राज्ञः स्वस्मिन्पूज्यताबुद्धिमुत्पाद्य गतवानिति भावः। **क्वचिद्वर्त्मनि** मार्गे सशिष्यं स्वात्मानं **हन्तुं यातान्** प्राप्तान् चोरान् तस्करान् स्वयं स्वयमेव **मिथः** परस्परं **अहन्** अघातयत्। हन हिंसागत्योर्लङ्। श्रीमध्वः क्वचिन्मार्गे गच्छन् स्वात्मानं हन्तुमागतांश्चोरान् दृष्ट्वा स्वीयान् क्वचिन्निक्षिप्य स्वकरे पटपिण्डं निधाय स्वयं चोरमध्ये गत्वा द्रव्यबुद्धिं तेषामुत्पाद्य परस्परं घातयामासेति भावः। क्वचिदपि पुनः प्रदेशान्तरेऽपि निजशिष्येणोपेंद्रतीर्थाख्यशिष्येण **द्राक्** शीघ्रं **चोरानद्रावयत्** पलायनमकारयत्। द्रु-गतौ लङ्। प्रदेशान्तरे सर्वान् हन्तुमागतान् शतसंख्यान् चौरान् दृष्ट्वा मध्वप्रियशिष्यः क्वचिन्मध्वाज्ञया तानभिद्रुत्य चोरनाथहस्तात्खड्गमाच्छिद्य तच्छिरश्छित्वा तत्परिवारानद्रावयदिति भावः। क्वचिदपि पुनः प्रदेशान्तरेऽपि अन्यान् चौरान् दृष्ट्वेति शेषः। सगणः सशिष्यसंघः। **योगेन** सामर्थ्यविशेषेण। **शिलाभः** पाषाणतुल्य आसीत्। **अस्तिसिचोपृक्तेतीट्**(७-३-१६) महेक्षं महती ईक्षा यस्य तं पूर्णप्रज्ञमित्यर्थः। दिदृक्षे द्रष्टुमिच्छामि। **'ज्ञाश्रुस्मृदृशां सन्'** (१-३-५७) इत्यात्मनेपदम्।। १९।।

(२०)

दैत्यव्याघ्रोपघाती नरसखकरतो लब्धगौरोपलार्चो
व्यासाज्ञाहृत्सुतर्ता लघु सुरसरितो वारिसंस्तम्भयोगात्।
भित्त्वा भूमिं द्युनद्या मठमुपगतया वन्दितो मूर्तिमत्या
यूनोऽनेकान् विजिग्ये युगपदुपगतान् यस्सलीलं तमीडे।।

दैत्येति।। यः मध्वः **दैत्यव्याघ्रोपघाती** दैत्यश्रेष्ठमुपहन्तीति तथा। हिमाचलसमीपे सालग्रामपेटिकां गृहीत्वा पुरतो गच्छन्तं सत्यतीर्थं हन्तुमागतं व्याघ्राकारं कञ्चन दैत्यवरं स्वपाणिना मध्वो हतवानिति भावः। **नरसखकरतः** नरस्य सखा नरसखः नरनारायण इत्यर्थः। तस्य करात्। **लब्धगौरोपलार्चः** लब्धाः प्राप्ताः गौराः शुक्लाः उपलार्चाः पाषाणप्रतिमाः येन स तथा। **'पूजाप्रतिमयोरर्चे'** त्यमरः। बदरिकाश्रमवासी नारायणः मध्वायानेकाः शिलामयीरत्यन्तं शुभ्राः प्रतिमा दत्तवान् अष्टौ शिलामुष्टीः दत्तवानिति लोकप्रवादः। **व्यासाज्ञाहृत्** व्यासस्याज्ञाम्। महाभारततात्पर्यनिर्णयं कुर्वित्यनुज्ञां हरति बिभर्तीति स तथा व्यासाज्ञामादाय गच्छतो मध्वस्य चरितान्याह। **सुरसतर्तेत्यादिना**। **सुरसरितः** सुराणां देवानां सरितः नद्याः। कर्मणि षष्ठी। **वारिसंस्त-**

म्भयोगात् वारिणो जलस्य संस्तम्भनरूपोपायात्। **'योगः सन्नहनोपाये'**त्यभिधानात्। लघु यथा तथा सुतर्ता अनायासेन तीर्णवान्। शत्रुशङ्कयाऽप्लवोपेतां (प्लवापेतां) गङ्गा-जलस्तम्भनं कृत्वा तीर्णवानिति भावः। **भूमिं भित्त्वा** विदार्य। **मठमुपगतया मूर्तिमत्या** विग्रहवत्या द्युनद्या गङ्गया वन्दितः नतः। श्रीमध्वः हस्तिनपुरगतमठे सङ्कल्पार्थं यदा तस्थौ तदा गङ्गा तं सेवितुं भूमिं भित्त्वा लावण्याद्युपेतविग्रहं धृत्वा सर्वेषां पुरतः आगत्य मध्वं नतवतीत्यर्थः। यूनः तरुणान् अनेकान् अनेकसंख्योपेतान् पञ्चदशसंख्याकान् सलीलं **विजिग्ये** जितवान्। **'विपराभ्यां जेरि'**त्यात्मनेपदं लिट्। (**सन् लिटोर्जेरिति** कुत्वं) (७-३-५७)। बलगर्वितान् स्वशिष्यान् दृष्ट्वा कदाचित्तैः पञ्चदशभिर्युवभिः युगपदेव नियुध्य जितवानिति भावः। तं मध्वम् ईडे स्तौमि। **ईड स्तुतौ लिट्**।। २०।।

(२१)

स्वर्गाह्वोक्तिप्रखण्डी सकलसमयिजिद्व्याख्ययाऽभात्पुराजौ
शिष्याणामायुधानि प्रकटयति पुरा पूजितः शूलिनालम्।
प्रत्यक्षेण क्वचिद्यो दशशतगुरुरम्भापयोभुक् क्षणात्स-
द्रानैः पुष्यादिकारीत्यभिहितचरितो यः शुभैस्तं प्रपद्ये।।

स्वर्गेति।। स्वर्गाह्वोक्तिप्रखण्डी स्वर्गस्याह्वां नाम। **'आख्याह्वे अभिधानं** चे'त्यमरः। तद्वन्नाम यस्य अमरावत्याख्यस्य अमरेन्द्रपुरीनाम्नः कस्यचिद्यतेः उक्तेः ज्ञानकर्मणोः मोक्षसाधनतां प्रसाधयेत्येवंरूपवचनस्य प्रखण्डी छेदकः। ज्ञानकर्मणोर्मोक्षहेतुत्वे मध्वेन सयुक्तिकं साधिते सति युक्त्यनभिज्ञेन तेन यतिना ज्ञानपदार्थे पृष्टे सति त्वं ज्ञान्यसि न वेति विकल्प्य दूषणाभिधानेन खण्डितवानिति भावः। सकलसमयिजित् तत्र तत्र सभासु सकलान्समयिनः सिद्धान्तिनः वादिन इति यावत् जयतीति स तथा। **व्याख्यया** वेदव्याख्यानेन **अभात्** अराजत। **भा दीप्तौ लङ्**। पुरा भीमावतारे आजौ युद्धे **आयुधानि** स्वकीयगदाद्यायुधानि शिष्याणाम् एकस्य प्रकटयति पुरा दर्शितवान्। **यावत्पुरानिपातयोर्लडिति लट्।** कुरुक्षेत्रं गत्वा तत्रत्यानि स्वकीयभीमावतारायुधानि शिष्याणां दर्शयामासेति भावः।। प्रत्यक्षेण जनदृष्टिगोचरेण **शूलिनालं** साधु षड्रसोपेत-भक्ष्यभोज्यादिना पूजितः। रुद्रो विप्रवेषो भूत्वा कुरुक्षेत्रगताय मध्वाय क्षणं दत्त्वा सम्यग्भिक्षां दत्तवानिति भावः। **क्वचित्**स्थलान्तरे **दशशतगुरुरम्भापयोभुक्** गुर्व्यश्च ताः **रम्भाश्च,** दशशतानि सहस्राणि च तानि ता गुरुरंभाश्च अनेकसहस्रपृथुकदलीफलानीत्यर्थः। फले लुक्। त्रिंशत्पूर्णकुम्भक्षीरं भुङ्क्त इति स तथा। कस्मिंश्चित्प्रदेशान्तरे केनचित्प्र-

भुणा परीक्षकेण च दत्तानि चतुःसहस्रगुरुकदलीफलानि त्रिंशत्कुम्भपूर्णं **क्षीरं च बुभुज** इति भावः। **क्षणात् सद्गानैः** समीचीनगानैः पुष्पादिकारी पुष्पफलादिकारी। **क्वचिच्छुष्क-**पूगतरुं दृष्ट्वा जनसङ्घेन प्रार्थितः सन् श्राव्यगानं कृत्वा पुष्पफलादिमन्तं क्षणेनाकरोदिति भावः। इति एवं प्रकारेण शुभैः सज्जनैः **अभिहितचरितः** आसीदिति शेषः। **तं मध्वं प्रपद्ये** प्राप्नोमि। **पद गतौ लट्**।। २१।।

(२२)

व्याख्यां श्रुत्वा मुनिभ्योऽभ्यधित समयतो यस्य लभ्यं फणीन्द्रो
वैकुण्ठं हेमनानामणिमयसदनं श्रीशधामास्तदोषम्।
सायुज्याद्याप्तसौख्यैर्विविधविषयिभिः सुन्दरीभोगभाग्भि-
र्ब्रह्माद्यैर्नाथदृग्भिर्विलसितमतुलं सोऽनुगृह्णातु नोऽलम्।।

व्याख्यामिति।। **फणीन्द्रः** शेषः। **व्याख्यां** माध्वीमिति शेषः। **श्रुत्वा यस्य** श्रीमध्वस्य **समयतः** सिद्धांतात् **लभ्यं वैकुण्ठं मुनिभ्यो अभ्यधित** उक्तवान्। **डुधाञ् धारणपोषणयोः लुङ्**। शेषः स्वलोकादागत्यांतरिक्षे स्थित्वा मध्वव्याख्यां श्रुत्वा स्वलोकं प्राप्य मध्वशास्त्रम् अध्येतुः किं फलमिति पृष्टवद्भ्यः सनकादिभ्यः वैकुंठाख्यं फलमवोचदिति भावः। वैकुंठं विशिनष्टि **हेमनानामणिमयसदनमिति**। हेम्नां नानामणीनां विकारा हेमनानामणिमयानि तानि सदनानि यस्मिन् सः तं। **श्रीशधाम** श्रीशस्य विष्णोर्धाम आवासभूतम्। अस्तदोषम् अस्ता दोषाः जरामरणादयः यस्मिन् तं। **सायु-ज्याद्याप्तसौख्यैः** सायुज्यम् आद्यं येषां सारूप्यादीनां तैः आप्तं सौख्यं सुखं येषां तैः। **विविधविषयिभिः** विविधाः विषयाः भोग्याः एषां सन्तीति तैः। **सुन्दरीभोगभाग्भिः** सुन्दरीभिः स्त्रीभिर्भोगं भजन्तीति तैः। **नाथदृग्भिः** नाथं विष्णुं पश्यन्तीति तैः ब्रह्माद्यैः मुक्तैरिति शेषः। **विलसितं** शोभितं **अतुलम्** असदृशमिति। **सः** श्रीमध्वः **नः** अस्मान् **अलम्** अनुगृह्णातु। **ग्रह उपादाने लोट्**।। २२।।

(२३)

नानादुर्नीतिवादैर्विहितमुरुमदं मायिभूतासुरेन्द्रै-
र्योऽयं वेदान्तसिंहो व्यजयत कुरवं पुण्डरीकं प्रकाण्डम्।
विश्वाश्चर्यप्रकारप्रवचनमकरोच्छन्दसां यत्स्पृधान्य-
स्तत्कुर्वन् हास्य आसीद् द्विजवरनिकरे स्याम तद्दासदासाः।।

नानेति।। योऽयं वेदान्तसिंहः वेदान्तिनां श्रेष्ठः श्रीमध्वः। **नानादुर्नीतिवादैः** नानाप्रकारा दुर्नयवादाः येषां तैः मायिभूतासुरेन्द्रैः मायावादाख्यासुरश्रेष्ठैः व्रीह्यादित्वान्मायीति इति साधु। **विहितं** कृतं प्रेषितमिति यावत्। **उरुमदम्** उत्कृष्टगर्वोपेतं **कुरवं** कुत्सितभाषणम्। **प्रकाण्डं** बाणसदृशम्। **कांडोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु** इत्यमरः। **पुण्डरीकं** पुण्डरिकाख्यवादिनं **व्यजयत** जितवान्। **जि जये लङ्। विपराभ्यां जेरित्यात्मनेपदम्।** श्रीमध्वपराक्रममसहमाना मायावादिनः एकत्र मिलित्वा दुर्मन्त्रैरालोच्य पुण्डरीकाख्यं प्रचण्डपंडितं श्रीमध्वं जेतुं प्रेषितवन्तः। श्रीमध्वश्च तमागतं सिंहो जंबुकमिव क्षणेनाक्षिप्तवानिति भावः। यश्च **विश्वाश्चर्यप्रकारप्रवचनं** विश्वेषां आश्चर्यः प्रकारः यस्य तत् तादृशप्रवचनं **अकरोत्** कृतवान् लङ्। अन्यः शार्दूलाख्यः कश्चिन्मायी **यत्स्पृधा** यस्य श्री मध्वस्य स्पर्धया **च्छन्दसां** वेदानां तत् व्याख्यानं कुर्वन् **द्विजवरनिकरे** हास्यः हासविषयः आसीत्। श्रीमध्वकृतवेदव्याख्यानचातुर्यं श्रुतवन्तः पण्डिताः शार्दूलाख्यमायावादिनं च प्राप्य वेदार्थं प्रपृच्छुः। तदा स मध्वसाम्यं प्राप्तुं वेदव्याख्यानमुपक्रम्य अग्निनारयिमश्नवदिति मन्त्रेण अग्नीति पदच्छेदं कृत्वा नारमिति पदच्छेदं शैघ्र्यात्कृतवान्। तमेवंविधं वीक्ष्य विप्राः सभायां जहसुरिति भावः। **तद्दासदासाः** तस्य श्रीमध्वस्य दासदासाः **स्याम** भवेम। **अस भुवि विधि लिङ्**।। २३।।

(२४)

पद्माख्यं सिन्धुराजं प्रियजनपरमागस्कृतं प्राप्य भीते-
रन्यान्कुर्वाणमग्रे सपदि निजगृहे गोगणैर्मध्वपार्थः।
यो यद्दासोक्तिबाणैर्विदलितहृदया दुद्रुवुर्मायिदैत्या-
स्सर्वज्ञाह्वो हरिर्यो जगति विजयते सम्प्रदद्याज्जयं नः।।

पद्माख्यमिति।। यो मध्वपार्थः मध्वाख्यार्जुनः। **प्रियजनपरमागस्कृतं** प्रियजनस्य शङ्करभट्टस्य परमागो द्रोहः तं करोतीति तम्। **भीतेः** मध्वभयात्। **अन्यान्वादिनः। अग्रे** स्वपुरतः। **कुर्वाणं** निक्षिपन्तं **पद्माख्यं** पद्मतीर्थनामानम्। **सिंधुराजं** सिन्धुदेशाधिपतिं सैन्धवं। **'राजाहस्सखिभ्यष्टजिति'** सिंधुराजमिति साधु। **प्राप्य गोगणैः** गवां वचनानां युक्तिरूपाणां गणैः समूहैः। **सपदि** तत्क्षण एव। **निजगृहे** निगृहीतवान्। ग्रह उपादाने लिट्। अयं भावः। मध्वकृतभाष्यादिकोशकबलिकां शंकरभट्टाख्यमध्वशिष्यगृहे स्थितां श्रुत्वा पद्मतीर्थाख्यमायावादी निशीथे तद्गृहं प्राप्य तं बलात्कृत्य कबलिकामपहृत्य स्वग्रामं प्राप्तवान्। श्रीमध्वस्तु प्रातस्तच्छ्रुत्वा स्वशिष्यैः

सहितः सन् भीत्यान्यान्पुरस्कृत्य पृष्ठतः स्थितं पद्मतीर्थं प्राप्य क्षणेन युक्तिभिर्जितवान्, वनवासे द्रौपदीमपहृत्य गच्छन्तं सैन्धवम् अर्जुनो बाणैर्यथा तथेति। शिष्टं तु रहस्यं भावप्रकाशिकातोऽवगन्तव्यम्। **यद्दासोक्तिबाणैः** यस्य श्रीमध्वस्य दासानां शिष्याणाम् उक्त्याख्यबाणैः बाणतुल्यैः वचनैरित्यर्थः। **विदलितहृदयाः** विभिन्नमनस्काः सन्तो। **मायिदैत्याः** दुद्रुवुः पलायितवन्तः। **द्रु गतौ लिट्। यः सर्वज्ञाख्यः** पूर्णप्रज्ञनामा हरिः नरसिंहः जयति विजयते उत्कृष्टो वर्तते सः श्रीमध्वः नो अस्मभ्यं जयं प्रदद्यात् प्रयच्छेत्। डु **दाञ् दाने** लिङ्।। २४।।

(२५)

श्रीकान्ताङ्घ्रिप्रसङ्गादधिकशुभतमो यान्यथा गाङ्गवोघो
राज्ञा संवन्दिताङ्घ्रिस्सकलगुणगणोपेतपादादिकान्तः।
सर्वेषां दर्शनीयो लिकुचकुलभवो वेदशास्त्रानुसारी
प्रापायुग्विक्रमार्यो यमखिलगुरुमानन्दतीर्थार्यमीडे।।

श्रीकान्तेति।। यः **श्रीकाताङ्घ्रिपसङ्गात्** श्रीकांतस्य विष्णोः अन्ध्र्योः पादयोः प्रसङ्गात् आलापात्। **अधिकशुभतमः** अत्यन्तमङ्गलः यो मध्वः। ओघस्यापि विशेषणमिदम्। **गाङ्गवोघः** गङ्गासम्बन्धी ओघः प्रवाहः यथा प्रतीचीं प्रति गच्छन् राज्ञा जयसिंहाख्यराजेन **संवन्दिताङ्घ्रिः** नमस्कृतपादः। **सकलगुणगणोपेतपादादिकान्तः** सकलगुणानां द्वात्रिंशल्लक्षणादिकानां गुणैः संघैः पाद एवादिर्येषां ते पादादयः कं शिरः अन्तः एषां ते कान्ताः पादादयश्च कन्ताश्च पादादिकान्ताः सकलगुणगणोपेताः पादादिकान्ता यस्य सः। सर्वावयवसुन्दर इति भावः। **'मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोरित्यमरः।'** अत एव सर्वेषां दर्शनीयः सन् विष्णुमङ्गलाख्यदेवालये आस्ते इति शेषः। यम् अखिलगुरुम् अखिलानां सतामुपदेष्टारं मध्वम्। **वेदशास्त्रानुसारी** वेदशास्त्राणि अनुसरतीति स तथा। **लिकुचकुलभवः** लिकुचाख्यकुले उत्पन्नः। **अयुग्विक्रमार्यः** त्रिविक्रमपण्डिताचार्यः। **प्राप** तत्त्वबुभुत्सयेति शेषः। श्रीमध्वः यदा भाष्यादिपुस्तकापहारिणं पद्मतीर्थं विजित्य तत्पुस्तकजातं पद्मतीर्थादिदण्डनानन्तरं ग्रहीष्यामीति बुध्या मध्यस्थे स्थापितवान्। श्रीमध्वोऽनन्तरं सह्यं प्राप्तः। तदेतत्सर्वं श्रुतवता वैष्णवोत्तमेन जयसिंहाख्यराजेन आचार्यग्रन्थप्रत्यर्पणाय स्वराज्यमानाय्य आचार्यः पूजितः। तदा त्रिविक्रमपंडिताचार्यः मध्वकीर्तिं श्रुत्वा तत्त्वजिज्ञासया तम् प्रापेति श्लोकाभिप्रायः। तं आनन्दतीर्थार्यमीडे। **ईड स्तुतौ लट्।।** २५।।

(२६)

लब्धग्रन्थः स्तुतोऽलं लिकुचकविवरेणेह निन्ये दिनानि
श्रीभर्तुः प्रीतिवृद्ध्यै विविधशुभकृतीः केवलं यस्तु कुर्वन्।।
निर्लेपो दग्धकर्मा मतिकृतिकरणैर्लोकशिक्षां च कर्तुं
देवैर्वृष्टामृतार्चः प्रवचननिरतो मे प्रवक्तृत्वदस्स्यात्।।

लब्धेति।। यो मध्वः **लब्धग्रन्थः** लब्धः ग्रन्थो भाष्यादिकोशो येन सः। **लिकुचकविवरेण** लिकुचकुलोत्पन्नकविश्रेष्ठेन त्रिविक्रमपण्डिताचार्येण **स्तुतः अलं** सम्यक् प्रशंसितः। अयं भावः-पद्मतीर्थापहृतं तत आच्छिद्य पद्मतीर्थादिदण्डनां विना न स्वीकार्यमिति भावेन मध्यस्थे स्थापितं भाष्यादिकोशजातं पद्मादीन् दण्डयता जयसिंहाख्यनृपेण संप्रार्थितः सन् श्रीमध्वः तत्कोशजातम् आदाय शङ्करभट्टहस्ते पूर्ववदेव दत्तवान्। तदा त्रिविक्रमाचार्यः स्वानुजस्य शङ्करभट्टस्य दुष्टापहृतग्रन्थजातप्राप्तिं दृष्ट्वा परितुष्टः श्रीमध्वम् अस्तौषीदिति। इह विष्णुमङ्गलाख्यदेवालये **निर्लेपः** आगामिपापलेपरहितः। दग्धकर्मा दग्धानि भस्मसात्कृतानि कर्माणि सञ्चितकर्माणि यस्य स तथा। श्रीभर्तुः विष्णोः प्रीतिवृद्ध्यै सन्तोषाभिवृध्यर्थं मतिकृतिकरणैः मत्या मननेन कृतिभिर्धर्माचरणैश्च लोकशिक्षां च कर्तुं यः शुभकृतीः नानाशुभधर्मान् कुर्वन् दिनानि निन्ये नीतवान्। **नीङ् प्रापणे लिट्।** तान्व्यापारानाह--- **देवैरिति।** इन्द्रादिभिः **वृष्टामृतार्चः** वृष्टानि अभिवृष्टानि अमृतानि यस्याः सा। वृष्टामृताऽर्चा विष्णुप्रतिमा यस्य सः। यदा श्रीमध्वः देवपूजां करोति तदा देवाः मध्वपूज्यसालग्रामशिलासु अमृतं वर्षन्ति। तदमृतं निर्माल्यविसर्जनकाले तन्निर्माल्याद्धृतवत्स्रवस्रवैर्दृष्टमित्यर्थः। **प्रवचननिरतः** प्रवचने वेदान्तव्याख्याने निरतः आसक्तः। प्रातः स्नात्वा आमध्याह्नं वेदान्तव्याख्याकारीत्यर्थः। स मध्वः **मे** प्रवक्तृत्वदः व्याख्यातृत्वदाता स्यात् भवेत्। लिङ्।। २६।।

(२७)

स्नातो देवाभिषेक्ता सदरिदरधरस्तन्त्रशास्त्रानुसारी
सम्यक् सम्पूज्य विष्णुं वरतुलसिकया दर्शनीयोऽथ भुक्त्वा।
नानालोकाभिनन्दी गुरुरथ विलसद्व्याख्यया सांध्यकृत्यम्।
कृत्वा गोविन्दलीलाकथक उरुकथां वैष्णवीं वाचयेन्नः।।

स्नात इति।।स्नातः माध्याह्निकस्नानकारी। **देवाभिषेक्ता** देवस्य विष्णवधिष्ठान-

सालग्रामस्याभिषेक्ता अभिषेकं कुर्वाणः, वेदान्तव्याख्यानमवसाय्य, माध्याह्निस्नानं कृत्वा तीर्थाय तटाकतीरे देवस्याभिषेकं कृतवानिति भावः। **सदरिदरः** धर अरिश्च दरश्च अरिदरौ सन्तौ निर्दुष्टौ शंखचक्रौ धरतीति स तथा। द्वादशोर्ध्वपुण्ड्राणि शङ्खचक्रादिपञ्चमुद्राश्च धृतवानिति भावः। तन्त्रशास्त्रानुसारी तन्त्रशान्त्रं पञ्चरात्रम् अनुसरतीति स तथा तन्त्रशास्त्रात्मक पञ्चरात्रानुसारेण विष्णुं **वरतुलसिकया** उत्तमश्रीतुलसीगन्धसमूहेन सम्यक् संपूज्य। **वरतुलसिकया** हरिनिर्माल्यतया कर्णधृतोत्तमतुलसीगुच्छेन **दर्शनीयः** रम्य इति वा। अथ देवपूजानन्तरं भुक्त्वा नैवेद्यशेषभिक्षां कृत्वा। **विलसद्व्याख्यया** भासमानसच्छास्त्रव्याख्यानेन। **नानालोकाभिनन्दी** नानाजनसन्तोषकारी। **गुरुः अथ** सायङ्काले सान्ध्यं कृत्यं सन्ध्यासम्बन्धि कर्म कृत्वा। उत अनन्तरं **गोविन्दलीलाकथकः** गोविन्दस्य लीलाः चरितानि कथकः निशि बहुकालं भागवतव्याख्यातेत्यर्थः। **नः** अस्मान्। स मध्वः **वैष्णवीं** विष्णुप्रतिपादकां कथां वाचयेत्। **वच परिभाषणे लिङ्**।। २७।।

(२८)

मान्योपन्यासधन्यो हरिरमितगुणो ब्रह्म वेदैकवेद्यः
कर्ता विश्वस्य मोक्षं शुभसुखविषयं राति भक्तेभ्य इत्थम्।
सत्तर्कैः साधयित्वा श्रुतिशतसहितैस्सूरिसूनुं विजित्य
व्याख्याता तस्य पूर्णप्रमतिरनुदिनं व्याख्ययाप्याययेन्माम्।।

मान्येति।। मान्योपन्यासधन्यः मान्यः पूज्यः स चासावुपन्यासः तेन धन्यः। निरपेक्षगुणः **निरपेक्षो गुणैर्यत्तु धन्य इत्युच्यते बुधै** रिति वचनात्। स्वस्य प्रतिपादितयाऽग्रे स्थितं त्रिविक्रमपण्डिताचार्यं दृष्ट्वा तद्विजयायोपन्यासमकरोदिति भावः। उपन्यासप्रतिपाद्यमाह हरिरित्यादिना। इत्थमित्यन्तेन। **अमितगुणः** अपरिमितकल्याणधर्मः। ब्रह्मशब्दवाच्यः **वेदैकवेद्यः।** विश्वस्य कर्मणि षष्ठी। कर्ता, भक्तेभ्यः संप्रदाने चतुर्थी। **शुभसुखविषयं** शुभं सुखं शुभाः विषयाः भोग्याः यस्मिन् तं। मोक्षं **राति** ददाति रा दाने। इत्थम् एवंप्रकारेण। **श्रुतिशतसहितैः** श्रुतिशतेन सहितैः सत्तर्कैः समीचीनानुमानैः। **साधयित्वा। सूरिसूनुं** सुब्रह्मण्याख्यविदुषः पुत्रं त्रिविक्रमपण्डिताचार्यम्। **विजित्य** पञ्चदशसु दिवसेषु तेन सह प्रसङ्गं कृत्वा स्वशिष्यतां प्रापितवानिति भावः। तस्य शिष्यभावं प्राप्तस्य त्रिविक्रमपण्डिताचार्यस्य **व्याख्याता** तस्य भाष्यव्याख्याता। **पूर्णप्रमतिः** अनुदिनं व्याख्यया आप्याययेत् वर्धयेत् आनन्दयेत्। **ओ प्यायी वृद्धौ। लिङ्**।। २८।।

(२९)

साम्नस्त्रैविक्रमार्याद्व्यरचयदनुभाष्यं शतग्रन्थकर्ता
सोदर्यं स्वं विरक्तं यतिमकृत महासद्गुणं विष्णुतीर्थम्।
वादीन्द्रं पद्मनाभं प्रियमथ च परान् सद्गुणान् श्लाघ्यशिष्यान्
योऽनेकान् सद्गृहस्थानपि स विजयते कण्वतीर्थान्तिकस्थः।।

साम्न इति।। यो मध्वः त्रैविक्रमार्यात् त्रिविक्रमार्यसम्बन्धिनः साम्नः चतुरुपायेष्वाद्योपायात् भवत्कृतग्रन्थानामगाधत्वान्मन्दमतिभिर्न्यायानां दुर्धार्यत्वात् (दुरुद्धरत्वात्क) व्यक्तयुक्त्युपेतं ग्रन्थान्तरं कुर्विति प्रार्थनारूपात्साम्न इत्यर्थः। **अनुभाष्यम्** अनुव्याख्यानं व्यरचयत् विरचितवान्। **रच् विस्तारे (प्रतियत्ने) लङ्।** **शतग्रन्थकर्ता** शतशब्दो बहुत्वमाह। तथा च अनेकप्रकरण-दशोपनिषद्भाष्य-सूत्र भाष्य-अणुभाष्य- न्यायविवरण-गीताभाष्य-भारततात्पर्यनिर्णय-तन्त्रसार-द्वादशस्तोत्र-यमकभारतादिबहु- ग्रन्थनिर्मातेत्यर्थः। उक्तानेकग्रन्थकर्तृत्वप्रशंसापूर्वकं ग्रन्थान्तररचनाय प्रार्थीः मध्वः अनुव्याख्यानमकरोदिति भावः। **स्वं** स्वकीयं **सोदर्यं** समाने उदरे शेत इति सोदर्यः। तं स्वानुजमित्यर्थः। **समानोदर शयित ओत्रोदात्तः** (४-४-१०८) इति यत्प्रत्ययः। समानस्य सः। विरक्तं वैराग्यसंपन्नम्। महासद्गुणं महान्तः सन्तः निर्दुष्टाः गुणाः ज्ञानभक्त्यादयो यस्य तं **विष्णुतीर्थं** विष्णुतीर्थनामकम्। **यतिं** यत्याश्रमोपेतम्। **अकृत** अकरोत्। तथा वादीन्द्रं वादिश्रेष्ठम्। प्रियम् अत्यन्तप्रीतिविषयं पद्मनाभतीर्थाख्यम्। **यतिं** यत्याश्रमोपेतम्। अकृत अकरोत्। अथ समनन्तरं सद्गुणान् ज्ञानभक्त्यादिसाधुगुणान्। **च परान्** पद्मनाभतीर्थापेक्षाया पश्चात्तनान्। **श्लाघ्यशिष्यान्** यतीनकृत। बहून् सद्गृहस्थान् गृहस्थाश्रमोपेतानपि शिष्यानकृतेत्यन्वयः। **डु-कृञ् करणे लुङात्मनेपदम्।** स मध्वः **कण्वतीर्थान्तिकस्थः** कण्वतीर्थसमीपे स्थितस्सन्। **विजयते उत्कृष्टो वर्तते। जि जय उत्कर्षे लट्।।** २९।।

(३०)

संस्तव्यो वेदमानं समवितुमतनोदोषधीर्यः क्षणान्ते
दीप्ताङ्गुष्ठः शिलानीः श्रुतिविवरणकृद्वर्धितस्तम्भिताब्धिः।
अङ्गुल्या गण्डवाटावतुलबलचणौ चालने यस्य नालं
प्राग्वाटो वावटूढो मम मनसि लसेदप्यलाव्यैकलोमा।।

संस्तव्य इति।। **यः** श्रीमध्वः। **वेदमानं** भावप्रधानो निर्देशः वेदप्रामाण्यमित्यर्थः। वेदाख्यं प्रमाणमिति वा। **समवितुं** रक्षितुम्। **क्षणान्ते** अल्पकाले **ओषधीः** ओषधिविशेषान्। अतनोत् अकरोत्। **तनु विस्तारे लङ्**। अयं भावः- वेदे श्रूयते किंचिद्बीजं हस्ते निधाय **या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा** इत्यादि सूक्तं जपित्वा भूमावुप्तं चेत्सद्यः अङ्कुरपुष्पफलाद्युत्पत्तिर्भवतीति। इदानीन्तनेन तथा कृतेऽपि तन्न दृश्यत इतीदं वाक्यममानम्। तथा च तद्वत्सर्ववेदवाक्यममानमिति केनचिद्दुष्टप्रभुणोदिते तदाक्षेपमसहिष्णुः श्रीमध्वः अधिकारविशेषवतः फलिष्यतीत्युक्त्वा तद्बीजं स्वयमादाय तत्सूक्तं जपित्वा क्षणेनाङ्कुरपुष्पादीति कृतवानिति। **दीप्ताङ्गुष्ठः** दीप्तः प्रकाशमानः अङ्गुष्ठः अङ्गुष्ठरेखो (नखो) यस्य स तथा। कदाचिद्रात्रौ व्याख्यानसमये दीपे प्रशान्ते सति स्वाङ्गुष्ठनखरोचिषा शिष्यान्वाचयामासेति भावः। **शिलानीः** शिलां पाषाणं नयति प्रापयतीति स तथा। क्वचित्तुङ्गभद्रातीरे स्थापनार्थं सहस्रसंख्यैः पुरुषैरानीतां अशक्त्या मध्ये त्यक्तां बृहच्छिलां दृष्ट्वा श्रीमध्वस्तामनायासेन तुङ्गभद्रातीरं प्रापितवानिति भावः। **श्रुतिविवरणकृत्** श्रुतेः ऋक्शाखागतसूक्तविशेषस्य विवरणं व्याख्यानं करोतीति स तथा। कदाचित् सूर्यग्रहणकाले समुद्रे स्नात्वा तत्तीरे ऋक्शाखागतसूक्तविशेषं शिष्येभ्यो न्याचख्याविति भावः। **वर्धितस्तम्भिताब्धिः** वर्धितः अभिवृद्धः स्तम्भितः निश्चलीकृतः अब्धिः समुद्रो येन सः। **'पूर्वकालैके'**--- त्यादिना समासः(पा. सू. २-१-४९)। सूर्यग्रहव्याख्यानकाले तरङ्गैरुद्घोषयन्तमब्धिमपाङ्गेन दृष्ट्वा तटाकजलवन्निश्चलमकरोदिति भावः। **अतुलबलचणौ** अतुलबलेनासदृशसामर्थ्येन चणौ प्रसिद्धौ। **तेन वित्तश्चुञ्चुप्चणपा** विति चणप्रत्ययः (५-२-२६)। **गण्डवाटौ** गण्डवाटाख्यविप्रौ। यस्य श्रीमध्वस्याङ्गुल्याः अङ्गुलिमात्रस्य चालने नालं न समर्थौ धरायामङ्गुलिं निक्षिप्येयमुद्ध्रियतामिति मध्वेनोक्ते तामुद्धर्तुं कम्पनेऽपि न समर्थाविति भावः। **प्राग्वाटो** वा प्राग्वाटाख्यश्चाङ्गुलीचालनाय नालमित्यर्थः। **वटूढो** बटूढो केनचिद्बालकेन ऊढः धृतः अतिलाघवादिति भावः। **अलाव्यैकलोमा** अलाव्यं अयसाप्यच्छेद्यम् एकं लोम केशो यस्य स तथा। यःएवंविधचरितः। **संस्तव्यः** महतां स्तुतियोग्यः। श्रीमध्वः। **मम मनसि लसेत्** भातु। **लस् कान्तौ लिङ्**। उपरागे समुद्रे स्नात्वा गमनसमये तत्र स्वस्य लघिमाद्यैश्वर्यमत्यधिकशारीरबलं च प्रकाशितवानित्युत्तरार्धतात्पर्यार्थः।। ३०।।

(३१)

पारन्तीशाभिनन्दी सपदि च सरितामन्तरेऽवर्षयद्यो
ग्रीष्मे मित्रीचकाराप्यहितम थगतो वैद्यनाथं स्वभूत्यै।
छन्दःखण्डार्थवादी जितकुमतिकुलो दुर्जनेर्ष्याभ्युपेक्षी
लघ्वन्नं बृंहयेदत्यतिबहुधनिनामल्पकल्पेन तुष्येत्।।

पारन्तीति।। यः श्रीमध्वः **सपदि पारन्तीशाभिनन्दी** पारंत्याख्यदेवालयाधिपतिं हरिं अभिनन्दयतीति स तथा। चिरकालं नैवेद्यहीनं पारन्तीश्वरं दृष्ट्वा शीघ्रं सर्वसम्पत्समृद्धिं तद्देवालयेऽकरोदिति भावः। यः **सरितामन्तरे** नदीमध्ये देशविशेषे (इडेतुदे नामके) **ग्रीष्मे** ग्रीष्मकाले **अवर्षयत्** वृष्टिमजनयत्। **वृषु सेचने लङ्।** निर्जषे देशविशेषे क्षणेन तटाकजातं वृष्ट्याऽऽपूरयामासेति भावः। यः अहितं शत्रुमपि मित्रीचकार। मध्वमाहात्म्यासहिष्णुभिर्दुष्टैर्मंत्रैः प्रेरितं मध्वं हन्तुं स्वभटैः सहागच्छन्तं आयुधपाणिं शूद्रप्रभुं दृष्ट्वा श्रीमध्वः स्वस्मिन्पूज्यताबुद्धिं तस्योत्पाद्य वशीकृतवानिति भावः। अथ अनन्तरं **वैद्यनाथं** धन्वन्तर्यधिष्ठितक्षेत्रविशेषम्। **स्वभूत्यै** स्वानां स्वकीयानां भक्तानां भूत्यै सम्पदे **गतः** प्राप्तः। कर्तरि क्तः। तत्र गत्वा कृष्णामृतमहार्णवं स्वभक्तसम्पदे कृतवानिति भावः। छन्दःखण्डार्थवादी छन्दसां यः खण्डः तदर्थवादी **छन्दसां वै पष्ठेने** त्यादि, तस्यार्थं वदतीति स तथा। **जितकुमतिकुलः** जितदुर्वादिसङ्घः। कैश्चिद्विद्वद्भिः **यतित्वात्कर्मकाण्डं न जानात्ययम्, अतोऽत्रास्य पराजयः स्यादिति** दुर्बुध्या छन्दःखण्डार्थे पृष्टे तदा श्रीमध्वः तत्खण्डार्थं सम्यगुक्त्वा तान्विजित्य शिष्यहितार्थं कर्मनिर्णयाख्यं प्रकरणत्वेन लेखयामासेति। **दुर्जनेर्ष्याभ्युपेक्षी** दुर्जनानामीर्ष्यामसूयां अभ्युपेक्षत इति स तथा। दुर्जनैरसूययोच्यमानं दुर्भाषणमुदास्त इति भावः। **लघु** स्वल्पमन्नं **बृंहयेत्। बृह बृहि वृद्धौ लिङ्।** दरिद्रैर्दत्तमल्पमन्नं चतुर्गुणतया वर्धयित्वा भुङ्क्ते इति भावः। **धनिनां** धनवतां गेहेषु बहु त्रिंशत्पुरुषभोग्यमन्नं **अल्पकल्पेन** अल्पत्वेनेति यावत्। **ईषदसमासौ कल्पप्** इति कल्पप्प्रत्ययः। अत्ति भुङ्क्ते। त्रिंशन्नरैर्भोक्तव्यमन्नं एक एव भुङ्क्ते इति भावः। अद भक्षणे लोट्। सः श्रीमध्वः। **तुष्येत्** तुष्टो भवेत्। अल्पकल्पेनेत्यत्र वान्वयः। द्वित्रिकल्पमात्रेण तुष्टो भवेच्चेति। तुष तुष्टौ लिङ्।।३१।।

(३२)

वृष्ट्यादीनां नियन्तेत्यभिहितचरितः सर्वगीर्वाणरत्नै-
र्गंधर्वैर्गीयमानो द्युसदसि सकलैः कौतुकाद्गम्यमानः।
दृष्ट्वा संस्तूयमानः सुरतरुकुसुमैरार्य आकीर्यमाणो
मध्वो देदीप्यतेऽसौ जगति विजयते सत्सभामङ्गलाय।।

वृष्टीति। सर्वगीर्वाणरत्नैः सर्वदेवश्रेष्ठैः **वृष्ट्यादीनां नियन्ता** नियामकः **इत्यभिहितचरितः** स्तुतचरित्रः। **द्युसदसि** स्वर्गसभायां **गन्धर्वैः गीयमानः सकलै**र्मुनिनिकरादिभिः। **कौतुका**द्विजयमहोत्सवलौल्यात्। गम्यगानः प्राप्यमाणः। **दृष्ट्वा** प्रेक्ष्य मध्वदर्शनानन्तरं **संस्तूयमानः। सुरतरुकुसुमैः** पारिजातकुसुमैः पुष्पैः। **प्रसूनं कुसुमं सुमम्** इत्यमरः। **आकीर्यमाणः** अभिषिच्यमानः। **आर्यः** श्रेष्ठः। **असौ** मध्वः। **देदीप्यते** पुनःपुनः दीप्यते। **दीप दीप्तौ। क्रियासमभिहारे यङ्। सत्सभामङ्गलाय** सतां सभायाः मङ्गलाय। **जगति** लोके। **विजयते** उत्कृष्टो वर्तते। **जि जये,जय उत्कर्षे लट्**।। ३२।।

(३३)

दशप्रमतिविक्रमं बहुविधात्मना हेमव-
त्सुमध्वविजयाभिधं व्यधित भावदीपाह्वयम्।
प्रमेयनवमालिकां पुनरिमां च दक्षां च तां
सतां श्रवणभूषणं व्यतनुतैष नारायणः।।

।। इति श्री अणुमध्वविजयः समाप्तः।।
।। श्रीकृष्णार्पणमस्तु।।

दशप्रमतीति।। बहुविधात्मना बहुप्रकारमनसा। **भावदीपाह्वयं** भावानां प्रमेयानां दीपाह्वयं दीपाख्यम्। भावप्रकाशिकाख्यमिति यावत्। सुमध्वविजयाभिधं शोभनमध्वविजयाख्यम्। **दशप्रमतिविक्रमं** पूर्णबोधचरितोपेतम्। **हेमवत्** सुवर्णमिव। **व्यधित** कृतवान्। आचार्यचरितोपेतग्रन्थद्वयमकरोदिति भावः। पुनस्तां मध्वचरितोपेतामिमां द्वात्रिंशच्छ्लोकात्मिकाम्। दक्षां समर्थाम्। सर्वाभीष्टदोग्ध्रीम्। **प्रमेयनवमालिकां** प्रमेयनवमालिकानाम्नीं। **सतां श्रवणभूषणं** सज्जनानां कर्णभूषायिताम्। **एषः** नाराय-

णपण्डिताचार्यः। **व्यतनुत** कृतवान्। **तनु विस्तारे** लङ्।। ३३।।

यद्भ्रूजृम्भेण विश्वस्य स्थित्युत्पत्त्यादिकं भवेत्।
तस्य श्रीपद्मनाभस्य पादपद्मं समाश्रये।।

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्य-विरचितप्रमेयनवमालिकायाः "महाभाष्य" वेङ्कटभट्टकृतगूढभावप्रकाशिकाख्या व्याख्या समाप्ता।।

।। श्रीकृष्णार्पणमस्तु।।

।। श्रीः।।

।। श्रीमत्परिमलाचार्यो विजयते।।

।। श्रीमन्मूलरामो विजयते।।

श्रीराघवेन्द्रतीर्थश्रीपादविरचिता

रामचारित्र्यमञ्जरी

(श्रीलक्ष्मीनारायणाचार्यकृतव्याख्यासंवलिता)

वन्देऽहं जानकीजानिं जगज्जन्मादिदं विभुम्।
जगिच्छ्रेष्टकवाय्वादिपतिं सर्वज्ञमच्युतम्।। १।।

येन प्रकाशिता मूलरामायणकथा परा।
तं वन्देश्रीहनूमन्तं वैराग्यादिगुणार्णवम्।। २।।

रामपादाम्बुजासक्तं रामान्तिककथारतम्।
रामदासपदासक्तं राघवेन्द्रगुरुंत्र्य भजे।। ३।।

लक्ष्मीनारायणाख्योऽहं गुरुपादप्रसादतः।
विवृणोमि यथाबोधं रामचारित्र्यमञ्जरीम्।। ४।।

इह खलु संसारे क्लेशसन्तप्तानलसान् सज्जनानुद्दिधीर्षुः परमकारुणिकः श्रीराघवेन्द्रमुनिः तेषामखिलक्लेशनिवृत्तिविशिष्टपरमानन्दावाप्तये तदुपायभूतां संग्रहरामायणाद्युक्तरामायणकथां संगृह्णाति।

श्रीमान्पूर्वं प्रजातो दशरथनृपते रामनामाऽथ नीतो
विश्वामित्रेण मन्त्राहृदनुजसहितस्ताटकां घातकोऽस्त्रम्।
ब्रह्माद्यं प्राप्य हत्वा निशिचरनिकरं यज्ञपालो विमोच्या-
हल्याशापं च भङ्क्त्वा शिवधनुरुपयन्जानकीं नः प्रसीदेत्।। १।।

श्रीमानिति।। श्रीः ज्ञानादिसम्पत् अस्य अस्तीति **श्रीमान्**। श्रीः लक्ष्मीः **अस्तीति** वा। अनेन लक्ष्म्या अप्यवतारः सूचितो भवति। पूर्वं यो नारायणः **दशरथ-नृपतेः** दशरथाख्यश्चासौ नृपतिश्च तस्मात्। कौसल्यायामिति शेषः। **रामनामा राम** इति नाम यस्य स तथा। प्रजातः प्रादुर्भूतः। जनेरकर्मकत्वात् **'गत्यर्थाकर्मके'** त्यादिना कर्तरि क्तः। अथ अवतारानन्तरं **अनुजसहितः** अनुजेन लक्ष्मणेन सहितः। **विश्वामित्रेण** विश्वामित्राख्य-ऋषिणा यज्ञारक्षार्थं श्रद्धाश्रमं प्रतीति शेषः। नीतः प्रापितः मन्त्राहृत्मन्त्रं आहरति स्वीकरोतीति मन्त्राहृत्। विश्वामित्रेणेत्यत्राप्यन्वयः तदनुग्रहार्थं तदुक्तं मन्त्रं स्वीकर्तेत्यर्थः। **ताटकां** ताटकाख्यराक्षसीं। **घातकः** हतवान्। **ब्रह्माद्यं** ब्रह्मसम्बन्धि ब्रह्म। तद्देवताकम्। तदेव आद्यं यस्य आग्नेयादेस्तं ब्रह्माद्यमस्त्रं प्राप्य। **निशिचरनिकरं** निशिचराणां सुबाहुप्रभृतिराक्षसानां। निकरः समूहः तं हत्वा यज्ञपालः यज्ञरक्षकः। **अहल्याशापं** च अहल्यायाः गौतमभार्यायाः **शापं** विमोच्य मोचयित्वा **शिवधनुः** शिवस्य रुद्रस्य धनुः **भङ्क्त्वा जानकीं** जनकस्यापत्यं स्त्री जानकी तां **उपनयन्** विवाहं कुर्वन् **नः** अस्माकं **प्रसीदेत्** प्रसन्नो भवेत्। **षद्लृ विशरणगत्यवसादनेषु** लिङ् परस्मैपदं प्रथमपुरुषैकवचनम् ।।

अनेन पूर्वं क्षीरसमुद्रशायी नारायणः रावणादिराक्षसपीडितब्रह्मादिदेवैः भूभार-हरणार्थं प्रार्थितः तान् शाखामृगादिभावेनोत्पद्यध्वमित्यनुज्ञाप्य पुत्रार्थिना दशरथेन इष्टः कौसल्यायां प्रादुर्भूतः। सुमित्रायां लक्ष्मणशत्रुघ्नौ जातौ। कैकेय्यां भरतो जातः। एते चत्वारः कुमाराः दशरथस्य गृहेऽभ्यवर्धन्त। तदा विश्वमित्रो रामावतारं श्रुत्वा दशर-थगृहं प्राप्तवान्। अनन्तरं रामः दशरथेनानुज्ञातः सलक्ष्मणो विश्वामित्रेण नीयमानः मार्गे तदुक्तं कामितार्थप्रदबलातिबलानामकमन्त्रद्वयं स्वीकृत्य सिद्धाश्रमसमीपे विद्य-मानां लोकोपद्रवकारिणीं ताटकां हत्वा सिद्धाश्रमं प्राप्य विश्वामित्रोक्तमन्त्रजातं गृहीत्वा विश्वामित्रयज्ञसमये तद्विघातार्थं प्राप्तदैत्यान् हत्वा यज्ञं समाप्य विश्वामित्रोक्त-सीतास्वयंवरं श्रुत्वा विदेहदेशं प्रति गमनसमये मार्गस्थगौतमाश्रमे इन्द्रकृतधर्षणाप-राधनिमित्तेन पत्या गौतमेन शप्तां शिलीकृतां स्वदर्शनेन मानुषतां प्राप्तां पत्या संयोज्य विदेहनगरं गत्वा राजादिभिः कृतां पूजां स्वीकृत्य सीतास्वयंवरार्थमिन्द्रं प्रति तपः कृत्वा जनकेन नीतं **य इदं धनुः पूरयेत् तस्मै कन्यां प्रदास्यामीति** प्रतिज्ञापितं धनु-र्लीलया पूरयित्वा सीतादत्तमालां कण्ठे गृहीत्वा अयोध्यायाः स्वपित्रादीनाहूय विवाह-मकरोदित्यादिकथा सूचिता ।। १।।

आयन् रामस्सभार्योऽध्वनि निजसहजैर्भार्गवेष्वासरोपा-
त्तद्गं हत्वा सुरारिं पुरग उत नुतस्तापसैर्भूपपृष्टैः।
कल्याणानन्तधर्मोऽगुणलवरहितःप्राणिनामन्तरात्मे-
त्याद्युक्तश्चाभिषेके पुरजनमहितो मह्यतां मे वचोभिः।। २।।

आयन्निति।। **सभार्यः** भार्यया सीतया सहितः सभार्यः। **निजसहजैः** निजाश्च तेसहजाश्च तैः लक्ष्मणादिभ्रातृभिः सहेति शेषः। **रामः आयन्** गच्छन्। अयोध्यां प्रतीती शेषः। **अध्वनि** मार्गे। **भार्गवेष्वासरोपात्** भृगोरपत्यं भार्गवः परशुरामः तस्य इष्वासः धनुः **'कोदण्डकार्मुकम् इष्वासोप्यथे'** त्यमरः तस्य रोपात् पूराणात् तद्गं तस्मिन् पराशुरामे स्थितं **सुरारिं** सुराणां इंद्रादीनां अरिं शत्रुं तपोमयाख्यमहासुरं **हत्वा पुरगः** अयोध्यां गतः। **उत** अनन्तरं अभिषेके राज्याभिषेकविषये भूपपृष्टैः भूपेन दशरथेन राज्याभिषेकविषये 'रामो युष्माकं सम्मतः किम्' इत्युक्तैः तापसैर्वसिष्ठादिभिः **नुतः** स्तुतः। स्तुतिप्रकारमेवाह-**कल्याणेति**। न विद्यते अन्तो येषां ते अनन्ताः कल्याणाः निर्दोषाः धर्माः यस्य स तथोक्तः समासान्तविधेरनित्यत्वाद्वा उपपदस्य केवलत्वाभावाद्वा धर्मशब्दस्य **'धर्मादनिच्केवला'** दित्यनिच् न भवति। **अगुणलवरहितः** गुणविरुद्धाः अगुणाः दोषाः तेषां लवो लेशः तेन रहितः दोषलेशोऽपि तस्मिन्नास्तीति अर्थः। प्राणिनां सर्वजीवानां अन्तरात्मा अन्तर्नियामक इत्यादिवचनैरुक्तः। पुरजनमहितः अयोध्यायां विद्यमानजनैः पूजितः। मे मम वचोभिः मह्यतां पूज्यताम्। मह पूजायां कर्मणि लोडात्मनेपदम्।।

भावः। अनेन रामः सीतास्वयंवरानन्तरं अयोध्यां प्रति गमनसमये स्वस्य नारायणत्वस्थापनाय **इदं धनुरागृह्य विकर्षसि त्वं तदा साक्षान्नारायणोऽसि** इत्युक्तः परशुरामेण दत्तं धनुः पूरयित्वा चतुर्मुखवरात्परशुरामस्थितं तेन बहुर्निष्कासितम् असुरं हत्वा अयोध्यां गत्वा सर्वैः स्तुत इत्यादि कथा सूचिता ।। २।।

कैकेयीप्रीतिहेतोस्ससहजनृपजो वल्कली यानरण्यं
गङ्गातारी गुहार्च्यः कृतरुचिरजटो गीष्पतेः पुत्रमान्यः।
तीर्त्वा कृष्णां प्रयातोऽवतु निजममलं चित्रकूटं प्रपन्नं
स्वाम्बाभिर्भ्रातरं तं श्रुतजनकगतिस्सान्त्वयन्व्युप्ततीर्थः।। ३।।

कैकेयीति।। कैकेय्याः दशरथभार्यायाः भरतमातुः **प्रीतिहेतोः** प्रीत्यर्थं। **ससहजनृपजः** सहजो लक्ष्मणः नृपजा सीता ताभ्यां सहितः तथा रामः। **वल्कली** वल्कल-

मस्यास्तीति वल्कली, वल्कं वल्कलमस्त्रियां इत्यमरः। चीरधारी। **अरण्यं** वनं **यान्** गच्छन्। **गङ्गातारी** गङ्गां तरतीति गङ्गातारी। तदनु **गुहार्च्यः** गुहेन प्लवतारकेण अर्च्यः पूज्यः। **कृतरुचिरजटः** कृता रुचिरा मनोहरा जटा येन सः। तथा **गीष्पतेः** बृहस्पतेः। **पुत्रमान्यः** पुत्रेण भरद्वाजेन मान्यः पूजितः। पुत्रशब्दस्य **नित्यसापेक्षत्वात्समासः।** **कृष्णां** यमुनां। **तीर्त्वा** उल्लङ्घ्य। **निजं** स्वकीयं। **अमलं** निर्मलं। **चित्रकूटं** चित्रकूटाख्यपर्वतम्। **प्रयातः** प्राप्तः। **स्वाम्बाभिः** मातृभिः सहेति शेषः। **तं** चित्रकूटपर्वतं **प्रपन्नं** प्राप्तम्। **तं** रामं **प्रपन्नं** शरणं गतमिति वा। **निजममल**मित्यत्र वाऽन्वयः। **भ्रातरं** भरतम्। **सान्त्वयन्** लालयन्। **श्रुतजनकगतिः** श्रुता जनकस्य पितुः गतिर्येन स तथोक्तः। दशरथमृतिं श्रुतवानित्यर्थः। **व्युप्ततीर्थः** व्युप्तं पितुरुद्देशेन दत्तं **पितृदानं निवापःस्या** दित्युक्तेः तीर्थं जलं तेन (यस्य)स तथोक्तः। **निपानागमयोसीस्तीर्थमृषिजुष्टं जले गुरा**वित्यपरः। पितृतर्पणादिकं कृतवानित्यर्थः। **अवतु** रक्षतु। **मामिति** शेषः। निजमित्यस्यात्राप्यन्वयः तद्भक्तमित्यर्थः। **अव रक्षणे लोट् परस्मैपदं प्रथमपुरुषैकवचनम्।।**

अनेन रामस्य राज्याभिषेके, मन्थरया बोधितया कैकेय्या पतिदत्तवरद्वयबलाद्रामः चतुर्दशवर्षाणि वने वसतु। मत्सुतो भरतो राज्यमवेदिति विच्छिन्ने सति, रामः रावणसंहारादिसत्कार्यसिद्धये मातापितृभ्यामनुज्ञातः सहगतान् पित्रादीन् (पित्रादिसर्वजनान्) सजनाननुज्ञाप्य लक्ष्मणसीतासहितः गङ्गां तीर्त्वा वटक्षीरेण जटां धृत्वा गुहादिना कृतां पूजां स्वीकृत्य चित्रकूटं सुखेन स्थितवान्। रामवियोगदुःखाद्दशरथे मृते वसिष्ठादिभिः कैकेय्यादेशात् (कैकेय्यदेशात्) आकारितो भरतः शत्रुघ्नेन सहितः अयोध्यां प्राप्य सर्वं श्रुत्वा पितृकार्यं कृत्वा रामवनवासक्लेशेन तन्निवृत्तये रामं द्रष्टुं मात्रादिसर्वजनैस्सह राममार्गेणैव चित्रकूटं प्राप्य रामं शरणं प्राप्तवानित्यादि कथा सूचिता।। ३।।

दत्वाऽस्मै पादुके स्वे क्षितिभरणकृतौ प्रेष्य तं काकनेत्रं
व्यस्याराध्योऽत्रिनाम्ना वनमथ समितो दण्डकं तापसेष्टम्।
कुर्वन्हत्वा विराधं खलकुलदमनं याचितस्तापसाग्रै।
स्तेषां दत्वाऽभयं स्वानसिधनुरिषुधीन्यानगस्त्यात्स पायात्।। ४।।

दत्वेति। **सः** रामः, **क्षितिभरणकृतौ** क्षितेः भूमेः भरणं तस्य कृतौ करणविषये **स्वे** स्वकीये। **पादुके** पादपीठे, **अस्मै** भरताय दत्वा तं भरतं प्रेष्य अनुज्ञाप्य **काकनेत्रं** काकस्य नेत्रं नेत्रस्थं, काकस्य नेत्रं वासस्थानं यस्येति वा स्थातं (असुरं) **व्यस्य** निरस्य **अथ** चित्रकूटवासानन्तरं **अत्रिनाम्ना** अत्रिनामकऋषिणा। **आराध्यः** पूजितः।

दण्डकं दण्डकारण्यं वनम्। समितः प्राप्तः। **तापसेष्टं** तापसस्य शरभङ्गनामकऋषेः इष्टं स्वपदप्राप्तिलक्षणाभीष्टम्। **कुर्वन्विराधं** विराधनामकराक्षसं **हत्वा खलकुलदमनं** खलानां दुष्टानां रावणादिदैत्यानां कुलं समूहः तस्य निग्रहं, **तापसाग्रैः** तापसश्रेष्ठैः याचितः, तेषां तापसानां **अभयं दत्वा स्वान्** स्वकीयान् **असिधनुरिषुधीन्** असिः खड्गः धनुः शार्ङ्गम्, इषुधिः तूणीरः **तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः** इत्यमरः। असिश्च धनुश्च इषुधिश्च तान् **अगस्त्यात् यान्** प्राप्नुवन्। **पातु** रक्षतु। **पा रक्षणे लोट् परस्मैपदं प्रथमपुरुषैकवचनम्।।**

अनेन भरतेन राज्यरक्षार्थं पुनः पुनः प्रार्थितोऽपि रामः **चतुर्दशवर्षानन्तरं अयोध्यां प्रविशामि** इत्युक्त्वा राज्यरक्षार्थं पादुके दत्त्वा तमनुज्ञाप्य तत्रावस्थानसमये तुरङ्गनामकासुराविष्ट इन्द्रसुतो जयन्तः वायसरूपी सीतास्तने तुण्डेन क्षतं व्यधात्। तदा तृणेन तदाविष्टमसुरं नेत्रेण सह हत्वा इन्द्रसुतमनुज्ञाप्य चित्रकूटात् अत्रेराश्रमं प्राप्य तत्कृतपूजां स्वीकृत्य दण्डकवनं प्राप्य तत्राग्निप्रवेशेन स्वलोकं जिगमिषुणा जीर्णाङ्गेन शरभङ्गेन प्रार्थितस्तदभीष्टं कृत्वा वित्तेश्वरेण ऊर्वशीसङ्गदोषाच्छप्तं तुम्बुरु-नामधेयं स्वभक्तं भक्षार्थं तदंसकमितोऽपि सहानुजेन तं मोचयित्वा **अनुज्ञाप्य तद्देहं बिले स्थापयित्वा** (स्थित्वा) रावणादिहननार्थं तत्रत्यऋषिभिः प्रार्थितो, रामार्थमेवेन्द्र-णागस्त्याय दत्तं धनुरादिकं गृहीतवानित्यादि कथा सूचिता ।। ४।।

आसीनः पञ्चवट्यामकुरुत विकृतां राक्षसीं यो द्विसप्त-
क्रव्यादानप्यनेकानथ खरमवधीद्दूषणं च त्रिशीर्षम्।
मारीचं मार्गरूपं दशवदनहृतामाकृतिं भूमिजाया
अन्विष्यन्नार्तगृध्रं स्वगतिमथ नयन्मामवेत् घ्नन्कबन्धम्।। ५।।

आसीन इति। **यः** रामः **पञ्चवट्यां** पञ्चवटीनामकपुण्यभूमौ। **आसीनः** स्थितः। **राक्षसीं** शूर्पणखाम्। **विकृतां** विकृताकाराम्। विकर्णनासाम् **अकुरुत** अकरोत्। डुकृञ् करणे लङात्मनेपदम्। अनन्तरं **द्विसप्तक्रव्यादान्**। क्रव्यं मांसं अदन्ति भक्षय-न्तीति क्रव्यादाः **मांसं पललं क्रव्यमामिष** मित्यमरोक्तेः। द्विसप्तसङ्ख्यायुक्ताश्च ते क्रव्यादाश्च, तान्।द्विसप्तेति पदान्तरं वा। **अनेकानपि** चतुर्दशसङ्ख्याकप्रधानराक्षसापे-क्षया चतुर्दशसङ्ख्याकानन्सान्बहूनपि राक्षसान्। **खरं** खरनामकराक्षसम्। **दूषणं** दूष-णनामकं राक्षसम्। त्रिशीर्षं त्रीणि शीर्षणि यस्य स तथोक्तस्तं, त्रिशिरोनामकराक्षसञ्च,**अवधीत्** हतवान् । हन हिंसागत्योः लुङि वधादेशः। **मार्गरूपं** मृगस्येदं मार्गं, मार्गं रूपं यस्य स तथा तम्। चित्रसारङ्गरूपं, **मारीचं** मारीचनामकरा-

क्षसम्। अवधीदित्यत्राप्यन्वयः। दश वदनानि यस्य स दशवदनः रावणः,**तेन हृताम्** आहृतां, **भूमिजायाः** सीतायाः, **आकृतिं** प्रतिकृतिं, **अन्विष्यन्** मार्गयन्, **अथ** अनन्तरं, **आर्तगृध्रं** आर्तः श्रान्तः स चासौ गृध्रश्च तं, जटायुम्। **स्वगतिं** स्वस्य गतिं पदप्राप्तिं, **नयन्** प्रापयन्, **कबन्धं** कबन्धनामकराक्षसञ्च घ्नन् संहरन् **मामवेत्**। अव रक्षणे लिङ् परस्मैपदम्।।

अनेन पञ्चवट्यां स्थितो रामः तदा रावणानुजां शूर्पणखाख्यां दशाननेन प्रामादिकेन विधिना पत्यौ हते सति रावणाज्ञया स्नुकूलपतिं निर्मार्गमाणान् खरदूषणायोर्छलेन राममुपेत्य **त्वं मे पति र्भवेत्युक्त**वर्ती लक्ष्मणेन विकर्णनासां कारयित्वा तर्गेरितान् सबलान् खरदूषणादीन् हत्वाशूर्पणखाप्रेरितेन रावणेन प्रार्थितं मरीचं चित्रसारङ्गरूपं सीतासमीपेविचरन्तं दूरे हत्वा तदा स्वापहारार्थं आगतं रावणं दृष्टा कौलासपर्वतं जिगमिषत्यासीतया निर्मितां प्रतिकृतिं रावणापहृतां विचरन् सीतापहारिरावणात्युद्धेन शान्तं गृध्रं स्वपदं नीत्वा सुरेन्द्रभृत्ये दनुनामकं गन्धर्वं कबन्धदेहाद्विमोचितवान् इत्यादि कथा सूचिता।। ५।।

पम्पातीरं स गच्छन्निह कृतवसतिर्भक्तितुष्टः शवर्यै
दत्वा मुक्तिं प्रकुर्वन्हनुमत उदितं प्राप्तसुग्रीवसख्यम्।
सप्त च्छित्वाऽथ तालान्विधिवरबलिनो वालिभित्सूर्यसूनु
कुर्वाणो राज्यपालं समवतु निवसन्माल्यवत्कन्दरेऽसौ।। ६।।

पम्पातीरमिति। असौ रामःपम्पातीरं पम्पायाः पुण्यनद्या तीरं गच्छन् इह पम्पातीरे कृतवसतिः कृता वसतिः वासो येन स ततोक्तः भक्तितुष्टः भक्त्या संतुष्टः शबर्यै शबरीनामकस्वभक्तायै मुक्तिं स्वपदप्राप्तिरूपां दत्वा हनुमत उदितं वचनं भावे निष्ठा कुर्वन् प्राप्तसुग्रीवसख्यः प्राप्तं सुग्रीवस्य सख्यं येनेति वा प्राप्तःसुग्रीवस्य सख्यमिति वा स तथा। अस्मिन्पक्षे प्राप्तापन्ने चेति तत्पुरुषसमासः। अथ अनन्तरं विधिवरबलिनः विधेश्चतुर्मुखस्य वरेण बलिनः अच्छेघान् सप्तसंख्याकान् तालान् तालवृक्षस्वरूपान् दैत्यान् छित्वा वालिभित् वालिनं भिनत्तीति वालिभित् वालिहन्ता। सुर्यसुनुं सुर्यस्य सुनुं सुतं राज्यपालं किष्किन्धाख्यराज्यपालं कुर्वाणः कुर्वन् माल्यवत्कन्दरे माल्यवतः तन्नामकपर्वतस्य कन्दरेप्रदेशविशेषे दरी तु कन्दरो वास्त्री त्यमरः। निवसन् वासं कुर्वन् समवतु (रक्षतामितिशेषः)।।

अनेन रामः पम्पातीरं मतङ्गस्याश्रमे इन्द्रसमीपे कृतातिदर्पहेतोः शच्या शप्तायै अप्सरस्त्रियैऽग्निप्रवेशेन स्वपदमिच्छस्यै तथा कृत्वा प्रदेशान्तरं गत्वा ऋष्यमूकपर्वते

हनूमन्तं दृष्ट्वा कोऽसीति स्वेनोक्ते हनूमता उक्तं अहं सुग्रीवसख्य:(स्वं) वायुनन्दनस्त्वत्सेवक इत्यादि वचनं श्रुत्वा हनुमदुक्तप्रकारेण अग्निसमीपे सुग्रीवेण सीतान्वेषणादिकार्ये प्रतिज्ञं कारयित्वा स्वयंवालिहननादिकार्ये प्रतिज्ञां कृत्वा वालिहननादौ बलपरीक्षार्थं सुग्रीवेण प्रार्थितः वालिना पत्राण्यपि छेत्तुमशक्यत्वात् ब्रह्मत्वं प्राप्तुं तपः कुर्वाणान् विषमान् वृक्षरूपान् दैत्यान् एकेनेषुणा छित्वा वालिनं हत्वा सुग्रीवं किष्किन्धापतिं कृत्वा वर्षाकालं दृष्ट्वा माल्यवत्कन्दरे न्यवसदित्यादि कथा सुचिता।। ६।।

नीत्वा मासान् कपीशानिह दशहरितः प्रेष्य सीतां विचित्याऽऽ-
यात श्रीमद्धनूमद्गिरमथ समनुश्रुत्य गच्छन्कपीन्द्रैः।
सुग्रीवाद्यैरसंख्यैर्दशमुखसहजं मानयन्नब्धिवाचा
दैत्यघ्नस्सेतुकारी रिपुपुररुदवेद्वानरैर्वैरिघाती।। ७।।

नीत्वेति। असौ रामः इह माल्यवत्कन्दरे मासान्नीत्वा कपीशान् कपिश्रेष्ठान्। दशदिशः प्रति प्रेष्य अनुज्ञाप्य सीतां विचित्य विचार्य आयातश्रीमद्धनूमद्गिरं श्रीरस्यास्तीति श्रीमान् स चासौ हनूमांश्च श्रीमद्धनूमान्। आयातः आगतश्चासौ श्रीमद्धनूमांश्च स तथा तस्य गिरं वचनं समनुश्रुत्य सम्यक् श्रुत्वा अथ अनन्तरं सुग्रीवाद्यैः सुग्रीव आद्यो येषां ते तैःअसङ्ख्यैः न विद्यते सङ्ख्या येषां ते तैः अपरिमितैः कपीन्द्रैः कपिश्रेष्ठैः सहित इति शेषः। गच्छन् दक्षिणां दिशमिति शेषः। दशमुखसहजं दश मुखानि यस्य सः रावणः तस्य सहजं भ्रातरं विभीषणं मानयन्संमानयन् अब्धिवाचा अब्धेः समुद्रस्य वाचा वचनेन दैत्यघ्नः दैत्यान्हन्तीति दैत्यघ्नः। सेतुकारी सेतुं करोतीति सेतुकारी। रिपोः रावणस्य पुरं लङ्कां रुणद्धि आवृणोतीति रिपुपुररुत्। वानरैः कपिभिः वैरिघाती वैरीन् शत्रून् घातयतीति वैरिघाती। अवेत् रक्षेत् मामिति शेषः।

अनेन रामः माल्यवत्कन्दरे चतुरो मासान्नीत्वा लक्ष्मणेनाहूतेन सुग्रीवेण नानादिक्षु विदिक्षु स्थितान् कपीनाहूय सर्वदिक्षु सीता विमृग्यतामिति प्रेष्य स्वाज्ञया स्वांगुलीयकमादाय कपीन्द्रैरङ्गदादिभिः सह दक्षिणां दिशं गत्वा महेन्द्रपर्वतं प्राप्य तांस्तत्र सस्थाप्य समुद्रमुल्लङ्घ्य लङ्कां प्राप्य तत्र वने अशोकमूले विद्यमानां सीताकृतिं दृष्ट्वा तस्मै अङ्गुलीयकं दत्त्वा ततः चूडामणिं संगृह्य तां नत्वा वनं विशकलय्य अक्षपूर्वकान् राक्षसान् हत्वा स्वपुच्छवह्निना लङ्कां दग्ध्वा रत्नाकरं तीर्त्वा महेन्द्रपर्वतं प्राप्य कपीन्द्रान्नन्दयित्वा तैस्सह स्वपादाम्बुजं प्राप्य चूडामणिं दत्तवतो हनुमतो वचनं श्रुत्वा कपीन्द्रैस्सह दक्षिणसमुद्रतीरं प्राप्य रामपक्षपतीति रावणेन त्यक्तं विभीषणं परिगृह्य अब्ध्यभिमानिवरुणकृतपूजां स्वीकृत्य तद्वचनेन समुद्रस्थानाभीरजन्मनो

दैत्यान् संहरन् वानरैस्सेतुं कारयित्वा तन्मार्गेण गत्वा लङ्कां प्रायुध्य वानरैः राक्षसानघातयदित्यादि कथा सूचिता।। ७।।

भग्नं कृत्वा दशास्यं गुरुतरवपुषं कुम्भकर्णं निगृह्य
प्रध्वस्ताशेषनागं पदकमलनतं तार्क्ष्यमानन्द्य रामः।
सर्वानुज्जीवयन्तं गिरिधरमनघश्चाञ्जनेयं कपीन्स्वान्
विज्ञानास्त्रेण रक्षन् समवतु दमयंल्लक्ष्मणाच्छक्रशत्रुम्।। ८।।

भग्नमिति।। रामः दशास्यं दश आस्यानि मुखानि यस्य तं रावणम्। भग्नं पराजितं कृत्वा गुरुतरवपुषं गुरुतरम् अतिबृहत् वपुः शरीरं यस्य तं कुम्भकर्णम्। निहत्य हत्वा। प्रध्वस्ताशेषनागं प्रध्वस्ताः नाशिताः अशेषाः समस्ताः नागाः येन स तथा तम्। पदकमलनतं पदे कमले इव पदकमले उपमितं व्याघ्रादिभिः इति समासः तयोर्नतं प्रह्वीभूतं तार्क्ष्यं गरुडम् आनन्द्य सन्तोष्य सर्वान् समस्तान् कपीन् उज्जीवयन्तं जीवयन्तं गिरिधरं गिरिं गन्धमादनपर्वतं धरतीति धरः तम् आञ्जनेयं च अञ्जनाया अपत्यं पुमान् आञ्जनेयो हनूमान् तं च आनन्द्य, अनघः न विद्यते अघः पापं तदुपलक्षितबन्धनादिकं यस्य रामस्य सः निर्दुष्टः। स्वान् स्वकीयान् कपीन् वानरान् विज्ञानास्त्रेण रक्षन् पालयन् लक्ष्मणात् शक्रशत्रुं शक्रस्य इन्द्रस्य शत्रुम् इन्द्रजितं दमयन् संहरन् समवतु रक्षतु।।

अनेन रामः रावणभटैः कपीनां युद्धसमये युद्धार्थं स्वसमीपं प्राप्तं रावणं पराजितं कृत्वा रावणं प्रति जीवनाशां त्यक्त्वा सकलभोगान् भुंक्त्वा पुनः युद्धार्थमायाहि इत्युक्त्वा तं प्रेष्य रावणेन प्रबोधितं बहुकालं सुप्तोत्थितं युद्धार्थं स्वसमीपं प्राप्तं कुम्भकर्णं हत्वा रावणप्रेषितेन्द्रजिता नागपाशैस्त्रिवारं बद्धान् कपीन् प्रथमतो गरुडेन मोचयित्वा अनन्तरं हनुमतानीतगन्धमादनपर्वतस्यौषधैः मोचयित्वा पश्चात्स्वयमेव विज्ञानास्त्रेण मोचयित्वा लक्ष्मणेन रावणकुमारमिन्द्रजितमघातयदितिकथा सुचिता।। ८।।

क्रव्यादान्घ्नन्नसंख्यानपि दशवदनं ब्रह्मपूर्वैस्सुरेशैः
पुष्पैराकीर्यमाणो हुतवहविमलामाप्य सीतां विधाय।
रक्षोनाथं स्वभक्तं स्वपुरमथगतः पुष्पकस्थस्समस्तैः
साम्राज्ये चाभिषिक्तो निजजनमखिलं मानयन्मे गतिस्स्यात्।। ९।।

क्रव्यादानिति। असङ्ख्यान् अपरिमितान् कव्यादान् क्रव्यं मांसम् अदन्तीति

क्रव्यदाः तान् घ्नन् संहरन् दशवदनमपि रावणमपि न्घन् ब्रह्मपूर्वैः ब्रह्म चतुर्मुखः पूर्वो **येषां** तैः सुरेशैः सुरश्रेष्ठैःइन्द्रादिभिः पुष्पैराकीर्यमाणः अभिषिच्यमानः हुतवहविमलां हुतवहे आग्नौ विमलां निर्मलां हुतवहेनेति वा सीतामाप्य प्राप्यीस्वभक्तं भक्तं विभीषणम् रक्षोनाथं रक्षसां नाथं स्वामिनं लङ्काधिनाथमिति यावत्। विधाय कृत्वा अथ अनन्तरं समस्तैः स्वीकयैः सर्वैः सहेति शेषः। पुष्पकस्थः पुष्पकाक्यविमानख्य स्वपुरं स्वस्य पुरम् अयोध्यां प्राप्तः। साम्राज्ये अभिषिक्तश्च अखिलं निजजनं मानयन् मे गतिः प्राप्त सर्वाभीष्टप्रदो वा स्यात् भवेत्। **अस् भुवि लिङ् परस्मैपदम्।।**

अनेन रामः इन्द्रजिद्धननानन्तरं रावणप्रेषितं तन्मूलबलं सर्वं हत्वा रावणं च हत्वा रावणवधेन सन्तुष्टैः ब्रह्मादिभिः पुष्पैः अभिषिच्यमानः अशोकमूले स्थितां सीताप्रतिमाहूय तस्याः पतिव्रतं स्थापनाय अग्नौ प्रक्षिप्य तां प्रतिकृतिं नाशयित्वा तदा कैलासादागतां अग्निना समर्पितां सीतामाप्य विभीषणं लङ्काधिपतिं कृत्वा सर्वैस्सह पुष्पकस्थः अयोध्यां प्राप्य वसिष्ठादिभिः सर्वैस्साम्राज्ये अभिषिक्तः सर्वजनान् आनन्दयन् सीतया साकं सुखेन स्थितवान् इति कथा सूचिता ।। ९।।

रक्षन्क्षोणीं समृद्धां नुत उत मुनिभिर्मानयन्वायुसूनुं
प्रेष्यादित्यात्मजादीन्व्यतनुत भरतं यौवराज्येऽनुमान्य।
कार्ये सौमित्रिमार्तश्चगदितकृदरिघ्नोत शत्रुघ्नतो यो
हत्वासौ दुष्टशूद्रं द्विजसुतगुबवेत्कुम्भजान्मालभारी।। १०।।

रक्षन्निति।। यः रामः समृद्धां सकलकामैः पूर्णं क्षोणीं पृथ्वीं रक्षन् पालयन् उत अनन्तरं मुनिभिः अगस्त्यादिभिः मुनिभिः नुतः स्तुतः वायुसूनुं वायोः सूनुं कुमारं हनुमन्तं मानयन् सम्मानयन् आदित्यात्मजादीन् आदित्यस्य आत्मजः कुमारः सुग्रीवः स एव आदिः येषां ते तान्। प्रेष्य अनुज्ञाप्य यौवराज्ये युवराजत्वे भरतं व्यतनुत अकरोत्। तनु विस्तारे लङत्मनेपदम्। कार्ये पौरजानपदस्यरक्षणादिकार्ये सौमित्रिः सुमित्रायाः अपत्यं पुमान् सौमित्रिः लक्ष्मणः तमनुमान्य अनुज्ञाप्य आर्तश्चागदितकृत् आर्तः दुःखितश्चासारमेयः तेन गदितं उक्तं करोतीति स तथा। अथ अनन्तरं शत्रुघ्नतः शत्रुघ्नात् अरिं शत्रुं लवणासुरं हन्तीति अरिघ्नः असौ रामः दुष्टशूद्रं दुष्टश्चासौ शूद्रश्च तं हत्वा द्विजसुतगुप् द्विजस्य ब्राह्मणस्य सुतं गोपायतीति स तथा कुंभजात् अगस्त्यात् मालभारी मालां बिभर्तीति मालभारी। **इष्टकेषीकामालानां चिततूलभारीषु** इति ह्रस्वता। अवेत् रक्षेत्।

अनेन रामः साम्राज्याभिषेकानन्तरं सर्वसंपत्समृद्धां पृथ्वीं रक्षन् अगस्त्यादिभिस्स्तुतः हनुमते स्वकण्ठमालां दत्वा तमालिङ्ग्य सुग्रावादीन् स्वस्वराज्यरक्षार्थं प्रेष्य यौवराज्ये भरतं कृत्वा पुरजनपदरक्षणादिविषये सौमित्रिमनुज्ञाप्य भिक्षुदण्डता- डितशुना भिक्षुशिक्षार्थं प्रार्थितः तद्वचनेन कालाञ्जराख्यदेवालयाधिपत्यं दत्वा लवणा- सुरपीडितैश्च्यवनादिमुनिभिः प्रार्थितो मधुनामकदैत्यसुतं मधुवनस्थं लवणनामकमसुरं शत्रुघ्नेन घातयित्वा रुद्ररदेच्छया तपः कुर्वाणं **अधः शिरः मूर्धा घ्रिम्बमानं जंघ**नामकासुररूपं शम्बूकनामकं शूद्रं हत्वा तत्कृताधर्मेण मृतं द्विजकुमारं जीवयित्वा अन्ननयज्ञकृता श्वेतनामकराज्ञा स्वस्य क्षुन्निवृत्यर्थं चतुर्मुखयोगेन रामाय देहीत्युक्त्वा अगस्त्याय दत्तां मालां अगस्त्याश्रमं प्राप्य तस्माद्गृहीतवानित्यादि कथा सूचिता।। १०।।

यज्ञं तन्वंस्त्रिकोटीन्व्यतुदत भरताद्योऽसुरानीशवाक्या-
द्यास्यन्धामात्रिपुत्रं भुजिमथ स नयन्नात्मसूनू स्वराज्ये।
कृत्वा श्रीह्रीहनूमद्धृतविमलचलच्चामरच्छत्रशोभी
ब्रह्माद्यैः स्तूयमानो निजपुरविलसत्पादपद्मोऽवतान्माम्।। ११।।

यज्ञमिति। यः रामः यज्ञम् अश्वमेधाख्ययज्ञं तन्वन् कुर्वन् त्रिकोटीन् तिस्रः कोट्यः कोटिसंख्या येषां ते तान् असुरान् भरतात् व्यतुदत अवधूत्। **तुद व्यथने लङात्मनेपदम्।** ईशवाक्यात् ईशस्य रुद्रस्य वाक्यात् वचनात् धाम श्वेतद्वीपं यास्यन् गमिष्यन् अथ अनन्तरं अत्रिपुत्रं अत्रिनामकऋषेः पुत्रं दूर्वाससं भुजिं भुक्तिं नयन् प्रापयन् आत्मसूनू आत्मनः स्वस्य सूनू कुमारौ स्वराज्ये स्वराज्यपरिपालनादिकार्यं कृत्वा श्रीह्रीहनूमद्धृतविमलचलच्चामर छत्रशोभी श्रीश्च ह्रीश्च हनूमांश्च तैः धृतानि विमलानि चलती च ते चामरे च छत्रं च तानि तैः शोभी प्रकाशमानः। ब्रह्माद्यैः ब्रह्मा चतुर्मुख आद्यः येषां तैः स्तूयमानः निजपुरविलसत्पादपद्मः निजे स्वकीये पुरे श्वेतद्वीपे विलसती पादपद्मे यस्य स तथोक्तः। सः रामः मामवतात्। अव रक्षणे लोट् परस्मैपदम्।

अनेन रामः कदाचित्सुग्रीवादिकपीन् नानादेशस्य सर्वभूपांश्च आहूय सर्वसंपत्समृद्धम् अश्वमेधयज्ञं संवत्सरपर्यन्तं कृत्वा सर्वान् सन्तोष्य केकयदेशाधिपतिप्रेषितगिरसेनोक्तान् शैलूषाख्यगन्धर्वपुत्रान् त्रिकोटिसंख्याकान् लोकबाधकान् असुरान् श्रुत्वा भरतं गन्धर्वनगरं प्रेष्य तान् घातयित्वा स्वपालितं भूलोकं ब्रह्मलोकाभं दृष्ट्वा आत्मसद्मविशोषार्थं देवैः प्रार्थितेन रुद्रेण स्वधामगमनार्थं प्रार्थितः तमनुज्ञाप्य तदानीमागतं दूर्वाससं क्षुधितं मां सद्योजातेनान्नेन भोजयेदिति वदन्तं स्वपाणिपल्लवाच्चतुर्विधं षड्-

सोपेतम् अन्नं सृष्ट्वा तं भोजयित्वा तेन स्तुतः तमनुज्ञाप्य स्वस्मात् सीतायां जातौ इन्द्रहुताशनौ कुशलवाख्यौ पुत्रौ क्रमात् साम्राज्ये यौवराज्ये(च) अभिषिच्य अयोध्यातः तदुत्तरदिशं गच्छन् श्रीरिति ह्रीरिति रूपद्वयधारिण्या सीतया पक्षद्वये वीजितचामरद्वयेन हनूमद्धृतच्छत्रेण च प्रकाशमानः ब्रह्मादिभिः स्तूयमानः श्वेतद्वीपं प्राप्य सीतया साकं सुखेन स्थितवानित्यादि कथा सूचिता ।।११।।

इति श्रीरामचारित्र्यमञ्जरी लेशतः कृता।
राघवेन्द्रेण यतिना भूयाद्रामप्रसाददा।। १२।।

एवं समापितग्रन्थो राघवेन्द्रमुनिः स्वकृतग्रन्थस्य नाम कुर्वन् तस्यापि मूलत्वेन अत्युपादेयत्वज्ञापनाय स्वनाम कीर्तन् स्वकीयानां तत्साध्यफलमाशास्ते--इतीति। इतिशब्दः प्राकारवाची एवं प्रकारेण राघवेन्द्रेण यतिना लेशतः संक्षेपतः कृता श्रीरामस्य चरित्राणि कर्माणि तेषां मञ्जरीव मञ्जरी तत्प्रतिपादिकेति यावत्। रामप्रसाददा रामस्य प्रसादं ददातीति सा तथा। भूयात् आशीर्लिङि। एतद्ग्रन्थस्य वक्तृणां च रामः प्रसन्नः सर्वाभीष्टप्रदो भवतु इत्यर्थः।।१२।।

यत्प्रसादात्सम्पदस्स्युर्ब्रह्मादीनां श्रियोऽपि च।
तस्मै नमो भगवते जानकीजानये सदा।।
लक्ष्मीनारायणाख्येन गुरुपादप्रसादतः।
कृतेयं मञ्जरीमाला रामः प्रीणातु मे तथा।।

इति श्रीमद्राघवेन्द्रतीर्थगुरुपादविरचितश्रीरामचारित्रमञ्जरी
श्रीलक्ष्मीनारायणाचार्यविरचितव्याख्यासमलङ्कृता
समाप्ता

।। श्रीकृष्णार्पणमस्तु।।

।। श्रीः ।।

जगद्गुरुश्रीराघवेन्द्रगुरुसार्वभौमविरचिता

कृष्णाचारित्र्यमञ्जरी

विद्वत्कुलललामश्रीलक्ष्मीनारायणाचार्यविरचितव्याख्यासमलङ्कृता

कृष्णं कृत्स्नजगज्जन्मकर्तारं विभुमच्युतम्।
रुक्मिणीसत्यभामाभ्यामाश्लिष्टं प्रणमाम्यहम्।। १।।

उपास्य यत्पदं धीराः लभन्ते ज्ञानसम्पदम्।
तं वन्दे श्रीमदानन्दतीर्थार्यगुरुशेखरम्।। २।।

अस्मद्देशिकपादा ये साधवस्सततं मम।
दृशं दिशन्तु सन्मार्गगामिनीं मुक्तिदायिनीम्।। ३।।

पदवाक्यप्रमाणज्ञान् सर्वशास्त्रविशारदान्।
राघवेन्द्रगुरून्वन्दे वादिकण्ठीरवान्मम ।। ४।।

लक्ष्मीनारायणाख्योऽहं गुरुपादप्रसादतः।
विवृणोमि यथाबोधं कृष्णचारित्र्यमञ्जरीम्।। ५।।

कर्तृकर्मक्रियादीनां यथायोगं प्रकाशये।
अन्वयं बालबोधाय बुध्यन्तां तं विवेकिनः।। ६।।

इह खलु संसारक्लेशसन्तप्तानलसान् सज्जनानुद्दिधीर्षुः परमकारुणिको राघवेन्द्रमुनिः, तेषामखिलक्लेशनिवृत्तिविशिष्टपरमानन्दावाप्तये तदुपायभूतां भागवतप्रतिपाद्यां श्रीकृष्णकथां झटिति बोधाय सङ्गृह्णाति **विष्णुरिति**।।

विष्णुर्ब्रह्मादिदेवैः क्षितिभरहरणे प्रार्थितः प्रादुरासी-
द्देवक्यां नन्दनन्दी शिशुवधविहितां पूतनां यो जघान।
उत्थानौत्सुक्यकाले रथचरणगतं चासुरं पादघातै-
श्चक्रावर्तञ्च मात्रा गुरुरिति निहितो भूतले सोऽवतान्माम्।। १।।

विष्णुस्सर्वत्र व्याप्तो नारायणः, **गतिश्च सर्वभूतानां प्रजानां चापि भारत। व्याप्ते मे रोदसी पार्थ! कान्तिश्चाभ्यधिका मम।। अधिभूतनिविष्टश्च तदिच्छुश्चास्मि भारत। क्रमणाच्चाप्यहं पार्थ! विष्णुरित्यभिसंज्ञितः।।** इति मोक्षधर्मवचनोक्तदिशा विष्णुशब्दस्यानेकार्थत्वं ज्ञातव्यम्। **ब्रह्मादिदेवैः** ब्रह्मा चतुर्मुख आदिर्येषान्ते ब्रह्मादयः। ते च ते देवाश्च तैः। **क्षितिभरहरणे** क्षितेः भूमेः, भरो भारस्तद्धरणे तत्संहारविषये। तद्धारभूतकंस-शिशुपाल-दन्तवक्त्र- जरासन्धादि दुष्टनिग्रहार्थमिति यावत्। **भृञ् भरण** इति ऋकारान्ताद् भौवादिकाद्धातोर्भावे घञ्, आत्मनेपदित्वेन **ऋदोरप्** इत्यप्प्रत्यये **सार्वधातुकार्धधातुकयो** रिति गुणे भर इति रूपसिद्धेः। तथैव सप्तमस्थ द्वितीयपादे--- **सनीवन्तर्ध........** इत्यादि(पा.सू.७-२-४९) सूत्रे वृत्तिमञ्जर्योरुक्तेः। एवमुत्तरत्र **स्तनभरनमिता** इत्यत्र निर्वाहो द्रष्टव्यः। **प्रार्थितः** याचितः, देवक्यां देवकस्यापत्यं स्त्री देवकी, तस्याम्। वसुदेवादिति शेषः। **प्रादुरासीत्** प्रादुर्बभूव। अस भुवि। प्रादुरित्युपसर्गसंज्ञकमव्ययम्। **प्रकाशे प्रादुराविस्स्या** दित्यव्ययवर्गे पाठात्। वैय्याकरणैरुपसर्गवशाद्धातूनामनेकार्थत्वाङ्गीकारात्। लङ् परस्मैपदम्। **यः**, आविर्भूतः कृष्णः। **नन्दनन्दी**-नन्दं नन्दगोपं नन्दयति हर्षयतीति स तथा। **शिशुवधविहितां**-शिशूनां बालानां। वधाय विहितामाज्ञप्ताम्। कंसेनेति शेषः। **पूतनां** पूतनाख्यां राक्षसीम्। **जघान** अवधीत्। **हन हिंसागत्योर्लिट्** परस्मैपदम्। **उत्थानौत्सुक्यकाले**-उत्थानं देवदर्शनार्थं बहिर्निष्क्रमणाख्यं कर्म, तत्सम्बन्धि यदौत्सुक्यं कदा उत्थानं भविष्यति कदा द्रक्ष्याम इत्येवमन्तःकरणगतोऽनुरागविशेषः। तत्काले यदा चतुर्मासपर्याप्तवयस्कोऽभूत्, तदा तस्य बहिस्समीपदेशं प्रति प्रापणरूपं निष्क्रमणाख्यं कर्मासीत्। तस्मिन्दिने तस्य जन्मनक्षत्रं, तन्निमित्तमहोत्सवश्चासीत्। तस्मिन्समय इत्यर्थः। उक्तञ्च भागवते तथा **भारततात्पर्यनिर्णये** च--- **यदाप देवश्चतुरस्समासान् तदोपनिष्क्रामणमस्य चासीत्** इत्यादि। **रथचरणगतं**-रथचरणं चक्रं-- **चक्रं रथाङ्गं तस्यान्ते नेमिस्त्री स्यात्प्रधिः पुमा** नित्यमरः। तस्मिन् गतं स्थितम्, असुरं च शकटाक्षनामकदैत्यं च **पादघातैः** पादयोः प्रहारैः जघानेत्यन्वयः। मात्रा यशोदया, **गुरुरिति** वोढुमशक्य इति, **भूतले** भूम्यां निहितः, चक्रावर्तं च चक्रवदावर्तत इति चक्रावर्तः, तं मण्डलाकारवायुस्वरूपं तृणावर्तनामकदैत्यं, जघानेति पूर्वेणान्वयः। **सः** कृष्णः मामवतात् रक्षतु। **अव-रक्षणे** आशिषि लोट् परस्मैपदम्।।

अनेन पूर्वं समुद्रशायी श्रीमन्नारायणः ब्रह्मादिदेवैः सकलदुष्टनिग्रहार्थमर्थितः, तस्मादुत्थाप्य तैस्सह मेरुं प्राप्य, चतुर्मुखं प्रति यत्र त्वयोक्तोऽस्मि तत्र प्रादुर्भविष्यामी-

त्युक्त्वा, तेन चतुर्मुखेन अहं पुरा वरुणायामृतस्रवाः गाः प्रादाम्। ताः तत्पिता कश्यपस्स्वपत्न्या अदित्या सुरत्या च प्रचोदितः, अपाहरत्। तदपराधेन क्षत्रेषु गोजीवनको भवेति मया शप्तः कश्यपः भूमौ यदुकुले बहुगोधनाढ्यः वसुदेव इति ख्यातः शूरनामकाद्राज्ञः प्रजातः। तस्यैव भार्या अदितिश्च देवकीति बभूव। अन्या सुरतिस्तु रोहिणी बभूव। तौ देवकीवसुदेवौ त्वामेव सुतमिच्छन्तौ त्वदीयं तपस्तेपतुः। तथा यो द्रोणनामा वसुः सः भार्यया धरया सह त्वत्पितृत्वं प्राप्तुं तपश्चकार। तस्मै स वरः मया दत्तः। स च शूराद्वैश्यकन्यायां गोकुले नन्दाख्यो जातः। तस्य भार्या यशोदेति जाता। अतस्त्वं प्रथमं देवकीवसुदेवयोस्तव स्वरूपं प्रदर्श्य ततः नन्दगोपगृहं व्रज इत्युक्तः, तं प्रति तथेति चोक्त्वा तान् देवान् विप्रक्षत्रादिभावेन भूतले उत्पद्यध्वमित्यनुज्ञाप्य स्वयं देवक्यां वसुदेवाज्ज्ञातः। ततः पूर्वं रोहिण्यां वसुदेवाच्छेषो बलराम इति जातः। देवास्तत्र तत्राजायन्त। अनन्तरं स्वाज्ञया कंसाद्भीतेन शौरिणा नन्दगोपगृहं प्राप्तः, पुत्रोत्सवादिना (महोत्सवादिना) नन्दादीनतोषयत्। तदा देवकीप्रसवं श्रुत्वा कंसः वसुदेवगृहं प्राप्य देवक्याशशयने स्थितां तत्समय एव नन्दगोपगृहे जातां वसुदेवेनानीतां शिशुरूपां दुर्गां दृष्ट्वा, तद्धननार्थमुद्युक्तस्तयाऽऽक्षिप्तः **तव शत्रुर्यत्र क्वच जात** इत्युक्तः, पश्चात्तापात्सभार्यं वसुदेवं प्रसाद्य, स्वगृहं प्राप्य, मन्त्रिभिरालोच्य, जातमात्रान् कुमारान्निहन्तुं स्वजनानादिशत्। तदा शिशुहननार्थं चारयन्तीं स्वस्वरूपमाच्छाद्य शुभरूपधरां नन्दगृहं प्राप्तां कंसधात्रीं पूतनां स्वहननार्थं विषोल्बणं स्तनं पाययन्तीमसुभिस्सह स्तनं पीत्वा तां हत्वा, तद्देहस्थां ताटकां नरकं नीत्वा, तुम्बुरुसङ्गदोषेण वित्तेश्वरशप्तां तत्संप्रविष्टां स्वभुक्तस्तनेन पूतामूर्वशीं तद्देहान्मोचयित्वा स्वर्गं प्रति प्रेष्य, कदाचिदौत्थानमहोत्सवे वादित्रगीतमन्त्रवाचनपूर्वकं मात्रा यशोदया कृताभिषेचनं प्राप्य शकटस्याधश्शायितस्स्तनार्थी रुदन् बन्धुजनपूजादौ व्यासक्तया यशोदया अज्ञातः पादाभ्यां चक्रं पातयित्वा, तद्गतं स्वहननार्थमुद्युक्तं शकटाक्षनामकदैत्यं हत्वा, कदाचिल्लालयन्त्याः स्वमातुर्यशोदाया अङ्कस्थः, तया वोढुमशक्यः भूमौ निहितः, तदा स्वहननार्थमागतं कंसभृत्यं चक्रवातरूपं रेणुभिश्चक्षूंषि मुष्णन्तं तृणावर्तनामकदैत्यं तेनान्तरिक्षमुन्नीतस्तं कण्ठे गृहीत्वा लीलया शिलातले निपात्य हत्वा, सर्वानतोषयदित्यादि कथा सूचिता।। १।।

यो मातुर्जृम्भमाणो जगदिदमखिलं दर्शयन्नङ्करूढो
गर्गेणाचीर्णनामाकृतरुचिरमहाबाललीलो वयस्यैः।
गोपीगेहेषु भाण्डस्थितमुरुदयया क्षीरदध्यादि मुष्णन्
मृत्राभक्षीति मातुः स्ववदनजगद्भासयन्भासतां मे।। २।।

।। **यो मातु रिति**।। यः कृष्णः मातुः यशोदायाः, **अङ्करूढः- अङ्कः-** उत्सङ्गः, 'उत्सङ्गचिह्नयोरङ्क' इत्यमरोक्तेः। तस्मिन् रूढः स्थितः, **जृम्भमाणः** मुखं व्याददानः। **इदं** प्रत्यक्षादिप्रमाणसिद्धम्। **अखिलं** सप्तद्वीप-सप्तसमुद्र-पञ्चमहाभूत-स्थावर- जङ्गमाद्युपेतं **जगत्** भूमण्डलं, **दर्शयन्** प्रकाशयन्, मातुरित्यत्राप्यन्वेति। **गर्गेण** गर्गाचार्येण। **आचीर्णनामा** आचीर्णं कृतं नाम यस्य स तथा। बलरामेण सहेति शेषः। **कृतरुचिरमहाबाललील**:-कृताः रुचिराः मनोहराः महत्यः बाललीलाः बालक्रीडाः येन स तथोक्तः। **वयस्यैः** समानवयस्कैर्बालकैः। सहेति शेषः। **गोपीगेहेषु**-गोपीनां गोपस्त्रीणां गेहेषु गृहेषु। **भाण्डस्थितं**-भाण्डेषु पात्रेषु 'सर्वमावपनं भाण्डं पात्रामत्रे च भाजन' मित्यमरोक्तेः। स्थितं विद्यमानं, **क्षीरदध्यादिक्षीरं** च दधि च क्षीरदधिनी, ते आदिनी यस्य नवनीतादेस्तत्तथा। **उरुदयया**-उर्वी च सा दया च तया, गोपस्त्रीष्विति शेषः। मुष्णन् अपहरन्। **मृत्** मृत्तिका। 'मृन्मृत्तिका प्रशस्तात्वि' त्यमरोक्तेः। **नाभक्षि** न भक्षिता मयेति शेषः। 'भक्ष अदन' इत्यस्माद्धातोः कर्मणि लुङि अभक्षीति रूपम्, तेन नञोऽन्वयः। इति एवं वदन्, मातुः यशोदायाः, **स्ववदनजगत्**-स्वस्य वदने विद्यमानं जगत् भुवनम्। भासयन् दर्शयन्, य इति श्रवणात्स इति लभ्यते। सः कृष्णः, **मे** मम, **भासतां** सर्वविषयकज्ञानप्रदो भवेत्। 'भास-दीप्तौ' लोडात्मनेपदम्।।

अनेन श्रीकृष्णः, कदाचित् स्वमातुरङ्कस्थः स्तनं पीत्वा जृम्भमाणः स्वं (मुखं) लालयन्त्याः यशोदायाः, स्वविषयकतत्त्वज्ञानोदयार्थं सर्वं जगद्दर्शयित्वा वसुदेवोक्त्या व्रजं प्राप्तेन गर्गेण क्षत्रिययोग्यान् संस्कारान् नाम च बलरामेण सह प्राप्य, बलरामेण सह वयोनुसारेण क्वनु (क्वचित्) जानुभ्यां सह पाणिभ्यां रिङ्खणम्, क्वचित्पादयुगलमनुकृष्य अभिसर्पणम्, कदाचिद्वत्सपुच्छावलम्बनेन इतस्ततः सञ्चरणमित्यादिव्यापारैः मात्रादीन् सन्तोष्य, कदाचिद्बालकैस्सह गोपीगेहेषु गत्वा कोपरहितानामनुग्रहाय, कोपयुक्तानां स्वयोग्यतातिरेकेण कृतशुभानि निहन्तुं नानाविधोपायैः, क्षीरदध्यादि चौर्येण गृहीत्वा, स्वस्य लोकसाधारण्येन शिशुभावं कुर्वत्या मातुः,स्वविषयकतत्त्वज्ञानोदयार्थं वयस्यानां पुरतः मृदं भक्षयित्वा, तैर्बोधितया मात्रा कस्मात्त्वं मृदं भक्षितवानिति निर्भर्त्सितः, 'नाहं भक्षितवानम्ब! मृद' मित्युक्त्वा स्वमुखं व्यादाय, तस्मिन् साद्रिद्वीपाब्धिभूगोलं सर्वं दर्शयित्वा, मातुः स्वविषयक-तत्त्वज्ञानं दत्वा (प्रदाय?) तामतोषयदित्यादिकथा सूचिता।। २।।

दध्नोऽमत्रस्य भङ्गादुपगमितरुषानन्दपत्न्याऽथ बद्धः
कृच्छ्रेणोलूखले यो धनपतितनयौ मोचयामास शापात्।
नन्दाद्यैः प्राप्य वृन्दावनमिह रमयन्वेणुनादादिभिर्यो
वत्सान्पान्वत्सरूपं क्रतुभुगरिमथो पोथयन्सोऽवतान्माम्।। ३।।

।। **दध्न इति**।। **यः** कृष्णः, **दध्नोऽमत्रस्य**-दधिपूरितपात्रस्य, **भङ्गात्**-भेदनात्, **उपगमितरुषा**-उपगमिता प्रापिता रुट् कोपः यस्याः 'कोपक्रोधामर्षरोषप्रतिघा रुट् क्रुधौ स्त्रिया' मित्यमरोक्तेः, तया **नन्दपत्न्या** नन्दस्य पत्न्या भार्यया यशोदया। **अथ**-अनन्तरं, उलूखले व्रीहितण्डुलाद्यवहननसाधनदारुपात्रे। **कृच्छ्रेण**-आयासेन **बद्धः** दाम्ना सन्दितः। **धनपतितनयौ**-धनपतिः कुबेरः, तस्य तनयौ पुत्रौ। शापात्, **मोचयामास** मोचितवान्। 'मुच्लृ मोक्षणे' इत्यस्माण्णिजन्ताद्धातोर्लिट्, तस्मिन्परतः **'कास्प्रत्ययात्-आममन्त्रे लिटि'** इति आम् प्रत्यये कृते 'आम' इति लेर्लुकि, **'कृञ्चानुप्रयुज्यते लिटी'** ति अस्तेर्लिङन्तस्यानुप्रयोगे मोचयामासेति रूपम्। अनुप्रयोगवचनसामर्थ्यादस्तेर्भूरिति भूभावो नेति ज्ञेयम्। **नन्दाद्यैः-** नन्द आद्यो येषान्त उपनन्दादीनां ते, तैः, सहेति शेषः। वृन्दावनं वृन्दावनाख्यं प्रदेशान्तरं, **प्राप्य**-गत्वा, **इह**-वृन्दावने **वेणुनादादिभिः**-वेणोर्नादः शब्दविशेषः स आदिर्येषां व्यापाराणां तैः, **रमयन्**-क्रीडां कुर्वन्। **अथ**-अनन्तरम्। **वत्सान् पान्**-रक्षन्, वत्सरूपम्, वत्सस्य रूपमिव रूपं यस्य स तथा तम्। **क्रतुभुगरिं** क्रतुभुजो देवाः, 'बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः' इत्यमरोक्तेः। **तेषामरिं**-शत्रुं, असुरम्। **पोथयन्**-ताडयन्, मरणं प्रापयन्निति वा। 'पुथि हिंसासंक्लेशनयो' रित्यस्माद्भ्वादिकाण्णिजन्तात् शतृप्रत्यये पोथयन्निति रूपम्। **सः** कृष्णः, **मामवतात्** रक्षतु। 'अव-रक्षणे' लोट् परस्मैपदम्।

अनेन कृष्णः कदाचित् दधिमथनं कुर्वत्याः स्वचरित्राणि गायन्त्याः मातुः, अङ्करूढः स्तनं पिबन् अतृप्तप्रायः, अधिश्रितमुत्सिच्यमानं पयः निधातुं जनन्या जवेनोत्सृष्टः, कोपेन दधिमथनभाजनमश्मना भित्त्वा चन्द्रसन्निभं नवनीतं समादाय रहो गत्वा उलूखलाङ्घ्रेरुपरि स्थितः मार्जारान् भक्षयित्वा, स्वयञ्च भक्षयन्, अधिश्रितं पय अधो निधाय भग्नं दध्यमत्रकं विलोक्य स्वसुतस्येदं चरित्रमिति निश्चित्य स्वसमीपं प्राप्तामात्तयष्टिं जननीं दृष्ट्वा, उलूखलाङ्घ्रेरवप्लुत्य भीतवद्धावन् मात्रा अन्वीयमानः तस्याः श्रमं दृष्ट्वा, स्वस्य भक्तवश्यतां प्रदर्शयन् तद्धस्तं प्राप्तः, स्वकृतापराधेन मात्रा एकेन दाम्ना उलूखले बध्यमानः, तेन दाम्ना अपूर्णतां प्राप्य, तया पुनः पुनरानीतैर्दामसञ्चयैरपि द्व्यङ्गुलद्व्यङ्गलैरपूर्णतां यातः, सकलबन्धविमुक्तस्य स्वस्य बन्धायोग्यत्वं प्रदर्श्य, पुनः पुत्रस्य मातृवश्यतां प्रदर्शयन् स्विन्नगात्र्या बहुश्रमयुक्तया स्वमात्रा एकव-

त्सपाशेन उलूखले बद्धः, उलूखलं विकर्षन् यमलार्जुनवृक्षयोर्मध्ये प्रविश्य तत्र तेनोलूखलेन तौ वृक्षावुन्मूल्य, नारदेन स्वसमीपे युवतिभिस्सह कैलासोपवने गङ्गायां विवस्त्रतया क्रीडापराधनिमित्तेन शप्तौ कुबेरपुत्रौ नलकूबरमणिग्रीवाख्यौ शापान्मोचयित्वा, ताभ्यां स्तुतः, तौ स्वगृहं प्रेष्य, स्वयञ्च नन्दगोपेन दाम्नो मोचितः, सर्वान् सन्तोष्य वृन्दावनं यियासुः सन् बृहद्वने वृकान्बले व्याघ्रसमान् सृष्ट्वा तैः पीडितैरुपनन्देन बोधितैर्नन्दादिभिः सकलकामपूर्णं वृन्दावनं प्राप्य, तत्र बलरामेण वेणुनादादिबालव्यापारैः क्रीडन्, वयोनुसारेण बालैस्सह वत्सान् चारयन्, क्वचिद्यमुनातीरे स्वहननार्थमागतं वत्सरूपधरं वत्सासुरनामकं कंसभृत्यम्, अपरपादाभ्यां सहलाङ्गूलं गृहीत्वा पातयित्वा कपित्थाग्रे निरस्याधः पातयित्वा तं हत्वा देवैः पुष्पैरभिषिच्यमानः सर्वानतोषयदित्यादिकथा सूचिता।। ३।।

रक्षन्वत्सान्वयस्यैर्बकमभिनदथो तिग्मतुण्डे गृहीत्वा
प्रीतिं कर्तुं सखीनां खरमपि बलतो घातयन्कालियाहिम्।
उन्मथ्योद्वास्य कृष्णामतिविमलजलां यो व्यधाद्दाववह्निं
सुप्तानावृत्य गोष्ठे स्थितमपिबदसौ दुष्टवृक्षच्छिदव्यात्।। ४।।

।। **रक्षन्निति**।। **यः** कृष्णः। **अथो**-अनन्तरं, **वयस्यैः**-समानवयस्कैर्बालकैः सहेति शेषः। **वत्सान् रक्षन्**-पालयन्। **तिग्मतुण्डे** तिग्मं तीक्ष्णं 'तिग्मं तीक्ष्णं खर' मित्यमरोक्तेः, तुण्डं वदनं, 'वक्त्रास्ये वदनं तुण्ड' मित्यमरोक्तेः। तिग्मे च ते तुण्डे च तिग्मतुण्डे, 'तुण्डद्वयं यदुपतिः करपल्लवाभ्यां सङ्गृह्य चाशु विददार च पक्षिदैत्यम्' इति भारततात्पर्यनिर्णयोक्तेः। 'तमापतन्तं स निगृह्य तुण्डयोर्दोर्भ्यां बकं कंससखं सतांगति' रिति भागवतोक्तेश्च। **गृहीत्वा** हस्ताभ्यामिति शेषः। **बकं** बकरूपधरम्। 'अथ बकः कंह्वः पुष्कराह्वस्तु सारस' इत्यमरोक्तेः। बकाख्यासुरम्। **अभिनत्**-अदारयत्। 'भिदिर्विदारणे' लङ् परस्मैपदम्। **सखीनां**-श्रीदामप्रभृतिसकल- गोपालानां **प्रीतिं-हर्षं कर्तुम्। बलतः**-बलरामात्। **खरमपि** गर्दभस्वरूपं धेनुकाख्यासुरमपि **घातयन्**-संहरन्। **कालियाहिं** कालियनामकसर्पं, **उन्मथ्य-**मथित्वा, **उद्वास्य-**निष्कास्य यमुनाया इतिशेषः। **कृष्णां-**यमुनां, **अतिविमलजलां-**अत्यन्तं विमलं निर्मलं जलं यस्याः तां **व्यधात्-**अकरोत्। 'डुधाञ् धारणपोषणयोः' कर्तरि लुङ् परस्मैपदम्। **गोष्ठे-**गवामावासस्थाने। 'गोष्ठं गोस्थानक' मित्यभिधानात्। **सुप्तान्**-निद्रां प्राप्तान्। **आवृत्य-**परितः व्याप्य स्थितम्। **दाववह्निं**-वनवह्निम्। 'दवदावौ वनारण्यवह्नी' इत्यमरोक्तेः, **अपिबत्**-पानं कृतवान्। 'पा पाने' लङ् परस्मैपदम्। **दुष्टवृक्षच्छित्**- दुष्ट-

श्चासौ वृक्षश्च तं वृक्षरूपं दैत्यं छिनत्तीति स तथा। **असौ**-कृष्णः,अव्यात् रक्षेत्। मामिति शेषः। 'अव रक्षणे' लिङ् परस्मैपदम्।।

अनेन कृष्णः कदाचिद्वयस्यैस्सह वत्सांश्चारयन् यमुनातीरं गत्वा जलं पाययित्वा तत्र स्वहननार्थं प्राप्तं स्कन्दप्रसादकवचं कंसभृत्यं बकपक्षिरूपं स्वभक्षणार्थं मुखं व्याददानं तन्मुखे प्रविश्य तत्कण्ठं दग्ध्वा तेन पुनश्छर्दितः तुण्डं गृहीत्वा विदार्य तं हत्वा, वयोऽनुसारेण बलरामेण वयस्यैश्च सह तत्र तत्र वनेषु गाश्चारयन् गर्दभस्वरूपधेनुकासुररक्षितवनस्थतालफलभक्षणार्थं श्रीदामप्रभृतिभिः प्रार्थितः, तद्वनं गत्वा फलानि भक्षयित्वा, बलरामकम्पिततालफलपतनशब्दं श्रुत्वा कोपेनाऽऽगत्य बलरामताडनार्थमुद्युक्तं, विघ्नेशवरादन्यैरवध्यं धेनुकं बलरामेण घातयित्वा, कदाचिद्यमुनातीरे गाश्चारयन्, यमुनायाः प्रवेशविषये विद्यमानं कालियसर्पविषेण दूषितं जलं पीत्वा मूर्छितान् पशून् वयस्यांश्च दृष्ट्वा, अमृतवर्षिण्या स्वदृष्ट्या तान् जीवयित्वा, तन्निमित्तं विचार्य तत्रत्यकदम्बवृक्षमधिरुह्य सार्पह्रदे उत्प्लुत्य, तत्र विद्यमानं कालियाहिं पादाभ्यां मथित्वा, जीवनार्थं सभार्येण तेन प्रार्थितः, तत्कृतपूजां स्वीकृत्य तेन स्तुतः सभार्यं सपरिवारं तं रमणकद्वीपं प्रति प्रेष्य निर्विषजलां यमुनां कृत्वा, तीरं प्राप्य गोपादिभिः स्तूयमानः, गोकुले उत्पातान् दृष्ट्वा स्वदर्शनार्थं प्राप्तान् मात्रादिसर्वजनान् गोपालांश्च सन्तोष्य, तैस्सह तां रात्रिं तत्र निवसन्, सुप्तानावृत्य दहन्तमुद्धतबलमग्निं पीत्वा, प्रातः तैस्सह गोकुलं प्राप्य सर्वान् सन्तोषयन्, कदाचिद्विषवृक्षस्वरूपात् ब्रह्मणो वरादन्यैरवध्यादुग्राख्यासुराद्रोगपीडितान् स्वजनान् दृष्ट्वा तं वृक्षं तदाकारतत्परिवारवृक्षांश्च उन्मूल्य दग्ध्वा, स्वकीयान् नीरोगान् कृत्वा, सर्वानतोषयदित्यादिकथा सूचिता।। ४।।

दुर्गारण्यप्रवेशाच्च्युतनिजसरणीन्गोगणानाह्वयद्यो
दावाग्निं तत्र पीत्वा समपुषदनुगान्गोपकानाविषण्णान्।
गोभिर्गोपैः परीतः सरिदुदकतटस्थोपले भोज्यमन्नं
भुक्त्वा वेणोर्निनादाद्व्रजगतवनिताचित्तहारी समाऽव्यात्।। ५।।

।। **दुर्गारण्ये ति**।। **यः**- कृष्णः, **दुर्गारण्यप्रवेशात्** दुर्गं गन्तुमशक्यं, अरण्यं-वनं, तस्मिन्, प्रवेशात्-गमनात्। **च्युतनिजसरणीन्**-च्युता मुक्ता निजा स्वकीया सरणिः पन्थाः यैः, 'सरणिः पद्धतिः पद्या वर्त्मन्येकपदीति चे' त्यभिधानात्। तान्, **गोगणान्**-गवां गणान्-समुदायान्, **आह्वयत्**-आहूतवान्। 'ह्वेञ् स्पर्धायां शब्दे च' लङ् परस्मैपदम्। **तत्र** अरण्ये, तस्मिन्समय इति वा। **दावाग्निं**-वनवह्निं पीत्वा **अनुगान्**-सहगान्, **आविषण्णान्**-सम्यग्भीतान्, तान्, **गोपकान्**-गोपालान्,

समपुषत्-सम्यग्रक्षितवान्। 'पुष पुष्टौ' लुङ् परस्मैपदम्। **गोभिः**-धेनुभिः, **गोपैः**-गोपालैः, **परीतः**-अन्वितः, **सरिदुदकतटस्थोपले** सरितः- यमुनायाः, उदकं-जलं, तस्य तटं-तीरं, तस्मिन् तिष्ठतीति तटस्थः, उपलः-पाषाणः, 'पाषाणप्रस्तरग्रावोपलाश्मानश्शिलादृष' दित्यमरोक्तेः। **भोज्यं**-भोक्तुं योग्यं, तत्, **अन्नं**-दध्योदनं, **भुक्त्वा** भोजनं कृत्वा, वेणोः **निनादात्**-शब्दात्। 'शब्दे निनादनिनद' इत्यभिधानात्। **व्रजगतवनिताचित्तहारी।** व्रजे गोकुले विद्यमानवनितानां स्त्रीणां चित्तं मनः हरति अपहरतीति स तथा। **सः**-कृष्णः, **मा**-मां, **अव्यात्**-रक्षेत्। 'अव रक्षणे' लिङ् परस्मैपदम्।।

अनेन कृष्णः कदाचिद्बलरामादिगोपालैस्सह दुर्गारण्ये तत्र तत्र वनेषु गाश्चारयन्, तृणभक्षणाकाङ्क्षयातिगहनमुञ्जाटव्यां प्रविष्टान् गोपालैरज्ञातान्, दावाग्निनाऽऽवृतान् स्वस्वमार्गाज्ञानेनाक्रन्दतः गवादिसकलपशुगणान् तत्तन्नाम्नाऽऽहूय गवादिपशूनां प्रतिनादं श्रुत्वा, गोपालैस्सह तत्र गत्वा, दावाग्निं पीत्वा, सर्वान् रक्षित्वा, पुनः स्वस्थानं प्राप्य, कदाचिद्गोभिर्गोपालैश्च सह तत्र तत्र सञ्चरन्, यमुनाजलसमीप एव विद्यमानशिलायां स्वगृहादानीतदध्यन्नं बलरामादिभिस्सह भुक्त्वा, कदाचिद्बलरामादिभिस्सह मनोहरं कुसुमितवनं प्रविश्य, स्मरोदयानुकूलवेणुनादं कुर्वन्, तच्छ्रुत्वा स्मरवशेन विक्षिप्तमनोयुक्तगोपस्त्रीभिर्वर्णितचरित्रः तदा स्वमुखोद्गीर्णवेणुनादस्वरात् श्रोतॄन् सर्वानतोषयदित्यादिकथा सूचिता।। ५।।

कृष्णोऽस्माकं पतिः स्यादिति कृततपसां मज्जने गोपिकानां
नग्नानां वस्त्रदाता द्विजवरवनिताऽऽनीतमन्नं समश्नन्।
श्रान्तैर्गोपैस्समं यो बलमथनबलावाहतेऽस्मिन्सवृष्टौ
प्रोद्धृत्याहार्यवर्यं निजजनमखिलं पालयन्पात्वसौ माम्।। ६।।

।। **कृष्णोऽस्माकमिति**।। **यः**-कृष्णः, **अस्माकं**-नः, **पतिः**-भर्ता, **स्यात्**-भवेत्, **इति**-एवं सङ्कल्प्य, **कृततपसां**-कृतं तपः याभिस्तासां, **मज्जने**- स्नानकाले, **नग्नानां**-वस्त्ररहितानां, **गोपिकानां**-व्रजकुमारिकाणां, अत्र स्त्रीणां भृत्यभूतत्वेन सम्प्रदानत्वाभावाच्चतुर्थी न। **वस्त्रदाता**-वस्त्राणां-वाससां, दाता-प्रदाता।

ननु दातृशब्दस्य तृजन्तत्वे कर्तरि चेति षष्ठीसमासनिषेधः; अतः कथं वस्त्रदातेति समास इति चेदुच्यते। तृजन्तत्वेऽपि 'जनिकर्तुः' इति सूत्रे मञ्जर्यादौ 'कर्तरि चे'ति निषेधस्यानित्यत्वोक्तेः, 'इदमस्थमुः' इत्यत्र 'उकारेण इकोचिविभक्ता' वित्यत्र अज् ग्रहणेनैव नञा निर्दिष्टस्य अनित्यत्वोक्तेर्वा 'याजकादिभ्यश्चे' ति वा षष्ठी समासः, तेन कर्तरि चेति निषेधो न। तृन्नन्तत्वे च श्रितादिषु 'गम्यादीनामुपसंख्यानं' इत्युक्तेः वस्त्राणि दातेति द्वितीयासमासः।।

द्विजवरवनिताऽऽनीतं-द्विजवराः-ब्राह्मणश्रेष्ठाः, तेषां वनिताः स्त्रियः, ताभिरानीतं अन्नं, **श्रान्तैः**-क्षुत्पीडितैः, **गोपैः**-गोपालकैः, **समं**-साकं, **समश्नन्**-सम्यग्भोजनं कुर्वन्। **बलमथनबलौ** बलं-बलनामकदैत्यं मथ्नातीति बलमथनः-इन्द्रः 'बलारातिशशचीपति' रित्यभिधानात्। तस्य बलौ-भागधेये। 'भागधेयः करो बलि' रित्यमरोक्तेः। **आहृते**-अपहृते सति, स्वेनेति शेषः, **अस्मिन्** इन्द्रे, **सवृष्टौ**-वृष्ट्या सहितः सवृष्टिः, तस्मिन्, वर्षति सतीतियावत्। **अहार्यवर्यं**-पर्वतश्रेष्ठं, 'अहार्यधरपर्वता' वित्यमरोक्तेः। प्रोद्धृत्य समुद्धृत्य (सम्यगुद्धृत्य), **अखिलं**-सर्वं, **निजजनं**-स्वकीयजनं **पालयन्**-रक्षन् **असौ**-कृष्णः, **मां पातु**-रक्षतु।। 'पा रक्षणे', लोट् परस्मैपदम्।।

अनेन कृष्णः स्वपतित्वहेतोः कात्यायन्यर्चनादिभिः तपोनुष्ठात्रीणां, स्ववासांसि तीरे निधाय यमुनायां मज्जनं कुर्वतीनां कुमारिकाणामभीष्टफलदानाय वयस्यैस्सह तत्र गत्वा तानि वासांस्युपादाय नीपवृक्षमारुह्य ताभिः प्रार्थितः, नानाविधोपहासपूर्वकं तासां वासांसि दत्वा, ता अनुज्ञाप्य, कदाचिद्वयस्यैस्सह दूरे गाश्चारयन्, क्षुत्पीडितैस्तैः भोजनार्थं प्रार्थितः, 'समीप एव ब्राह्मणाः सत्रयागं कुर्वन्ति, यूयं तत्र गत्वा बलरामसहितं मामिहागतं तत्पत्नीभ्यो विज्ञापयत, ताः युष्माकं यथेष्टमन्नं दास्यन्ति'' इत्युक्त्वा,ताननुज्ञाप्य, ताभिरानीतं चतुर्विधं षड्रसोपेतमन्नं बलरामादिभिस्सह भुक्त्वा, तासामनुग्रहं कृत्वा, ता अनुज्ञाप्य कदाचित्स्वस्य लोकसाधारण्येन मानुषभावं जानत इन्द्रस्य स्वविषयकतत्त्वज्ञानोदयार्थं तद्दर्पजिघांसया, इन्द्रोद्देशेन प्रतिवर्षं क्रियमाणमुत्सवविशेषं, पर्वतोद्देशव्याजेनात्मोद्देशेन नन्दादिभिः कारयित्वा, स्वयमेव पर्वताकाररूपान्तरेण तत्सर्वं भुक्त्वा, स्वमाहात्म्यमजानता, स्वविषयकमहोत्सवभङ्गरुषा इन्द्रेण व्रजपीडार्थमादिष्टैर्मेघैः कृतां वृष्टिं सोढुमशक्तान् स्वकीयान्सर्वान् दृष्ट्वा, तैः प्रार्थितः, गोवर्धनाख्यं पर्वतम्, एकेन हस्तेन लीलया छत्राकारेणोद्धृत्य, तांस्तत्र प्रवेश्य सुखेन रक्षित्वा सर्वानतोषयदित्यादिकथा सूचिता।। ६।।

गोविन्दाख्योऽथ तातं जलपतिहृतमानीय लोकं स्वकीयं
नन्दादीनां प्रदर्श्य व्रजगतवनितागानकृष्टार्तचित्ताः।
यः कालिन्द्यां निशायामरमयदमलज्योत्स्नया दीपितायां
चार्वङ्गीर्नर्मवाक्यैः स्तनभरनमिताः प्रीणयन् प्रीयतां नः।। ७।।

।। **गोविन्दाख्य** इति।। **यः**-कृष्णः, **अथ**-अनन्तरं, **गोविन्दाख्यः**-गोविन्द इति आख्या यस्य स तथा। **जलपतिहृतं**-जलानां पतिः स्वामी वरुणः तेन इति वा, जलपतिः-जलपालको वरुणभृत्यः असुरः, तेनेति वा, हृतं-अपहृतं, **तातं**-स्वपितरं नन्दगोपं,

आनीय-आदाय, **स्वकीयं**-स्वस्य लोकं वैकुण्ठं, **नन्दादीनां**-नन्द आदिर्येषां ते तथा तेषां, **प्रदर्श्य** दर्शयित्वा, **गानकृष्टार्तचित्ताः**-गानेन वेणुगानेन, कृष्टं-आकर्षितं, **आर्तं**-मन्मथपीडितं, **चित्तं**-मनो यासां ताः, **चार्वङ्गीः**-चारूणि अङ्गानि यासां ताः-चार्वङ्ग्यः, ताश्चार्वङ्गीः 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति सूत्रे 'अङ्गगात्रकण्ठेभ्यो वक्तव्य' मिति वार्तिकवचनात् ङीष्। **स्तनभरनमिताः**-स्तनयोर्भरेण **नमिताः**- वलिताः, अत्र भरशब्दनिर्वाहः आद्यश्लोके उक्तः। **व्रजगतवनिताः**-व्रजे गोकुले गताः विद्यमानाः वनितास्स्त्रियः, **नर्मवाक्यैः**-उपहासवाक्यैः, **प्रीणयन्**-सन्तोषयन्, **कालिन्द्यां**-यमुनायां, तत्समीप इति यावत्। **अमलज्योत्स्नया**-अमला निर्मला ज्योत्स्ना चन्द्रिका, तया, दीपितायां निशायां रात्रौ, **अरमयत्**-रमयामास। 'रमु क्रीडाया' मित्यस्माण्णिजन्ताल्लङि रूपमेतत्। **सः**-कृष्णः **प्रीयतां**-प्रीतो भवेत्। 'प्रीङ्प्रीतौ' लोडात्मनेपदम्।।

अनेन कृष्णः गोवर्धनोद्धारेण सर्वरक्षणानन्तरं स्वरक्षितं व्रजं दृष्ट्वा, स्वस्य नारायणावतारत्वं निश्चित्य, गतकोपेन स्वकृतापराधशान्त्यै सुरद्रुमकामधेन्वादिभिस्सह स्वशरणं प्राप्तेनेन्द्रेण क्षीरादिभिरभिषिक्तः, तेन कृतं **'गाः पशून् विन्दति प्राप्नोति' इति वा, गाः वेदवेदानुसारिवाचः प्रतिपाद्यतया विन्दतीति वेत्याद्यन्वर्थोपेतं** गोविन्द इति नाम च प्राप्य, कदाचित् एकादश्यामुपोष्य द्वादश्यां स्नानार्थं आसुरीं वेलामविज्ञाय यमुनाजले निशि प्रविष्टं जलपालकेन वरुणभृत्येन वरुणान्तिकं नीतं स्वपितरं जलेऽपश्यद्भिर्गोपालकैश्श्रुत्वा वरुणसमीपं प्राप्य तेन क्षमापितः, तत्कृतपूजां स्वीकृत्य नन्दगोपमादाय गोकुलं प्राप्य कदाचिन्नन्दादीनामनुग्रहार्थं स्वमहिमख्यापनाय ब्रह्महदे स्नातानां तेषां दिव्यदृष्टिं दत्वा स्वकीयमप्राकृतं मुक्तप्राप्यं वैकुण्ठलोकं तत्र च छन्दोभिमानिभिर्देवैः स्तूयमानं स्वस्वरूपं च दर्शयित्वा तस्यां रात्रौ पूर्णचन्द्रिकया प्रकाशितायां, यमुनातीरे विराजमानं मनोहरं कुसुमितवनं क्रीडार्थं प्रविश्य अनङ्गवर्धनं वेणुनादं कृत्वा, तच्छ्रुत्वा मन्मथपीडया गोदोहन-शिशुलालन-पतिसेवन- परिवेषणादिनानाविधस्वव्यापारान् परित्यज्य, पत्यादिकृतविरोधमनादृत्य, स्वसमीपं प्राप्ताभिः कमनीययुवतीभिः गोपस्त्रीभिस्सह नानाविधोपहासपूर्वकं रममाणः, सर्वानतोषयदित्यादि कथा सूचिता।। ७।।

अन्तर्धत्ते स्म तासां मदहरणकृते त्वेकया क्रीडमानः
स्वस्कन्धारोहणाद्यैः पुनरपि पिहितो गर्वशान्त्यै मृगाक्ष्याः।
खिन्नानां गोपिकानां बहुविधनुतिभिर्यो वहन्प्रीतिमाविः
प्राप्तो रासोत्सवेन न्यरमयदबलाः प्रीयतां मे हरिः सः।। ८।।

।। **अन्तर्धत्त इति**।। यः-कृष्णः, **तासां**-गोपस्त्रीणां, **मदहरणकृते**-मदो गर्वः

तस्य हरणमुपमर्दः तस्य कृते करणार्थम्। कृते इति विभक्तिप्रतिरूपकमव्ययं तादर्थ्यो-पज्ञा। 'डु कृञ् करणे' इति धातोः कर्मणि भावे वा, 'क्विपि' धातोः तुगागमे 'कृत्' इति प्रातिपदिकम्। तस्माच्चतुर्थीविभक्तौ सत्यां 'कृते' इति रूपम्। तथैव चन्द्रभट्टीये आद्यपद्यव्याख्याने उक्तेः।। अन्तर्धत्ते स्म अदृश्योऽभूत्। स्मातीते, अन्तरुपपदात् 'डु धाञ् धारणपोषणयोः' इत्यस्माल्लडात्मनेपदे रूपम्। एकया तु गोपस्त्रिया सह **स्वस्कन्धारोहणाद्यैः**-स्वस्य **स्कन्धः**-अंसः। 'स्कन्धो भुजशिरोंऽसोऽस्त्री' त्यभिधाना-त्। तस्मिन्नारोहणं आद्यं येषां ते, तैर्व्यापारैः, **क्रीडमानः**-क्रीडां कुर्वन्, **मृगाक्ष्याः**-मृगस्य सारङ्गस्य अक्षिणी लोचने इवाक्षिणी यस्याः सा मृगाक्षी तस्याः 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्' इति षचि 'षिद्गौरादिभ्यश्चे' ति ङीषि मृगाक्षीति रूपम्। 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्चे' ति एकस्याक्षिशब्दस्य लोपः।

गर्वशान्त्यै-गर्वस्य शान्त्यै उपशमनार्थं, **पुनरपि पिहितः**-अन्तर्धानं प्राप्तः, **खिन्नानां**-क्लेशयुक्तानां, **गोपिकानां**-गोपस्त्रीणां, **बहुविधनुतिभिः**-नानाविधस्तोत्रैः, **प्रीतिं, वहन्**-कुर्वन्, **आविः प्राप्तः**-आविर्भावं प्राप्तः। आविरित्यव्ययं प्रकाशवाचि। 'प्रकाशे प्रादुराविस्स्यात्' इत्यव्ययवर्गे पाठात्। **रासोत्सवेन**-रासक्रीडाख्योत्सवेन, **अबलाः**-गोपस्त्रियः 'स्त्री योषिदबला योषा' इत्यमरोक्तेः। **न्यरमयत्**-क्रीडयामास। 'निपूर्वाद्रमुक्रीडाया' मिति णिजन्ताल्लङि रूपमेतत्। सः कृष्णः, हरिः- सकलतापाप-हारी, **मे**-मम, प्रीयतां-प्रसन्नो भवेत्। 'प्रीङ् प्रीतौ' लोडात्मने पदम्।।

अनेन कृष्णः, पूर्वोक्तरीत्या गोपस्त्रीभिस्सह वने विहरन्, स्वाङ्गसङ्गेन गर्वि-तानां तासां गर्वोपशमनद्वारा अनुग्रहं कर्तुमदृश्यो भूत्वा, एकया सह किञ्चिद्दूरं गत्वा स्वस्कन्धारोहणादिभिः क्रीडन्, गर्वितया तयापि 'पादाभ्यां चलितुमसमर्थां मामूढ्वा यत्र ते मनस्तत्र गच्छे'त्युक्तः, तस्या अप्यदृश्यो भूत्वा ताभिः समेताभिः स्वदर्शनला-लसाभिः सर्वत्र विचार्य पुनः यमुनातीरं प्राप्ताभिः गोपस्त्रीभिः कृतैः 'जयति तेऽधिक' मित्याद्यनेकविधस्तोत्रैस्सन्तुष्टः, 'तासामाविरभूच्छौरिः' इत्याद्यनेकगुणविशिष्टतया तासां दृष्टिविषयो भूत्वा स्वाह्लादकरनानाविधवचनैस्तासां सकलक्लेशं परिहृत्य ताभिस्सह 'पादन्यासैर्भुजविधुतिभिः सस्मितभ्रूविलासैः' इत्याद्युक्तरीत्या रासक्रीडाख्यमहोत्सवं कुर्वन् सर्वानतोषयदित्यादिकथा सूचिता।। ८।।

हत्वा यश्शङ्खचूडं मणिमथ समदादग्रजायार्तगोपी-
गीतानेकस्वलीलो हतवृषभमहापूर्वदेवोऽमरेड्यः।
केशिप्राणापहारी सुरमुनिवदनप्रार्थिताशेषकृत्यो
हत्वा पुत्रं मयस्य स्वजनमपिहितं मोचयन्मोक्षदस्स्यात्।। ९।।

।। **हत्वे** ति।। **यः**-कृष्णः, **अथ**-अनन्तरं, **शङ्खचूडं**-शङ्खचूडाख्यासुरं हत्वा, **मणिं**-शिरोरत्नं, **अग्रजाय**-बलरामाय, **समदात्**-दत्तवान्। "डु दाञ् दाने" लुङ् परस्मैपदम्। "गातिस्थेति" सिचो लुक्।। **आर्तगोपीगीतानेकस्वलीलः**-आर्ताः दुःखिताः, **गोप्यः**-गोपस्त्रियः, ताभिः **गीताः**-सङ्गीताः, **अनेकाः**-स्वस्य लीलाः व्यापाराः यस्य स तथोक्तः। **हतवृषभमहापूर्वदेवः**-हतः वृषभः वृषभासुरः महान् पूर्वदेवः दैत्यः येन स तथा। "शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः" इत्यमरोक्तेः। **अमरेड्यः**-अमरैरिन्द्रादिभिरीड्यः-स्तुत्यः। **केशिप्राणापहारी**-केशिनः केशिनामकस्य दैत्यस्य प्राणानपहरतीति स तथा। **सुरमुनिवदनप्रार्थिताशेषकृत्यः**-सुरमुनिर्नारदः, तस्य वदनेन प्रार्थितानि अशेषाणि कृत्यानि कर्तव्यानि यस्य स तथा। **मयस्य अपत्यं** पुत्रं हत्वा, **अपिहितं**-आच्छादितं गिरिदर्यामितिशेषः। **स्वजनं** स्वकीयं जनं, **मोचयन्**-गिरिकन्दराद्बहिर्निष्कासयन्, **सः**-कृष्णः, **मोक्षदः**- संसारगह्वरगुहाप्रवेशनिमित्तसकलक्लेशनिवृत्तिदः, **स्यात्**-भवेत् ममेति शेषः। "अस भुवि" लिङ् परस्मैपदम्।।

अनेन श्रीकृष्णः बलरामेण सहितः कदाचिद्रात्रौ कुसुमितवने गोपस्त्रीभिस्सह वेणुनादादिभिः क्रीडां कुर्वन् तदा स्वसमीपस्थगोपाङ्गनाः भीषयन्तं कुबेरभृत्यं रुद्रप्रसादेनातिगर्वितं, शङ्खचूडासुरं हत्वा, तच्छिरसि विद्यमानं रत्नं गृहीत्वा बलरामाय दत्वा, प्रतिदिनं गोभिस्सह वनेषु स्वस्य सञ्चारसमये स्वमुखारविन्दादर्शनेन दुःखिताभिर्गोपस्त्रीभिः तद्दुःखनिवृत्तये "वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुः" इत्यादिनानाप्रकारैरनुवर्णितचरित्रः, कदाचिद्गोकुलपीडार्थमागतमरिष्टनामकं रुद्रवरादवध्यं कंसभृत्यं वृषभासुरं हत्वा, तथा केशिनामानं तुरगस्वरूपं पार्वतीवरादवध्यं भक्षणार्थं मुखं व्यादाय स्वसमीपं प्राप्तं तन्मुखे स्वबाहुं प्रवेश्य तत्र वर्धमानेन स्वबाहुना शीर्णास्यदन्तदशनच्छदरुद्धवायुं महासुरं हत्वा ब्रह्मादिभिः पुष्पैरभिषिच्यमानः, तैः स्तुतः, देवकार्यार्थं स्वसमीपं प्राप्तेन नारदेन विज्ञापितकंसवधाद्यागामिसकलकार्यः, तमनुज्ञाप्य, कदाचिददद्रिसानुषु गाश्चारयन्, सर्वान्गोपालानाहूय कांश्चिच्चोरत्वेन, कांश्चित्पालकत्वेन, कांश्चिन्मोचयितृत्वेन विभज्य, निलायनक्रीडां कुर्वन्, तदा तु क्रीडार्थमागतं गोपालवेषधरं मेषायितान्बहून्गोपालान् चोररूपेणादाय गिरिदर्यां विनिक्षिप्य शिलया द्वारं पिधाय, पुनरवशेषितान् ग्रहीतुमुद्युक्तं व्योमनामकं मयपुत्रं चतुर्मुखवरादवध्यं महासुरं हत्वा पिधानं निर्भिद्य सर्वान्गोपान्बहिर्निस्सार्य ब्रह्मादिभिर्गोपालैश्च स्तूयमानः, सकलगोपालैस्सह गोकुलं प्रविश्य सर्वान् सन्तोष्य सुखेन स्थितवानित्यादिकथा सूचिता।। ९।।

अक्रूराकारितो यान्व्रजयुवतिजनान् सान्त्वयित्वाऽभितप्तान्
स्वं रूपं मज्जतेऽस्मै विलसितमहिगं दर्शयंस्तेन वन्द्यः।
यो गत्वा कंसधानीं हतरजकशिराश्चारुवेषः सुदाम्नः
प्रीतिं कुर्वंस्त्रिवक्रां व्यतनुत रुचिरां पौरमह्योऽवतात्सः।। १०।।

।। **अक्रूरे** ति।। **यः**-कृष्णः, **अक्रूराकारितः**-अक्रूरेण **आकारितः**-आहूतः, **यान्**-गच्छन्, मथुरां प्रतीति शेषः। **अभितप्तान्**-सन्तप्तान्, **व्रजयुवतिजनान्**-व्रजे विद्यमानाः युवत्यः यौवनं प्राप्ताः गोपस्त्रियः ताश्च। **सान्त्वयित्वा** (तासां) मनस्समाधानं कृत्वा, **मज्जते**-स्नानं कुर्वते, **अस्मै**-अक्रूराय, **विलसितं**-प्रकाशमानं, **अहिगं**-अहिः-शेषः तस्मिन् गं विद्यमानं, **स्वं**-स्वकीयं, **रूपं दर्शयन्**-प्रकाशयन्, **तेन**- अक्रूरेण, **वन्द्यः**-नमस्कृतः स्तुतश्च। 'वदि अभिवादनस्तुत्योः' इति धातुपाठात्। **कंसधानीं**-कंसनगरीं मथुरां **गत्वा**-प्राप्य, **हतरजकशिराः**-हतं संहतं रजकस्य शिरो येन स तथा। **चारुवेषः**-चारवो वेषा अलङ्करा यस्य स तथा। 'आकल्पवेषौ नेपथ्य' मित्यमरः। **सुदाम्नः**-सुदामनामकस्वभक्तस्य, **प्रीतिं कुर्वन्**, **त्रिवक्रां**-कुब्जां सैरन्ध्रीनाम्नीं स्त्रियं, **रुचिरां**-मनोहरां, **व्यतनुत**-अकरोत्। 'तनु विस्तारे करणे च' लङात्मनेपदम्। **पौरमह्यः**-पौरैर्मथुरापुरस्थजनैर्मह्यः पूज्यः **सः** कृष्णः **अवतात्** रक्षतु। मामिति शेषः। 'अव रक्षणे' आशिषि लोट्, 'तुह्योस्तातङ्ङाशिष्यन्यतरस्या' मिति (पा. सू. ७-१-३५) विकल्पेन तातङादेशः।।

अनेन पूर्वोक्तरीत्या गोकुलनाथे कृष्णे अद्भुतानि कर्माणि कुर्वति सति नारदः सुरकार्यार्थं कंससमीपं गत्वा वसुदेवेन कृतं गोकुलं प्रति कृष्णनयनादिकं सर्वमुक्तवान्। तदा कंसः क्रुद्धः सभार्यं वसुदेवं निगडबद्धं कृत्वा स्वमन्त्रिणमक्रूरमाहूय बलरामकृष्णौ गोकुलादिह धनुर्महोत्सवनिरीक्षणार्थमानय, तौ हनिष्यामीत्युक्त्वा अक्रूरं गोकुलं प्रति प्रेषितवान्। सः अक्रूरः पूर्वं किशोरनामा सुरगायकः कृष्णसेवार्थमुत्पन्नः कृष्णपादारविन्ददर्शनोत्सुकमनाः रथमारुह्य गोकुलं प्राप्य सबलं कृष्णं नत्वा तेनादृतः, कंसचिकीर्षितं सर्वमुक्त्वा मथुरां प्रत्याहूतवान्। तदा कृष्णस्तेनाहूतः रथमारुह्य नन्दादिभिस्सर्वैस्सह मथुरां गच्छन्, स्वविरहासहिष्णुभिः गोपस्त्रीभिर्वारितः पुनरिह आयास्यामीति सान्त्वयित्वा, ता अनुज्ञाप्य यमुनातीरं प्राप्य, यमुनायां मज्जते अक्रूराय शेषस्थस्वस्वरूपं पौनःपुन्येन दर्शयित्वा, तेन स्तुतः, मथुरां प्राप्य, अक्रूरमग्रे प्रेष्य, तत्रोपवने कृताह्निकः अपराह्णकाले गोपालैस्सह मथुरां द्रष्टुं राजमार्गे गच्छन्, तस्मिन्मार्गे आयान्तं कुञ्जरगतं कंसदयितं रजकं वस्त्राणि देहीति प्राथ्य, तेन निराकृतः

तस्य शिरः कराग्रेण छित्वा, स्वयोग्यवासांसि गृहीत्वा शेषाणि गोपेभ्यो दत्वा, ततः वापकेन कृतनानालङ्करस्ततस्सुदाम्नो मालाकारस्य गृहं गत्वा, तेन पूजितस्तस्मात्पुष्पाणि गृहीत्वा अलङ्कृतः, तौ निजपार्षदावनुगृह्य राजमार्गे गच्छन्, गृहीताङ्गविलेपनभाजनां कुब्जां कंसधात्रीं सैरन्ध्रीं दृष्ट्वा, सुगन्धं प्रार्थ्य तद्दत्तसुगन्धानुलिप्ताङ्गस्तस्यै प्रसन्नस्तां ऋज्वीं कृत्वा, तया स्वगृहं प्रति प्रार्थितः, उपहासपूर्वमेष्यामि ते गृहमित्युक्त्वा तामनुज्ञाप्य, स्वदर्शनार्थमागतैस्स्त्रीपुरुषैः गन्धपुष्पाक्षतादिभिरभिपूज्यमानस्सर्वानतोषयदित्यादिकथा सूचिता।। १०।।

शार्वं भंक्त्वा धनुर्यो बलमपि धनुषो रक्षकं कुञ्जरं तं
मल्लांश्चाणूरपूर्वानपि सहसहजो मर्दयंस्तुङ्गमञ्चात्।
भोजेशं पातयित्वा व्यसुमकृत निजान्नन्दयन् प्राप्य गर्गात्
द्वैजं संस्कारमाप्तो गुरुमथ विदिताशेषविद्योऽवतान्नः।। ११।।

।। **शार्वमिति**।। **यः**-कृष्णः, **सहसहजः**-सहजेन बलरामेण सहितः, "तेन सहेति तुल्ययोगे" इति बहुव्रीहिसमासः। "वोपसर्जनस्ये" ति विकल्पितत्वात्सहेत्यस्य सादेशो न। **शार्वं** शर्वो रुद्रः, तत्सम्बन्धि शार्वम्, **धनुः** कार्मुकं, **भंक्त्वा**-छित्वा, **धनुषः रक्षकं बलमपि** कंसभृत्यजातमपि **भंक्त्वा**-मर्दयित्वा **तं**-प्रसिद्धं **कुञ्जरं**-कुवलयापीडाख्यं गजं, **चाणूरपूर्वानपि**-चाणूरः पूर्वः आदिर्येषान्ते तान्, मल्लानपि **मर्दयन्**-मरणं प्रापयन्, **तुङ्गमञ्चात्**-उन्नतमञ्चात्, **भोजेशं**-भोजदेशाधिपतिं कंसं, **पातयित्वा**-अधो निपात्य, **व्यसुं**-विगता असवः प्राणाः यस्य तम्। "पुंसि भूम्न्यसवः प्राणाः" इत्यमरः। **अकृत**-अकरोत्। "डुकृञ् करणे" लुङ् आत्मनेपदम्। **निजान्**-पित्रादीन्, **नन्दयन्**-हर्षयन्, **गर्गात्**-गर्गाचार्यात्, **द्वैजं संस्कारं**- उपनयनसंस्कारं प्राप्य, **अथ**-अनन्तरं, **गुरुं**-सान्दीपिनिनामकं ब्राह्मणं, **आप्तः**-प्राप्तः, कर्तरि क्तः। **विदिताशेषविद्यः**-विदिताः ज्ञाता अशेषाः विद्याः येन स तथा। **सः**- कृष्णः, **नः**-अस्मान्, **अवतात्**-रक्षतु। "अव रक्षणे" लोट् परस्मैपदम्।।

अनेन सबलः कृष्णः पूर्वोक्तरीत्या राजमार्गे गच्छन्, धनुषो गृहं प्राप्य रुद्रदत्तं सुभटैर्गुप्तं धनुरादाय छित्वा, तद्रक्षकसर्वबलं हत्वा, गोपैस्सह उपवनं प्राप्य, क्षीरान्नं भुक्त्वा, रात्रिं सुखेन नीत्वा, प्रातरुत्थाय कृताह्निकः, कंसेन कार्यमाणमल्लक्रीडां द्रष्टुं बलरामादिभिर्वृतः, रङ्गद्वारं समासाद्य तस्मिन्नवस्थितं स्वहननार्थं कंसेन स्थापितं साम्बष्ठं गजं हत्वा, चाणूराख्यमल्लेन युद्धार्थमाहूतः, तं हत्वा, बलरामेण मुष्टिकं घातयित्वा, अन्यान्द्रावयित्वा, मञ्चस्थं मातुलं कंसं, मूर्ध्नि सङ्गृह्य भूमौ निपात्य हत्वा,

तद्बलं सकलं हत्वा, स्वपितरौ निगडाद्विमुच्य सर्वान्सन्तोष्य गर्गादुपनयनसंस्कारं प्राप्य, लोकशिक्षणाय अवन्तिपुरवासिनं सान्दीपिनिं गुरुं बलरामेण सह प्राप्य तेन सकृन्निगदितमात्रेण सर्वा विद्याः प्राप्य सर्वानतोषयदित्यादिकथा सूचिता।। ११।।

दत्वा पुत्रं प्रवक्त्रे प्रतिगतमधुरस्सान्त्वयन्नुद्धवास्या-
द्गोष्ठस्थान्नन्दपूर्वानरमयदबलां प्रीतिकृद्यः शुभस्य।
अक्रूरस्याथ तेन प्रतिविदितपृथापुत्रकृत्यो जराया-
स्सूनुं निर्भिन्नसेनं व्यतनुत बहुशो विद्रुतं नस्स पायात्।। १२।।

।। **दत्वे** ति।। **यः**-कृष्णः, **प्रवक्त्रे**-विद्योपदेष्ट्रे, सान्दीपिनये, **पुत्रं**-कुमारं, **दत्वा, प्रतिगतमधुरः**-प्रतिगता पुनः प्राप्ता मधुरा येन स तथा। **उद्धवास्यात्**-उद्धवस्य आस्यात् मुखात् **गोष्ठस्थान्**-गोकुलस्थान्, **नन्दपूर्वान्**-नन्दः पूर्वो येषां ते तान्, **सान्त्वयन्**-हर्षयन्, **अबलां**-सैरन्ध्रीं, **अरमयत्**-रमयामास। **शुभस्य**-सत्कर्मयुक्तस्य अक्रूरस्य, **प्रीतिकृत्**-प्रीतिं करोतीति प्रीतिकृत्। अथ-अनन्तरं, **तेन** अक्रूरेण, **प्रतिविदितपृथापुत्रकृत्यः**-प्रतिविदितानि विज्ञापितानि 'अन्तर्भावितण्यर्थः', **पृथायाः**-कुन्त्याः, **पुत्राणां**-पाण्डवानां, **कृत्यानि**-कर्माणि यस्य स तथा। **जरायाः**- जराख्यायास्त्रियः, **सूनुं**-जरासन्धमितियावत्। **निर्भिन्नसेनं**-निर्भिन्ना विदारिता सेना यस्य तम्। 'गोस्त्रियोरुपसर्जनस्ये' ति ह्रस्वः। **बहुशः**-बहुवारं, **विद्रुतं**-पलायितं, **व्यतनुत**-अकरोत्। 'तनु विस्तारे करणे च' लङात्मनेपदम्। वीत्युपसर्गपूर्वत्वम्। **सः**-कृष्णः, **नः**-अस्मान्, **पायात्**-रक्षेत्। 'पा रक्षणे' लिङ् परस्मैपदम्।

अनेन कृष्णः बलरामेण सह पूर्वोक्तरीत्या सकलविद्यास्सान्दीपिनेरवाप्य तेन गुरुणा शिष्यसामर्थ्याभिज्ञेन गुरुदक्षिणार्थं 'प्रभासक्षेत्रे समुद्रे मृतं मम पुत्रमानये' त्युक्तः रथमारुह्य प्रभासक्षेत्रं प्राप्य, वरुणवचनेन समुद्रस्थं शङ्खरूपधरं पञ्चजनाह्वयं दैत्यं हत्वा, तदुदरे गुरुपुत्रमदृष्ट्वा पञ्चजनाङ्गप्रभवं शङ्खमादाय, यमपुरीं गत्वा यमेनानीतं गुरुपुत्रं स्वगुरवे दत्वा, तेनानुज्ञातः, मधुरां प्राप्य वृष्णीनां प्रवरं सखायं बुद्धिशालिनं उद्धवं स्वविरहेण दुःखितान् गोकुलस्थसर्वसज्जनान्स्वसन्देशैर्हर्षयितुं प्रेष्य, कामतप्तायाः पूर्वमेव प्रार्थनां कृतवत्याः सैरन्ध्र्याः गृहं प्राप्य, तया सह क्रीडां कृत्वा, तस्याः मनोऽभीष्टं कृत्वा, अक्रूरगृहं प्राप्य तेन कृतां पूजां स्वीकृत्य, हस्तिनाह्वयपुरस्थान् पितृवियुक्तान् वनादृषिभिरानीतान् कुरुभिः पीड्यमानान् पाण्डवान् विचारयितुं अक्रूरं प्रेष्य, तद्वृत्तान्तं श्रुत्वा, पुत्रीवैधव्यसंक्रुद्धं युद्धार्थं मधुरां प्रत्यागतं त्र्यधिकविंशदक्षौहिणीसेनायुक्तं, ब्रह्मेशदूर्वासोदत्तवरैरजेयं जरासन्धं, तत्सेनां सर्वां हत्वा बहुशः तं पला-

यितं कृत्वा सर्वानतोषयदित्यादिकथा सूचिता।। १२।।

पुर्या निर्गत्य रामादथ सहमुसली प्राप्य कृष्णोऽभ्यनुज्ञां
गोमन्तञ्चापि मौलिं खगपतिविहितं वासुदेवं शृगालम्।
हत्वा शत्रुं च पुर्यामधिजलधि पुरीं निर्मितां बन्धुवर्गा-
न्निन्ये यस्सोऽवतान्नः प्रमथितयवनो मौचुकुन्दाक्षिवह्नेः।। १३।।

।। **पुर्या इति**।। **यः**-कृष्णः, **सहमुसली**-मुसलः अस्यास्तीति मुसली बलरामः 'अयोग्रं मुसलोऽस्त्री स्या' दित्यभिधानात्, तेन सहितः। **अथ**-अनन्तरं, **पुर्याः**-मधुरायाः, **निर्गत्य**-निस्सृत्य, **रामात्**-परशुरामात्, **अभ्यनुज्ञां प्राप्य गोमन्तञ्च**-गोमन्तनामकपर्वतञ्च, प्राप्य, **खगपतिविहितं**-खगपतिः-गरुडः, तेन विहितंदत्तं, **मौलिमपि** किरीटमपि प्राप्य, 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः', इत्यभिधानात्। **शृगालं वासुदेवं**-शृगालवासुदेवाख्यं, **शत्रुञ्च**, **पुर्यां**-करवीरपुराख्यपुर्यां **हत्वा**। **अधिजलधि**-जलधौ समुद्रे, 'अव्ययं विभक्तिसमीपसमृद्धी' त्यादिना विभक्त्यर्थे अव्ययीभावः। **निर्मितां** पुरीं द्वारकाख्यां पुरीं, **बन्धुवर्गान्**-यादवगणान्, **निन्ये**-प्रापितवान्। 'णीञ् प्रापणे' लिङात्मनेपदम्। 'दुह्याच् पच्' इत्यादिना द्विकर्मकत्वम्। **मौचुकुन्दाक्षिवह्नेः**-मुचुकुन्दस्येमे मौचुकुन्दे ते च ते अक्षिणी च मौचुकुन्दाक्षिणी तयोर्जातो वह्निस्तस्मात्। **प्रमथितयवनः**-प्रमथितः नाशितः यवनः कालयवनाख्यः म्लेञ्छः येन स तथा। **सः**-कृष्णः, **नः**-अस्मान्, **अवतात्**-रक्षतु। 'अव रक्षणे' लोट् परस्मैपदम्।।

अनेन कृष्णः बलरामेण सहितः पूर्वोक्तरीत्या जरासन्धं बहुशः विद्रुतं कृत्वा, **बलवता विरोधे अल्पबलेन तत्र न स्थातव्य**मिति लोकनीतिं प्रदर्शयितुं स्वेच्छयैव अतिदुर्गं गोमन्तं पर्वतं द्रष्टुं मधुराया निर्गत्य गच्छन्, मार्गे क्वचित्प्रदेशे वृक्षमूलनिवासिनं शिष्यगणसमावृतं परशुरामं दृष्ट्वा तेनानुमोदितस्तेनानुज्ञामादाय, गोमन्तपर्वतस्याधःप्रदेशे विद्यमानकरवीरपुरस्थं, पूर्वं वसुदेवात्करवीरेश्वरसुतायां दनुस्वरूपभूतायां पुत्रिकापुत्रन्यायेनोत्पन्नं, प्राग्धुन्धुनामकं मधुसुतं दैत्यं शृगालवासुदेवं स्वशत्रुं हत्वा गोमन्तं प्राप्य तत्रस्थमत्युन्नतं प्रवर्षणाख्यं शृङ्गं प्राप्य तत्र रममाणः, तत्र क्षीराब्धौ मुक्तस्थानादमुक्तसेव्यस्थलं प्राप्य, संसृतिस्थैस्सुराद्यैस्सेव्यमानं नारायणं द्रष्टुमागतं नारायणशिरसि विद्यमानं किरीटमपहृत्य गच्छन्तं तद्गतासुरावेशप्रकटनाय देवैस्सह सुप्तवद्विद्यमानेन नारायणेनोपेक्षितं विरोचनसुतं बलिं विजित्य, पुरपालकेन गरुडेनादाय

स्वशिरसि समर्पितं किरीटं प्राप्य, गिरेरवरुह्य करवीरपुरं प्राप्य, तत्र चतुरो मासानुषित्वा महत्या सेनया सह मधुरां प्राप्य, शृगालवासुदेववधकोपेन युद्धार्थमागतं जरासन्धं पुनश्च पलायितं कृत्वा, तेन जरासन्धसहायार्थमागतं तिसृभिर्म्लेच्छकोटिभिस्सहितं मधुरायाः निरोधकं कालयवनं दृष्ट्वा, जरासन्धागमनञ्च निश्चित्य, स्वजनरक्षणार्थं समुद्रे द्वादशयोजनविस्तीर्णां मनोहरां द्वारकाख्यपुरीं कृत्वा मधुराया निर्गत्य कालयवनस्य समीपे निरायुधः द्रवन्, युद्धार्थं कालयवनेनान्वीयमानः दूरे किञ्चन गिरिकन्दरं प्राप्य, तत्र कालयवनं नीत्वा, देवासुरयुद्धकाले देवार्थमसुरान्निर्जित्य प्रसन्नैर्देवैर्दत्तं बहुकालनिद्रालक्षणवरं निद्राभङ्गकृतः क्षयलक्षणवरञ्च प्राप्य तत्र सुप्तं, मुचुकुन्दनामकं राजानं क्रुद्धेन कालयवनेनोत्थाप्य, 'अनर्थको वरोऽमुनावृतोऽपि सार्थको भवे' दिति (म.ता.नि १७-१२८) देवैरुक्तं सत्यं कर्तुं मूचुकुन्दाक्षिवह्निस्वरूपेण स्वयमेव कालयवनं नाशयित्वा, सर्वानतोषयदित्यादिकथा सूचिता।। १३।।

राज्ञा संस्तूयमानो हतयवनबलो भीतवन्मागधेशा-
द्गोमन्तं प्राप्य भूयो जितमगधपतिर्जातशान्ताग्निशैलः।
आगत्य द्वारकां यो हृदिकसुतगिरा ज्ञातकौन्तेयकृत्यः
पश्यत्स्वादाय भैष्मीं नृषु युधि जितवान् भूभृतः प्रीयतां नः।।१४।।

।। **राज्ञे ति।। यः**-कृष्णः, **राज्ञा**-मुचुकुन्देन, **संस्तूयमानः**-सम्यक् स्तूयमानः, **हतयवनबलः**-हतं यवनस्य कालयवनस्य बलं सेना येन स तथोक्तः, **मागधेशात्**-जरासन्धात्, **भीतवत्**-भीत इव "तेन तुल्यं क्रियाचेद्वति" रिति वतिप्रत्यये रूपमेतत् अव्ययञ्च। **भूयः**-पुनः, **गोमन्तं प्राप्य, जितमगधपतिः**-जितः मगधपतिः जरासन्धो येन स तथोक्तः। **जातशान्ताग्निशैलः** जातः-उत्पन्नः, शान्तः-नाशितः अग्निर्यस्य स तथोक्तः, तादृशः शैलः पर्वतो यस्य स तथोक्तः। "अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः" इत्यभिधानात्। द्वारकामागत्य प्राप्य, **हृदिकसुतगिरा**-हृदिकस्य सुतः कृतवर्मा, तस्य गिरा वाचा, **ज्ञातकौन्तेयकृत्यः**-ज्ञातं कौन्तेयानां कुन्तीपुत्राणां पाण्डवानां कृत्यं कर्म यस्य स तथोक्तः। कुन्तीशब्दादपत्यार्थे 'स्त्रीभ्यो ढगि' ति ढक् प्रत्यये 'कितिचे' त्यादिवृद्धौ "आयनेयीनीयी" इत्यादिना ढस्य एय् आदेशे 'यस्येति चे' तीकारलोपे कौन्तेयेतिरूपम्। **नृषु**-जनेषु, पश्यत्सु, **भैष्मीं**-भीष्मस्यापत्यं स्त्री भैष्मी, तां रुक्मिणीं, **आदाय**-गृहीत्वा, **भूभृतः**-नृपान् **युधि**-युद्धे, जितवान्, **सः**-कृष्णः, **नः**-अस्माकं **प्रीयतां**-प्रसन्नो भवेत्। "प्रीङ् प्रीतौ" इत्यस्माद्धातोर्लोडात्मनेपदे रूपमेतत्।

अनेन कृष्णः पूर्वोक्तरीत्या कालयवनवधानन्तरं मुचुकुन्देन दृष्टस्तेन राज्ञा "विमोहितोऽयं जन ईशमायये" त्यादि (भाग० १०-५४-४७) बहुप्रकारैस्तुतस्तमनुज्ञाप्य स्वयमपि गिरिकन्दरान्निष्क्रम्य, मथुरां प्राप्य, यवनबलं सर्वं हत्वा, पुनश्च युद्धार्थमागतं जरासन्धं जित्वा, पुनश्चोद्युक्तं दृष्ट्वा भीतवद्बलरामेण सह गोमन्तकं प्राप्य, तत्रापि युद्धार्थमागतेन जरासन्धेन गिरिं परित उत्पादितं वह्निमधः उत्प्लवता साग्रजेन स्वेन निष्पीडिताद्भूमौ एकादशयोजनं निमग्नात्पर्वतादुत्पन्नाज्जलसमूहान्नाशयित्वा, द्वारकां प्राप्य, कदाचित्सभायां नृपैस्सेव्यमानः पाञ्चालराजं द्रुपदं बलैः कुन्तीसुतैर्युद्धे बद्धं श्रुत्वा, प्रहृष्टहृदयस्तद्वृत्तान्तं वेदितुं हस्तिनपुरं प्रति कृतवर्माणं प्रेष्य, तद्वचनेन तत्सर्वं श्रुत्वा, कुण्डिनपुरे स्वयंवरायोद्युक्तां, स्वस्मिन्नेव दत्तचित्तां तदग्रजेन रुक्मिणा शिशुपालाय सङ्कल्पितां रुक्मिणीं श्रुत्वा, तया ब्राह्मणहस्तेन प्रेषितं--- 'श्रुत्वा गुणान्भुवनसुन्दरसङ्गमांस्ते निर्विश्य कर्णविवरं हरतोऽङ्गतापम्। रूपं परं भुवनमङ्गलमङ्गलं ते' इत्याद्यनेकप्रकारस्तुतिपूर्वकं लिखितं पत्रं वाचयित्वा सन्तुष्टः, रथमारुह्य बलरामादिसकलगोपालैस्सह महत्या सेनया युतः कुण्डिनपुरं प्राप्य, भीष्मकेण पूजितः, तं ब्राह्मणं रुक्मिणीं प्रति प्रेष्य, तद्वचनेन सन्तुष्टः, अम्बिकापूजाव्याजेन बहिर्निर्गतामनेकभटैर्गुप्तां, अम्बिकालयं प्राप्य पार्वतीपूजां शचीपूजां च कृत्वा बहिर्निर्गतां राजमण्डलैः परिवृतां साक्षादिन्दिरां, मनोहरानलकान्वामकरजैरुत्सार्य स्वमुखारविन्दं पश्यन्तीं रुक्मिणीं रथमारोप्य, रुक्मिण्यपहारकोपेन युद्धार्थमागतान् शिशुपालपक्षपातिसाल्वजरासन्धादिसर्वभूपान्विनिर्जित्य स्वकीयैस्सर्वैस्सह शनैर्द्वारकां प्रति गच्छन् सर्वानतोषयदित्यादकथा सूचिता।। १४।।

वैरूप्यं रुक्मिणो योऽकृत मणिसहितां जाम्बवद्देहजातां
सत्यां तेनैव युक्तामपि परिजगृहे हस्तिनं कुल्यहेतोः।
यातो व्यस्यात्र सत्याशुचमथ समगाद्द्वारकां सत्ययेतो
द्रष्टुं पार्थान् सकृष्णान् द्रुपदपुरमगाद्विद्धलक्ष्यान् स पायात्।।१५।।

।। **वैरूप्य मिति**।। **यः**-कृष्णः, **रुक्मिणः**-रुक्मिनामकस्य, **वैरूप्यं**-विरूपतां, **अकृत**-अकरोत् "डुकृञ् करणे" कर्तरि लुङात्मनेपदम्। **मणिसहितां** मणिनास्यमन्तकमणिना, सहितां-युक्तां, **जाम्बवद्देहजातां**-जाम्बवतो देहाज्जातां जाम्बवतीमिति यावत्। **तेनैव** मणिनैव युक्तां, **सत्यामपि**-सत्यभामामपि, **परिजगृहे**- परिगृहीतवान् अस्य उभयत्रान्वयः। 'परिपूर्वाद् ग्रह उपादाने' इत्यस्माल्लिङात्मने पदे रूपमेतत्। **हस्तिनं**-हस्तिनाह्वयं पुरं, **कुल्यहेतोः**-कुल्यं दावदाहाख्यं, तस्य हेतोः तद्विचारणार्थं,

यातः-गतः, **अत्र**-हस्तिनापुरे, **सत्याशुचं** सत्यायाः सत्यभामायाः, **शुचं**-दुःखं, **व्यस्य**-निरस्य, **सत्यया**-सत्यभामया, **इतः**-युक्तः, **द्वारकां, समगात्**-प्राप्तवान्। 'इण् गता' वित्यस्माल्लुङि 'इणो गा लुङि' इति गादेशे रूपमेतत्। **विद्धलक्ष्यान्**-विद्धं वेधितं, लक्ष्यं शरव्यं, यैस्ते तान् 'लक्षं लक्ष्यं शरव्यं चे' त्यभिधानात्। **सकृष्णान्,** कृष्णा द्रौपदी, तया सहितान्, **पार्थान्,** पृथायाः कुन्त्याः पुत्रान् पाण्डवान् पृथाशब्दात् 'अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः' इति चतुर्थाध्यायप्रथमपादीयसूत्रेण, 'स्त्रीभ्यो ढक्' इत्युक्तढगपवादकतया अपत्यार्थे 'अण्' प्रत्यये पार्थेति रूपम्। **द्रष्टुं द्रुपदपुरं** द्रुपदाख्यस्य राज्ञः पुरम्, **अगात्**। **सः** कृष्णः **पायात्** रक्षेत्, मामिति शेषः। 'पा रक्षणे' लिङ् परस्मैपद रूपम्।।

अनेन कृष्णः स्वकृतराक्षसविवाहमसहमानं स्वद्वेषिणं रुक्मिण्यग्रजं युद्धार्थमागतं रुक्मिणं तदीयवाससा निबध्य पञ्चचूडिनं विधाय, तं विसृज्य द्वारकां प्राप्य सर्वान् स्वकीयान् भूपालानाहूय वेदोक्तमार्गेण रुक्मिणीमुद्वाह्य, सर्वान्सन्तोष्य, सुखेन निवसन् कदाचित् सूर्यमण्डलान्तर्गतं हरिं सन्तोष्य, तस्माद्धरेः स्यमन्तकाख्यं सूर्यमण्डलसदृशप्रकाशं मणिं प्राप्य, कण्ठे धृत्वा, स्वसेवार्थं द्वारकामागतं सत्राजितं तन्मनोगतलोभप्रकाशनाय 'मणिं देही' ति प्रार्थ्य, तेन लुब्धेन निराकृतः कदाचित्तदनुजेन मृगयार्थं वनं गच्छता प्रसेनेन कण्ठे धृतं प्रसेनं हत्वा सिंहेनापहृतं, सिंहं हत्वा ऋक्षराजेन जाम्बवतानीतं, मणिमजानता सत्राजिता मदनुजं हत्वा, कृष्णेनापहृतो मणिरित्युपांशूदितं क्रमेण पौरजनैः श्रुत्वा, स्वगतनिन्दादोषपरिहाराय सकलयादवैस्सह प्रसेनमार्गेण वनं गत्वा तत्र पूर्वोक्तं सर्वं यादवानां प्रदर्श्य, सर्वान् बहिरवस्थाप्य, एक एव जाम्बवद्बिलं प्रविश्य, स्वस्वरूपमजानता तेन साकं महत् युद्धं कृत्वा, श्रान्तेन तेन स्वोपास्यं रामं स्मरता रामाभिन्नतया ज्ञातः,

यस्यैष उत्कटितरोषकटाक्षमोक्षैः
वर्त्माऽतनोत्क्षुभितनक्रतिमिङ्गिलोऽब्धिः।
सेतुः कृतः स्वयश उज्ज्वलिता च लङ्का
रक्षः शिरांसि भुवि रेजुरिषुक्षतानि।। (भाग० १०-६०-२८)

इत्यादिरूपेण रामाभिन्नतया स्तुतश्च, तमनुगृह्य युवानं कृत्वा, तेन दत्तां तत्पुत्रीं जाम्बवतीं स्यमन्तकमणिना सह उपादाय जाम्बवदभीष्टं कृत्वा, गुहामुखान्निष्क्रम्य, द्वारकां प्राप्य, पित्रादीन् सन्तोष्य, सभायां समस्तवृष्णिसन्निधौ सत्राजितमाहूय तस्मै स्यमन्तकमणिं दत्वा, तेन सत्राजिता मिथ्याभिशंसनरूपस्वकृतापराधशान्त्यै दत्तां तत्पुत्रीं साक्षाल्लक्ष्मीं सत्यभामां सरलकां परिगृह्य, मणिं तस्मिन्नेव निधाय, तया सह

रममाणः, कदाचिल्लाक्षागृहे दग्धाः पाण्डवा इत्याकर्ण्य, बन्धुदुःखविचारार्थं हस्तिनं पुरं प्राप्य, धृतराष्ट्रादीन् सान्त्वयित्वा, अक्रूरकृतवर्मबोधितशतधन्वना स्यमन्तकार्थं हतं सत्राजितं सत्यभामया हस्तिनपुरं प्राप्तया श्रुत्वा, तामपि सान्त्वयित्वा, तया सह द्वारकां प्राप्य, तस्मिन् समये द्रौपदीस्वयंवरं कुर्वता द्रुपदेनाहूतः, पाञ्चालनगरं प्राप्य कृतलक्ष्यवेधान् द्रौपदीं प्राप्तान् पाण्डवान् ब्राह्मणरूपधरान् कुम्भकारस्य शालायां दृष्ट्वा तैः पूजितः, सर्वानतोषयदित्यादिकथा सूचिता।। १५।।

कृष्णः प्राप्याथ सत्राजिदहितवधकृद्यः श्वफल्कस्य सूनौ
रत्नं सन्दर्श्य रामं व्यधितगतरुषं द्रष्टुकामः प्रतस्थे।
इन्द्रप्रस्थस्थपार्थानथ सहविजयो यामुनं तीरमायन्
कालिन्दीं तत्र लब्ध्वा यमसुतपुरकृत्पातु मां द्वारकास्थः।। १६।।

।। **कृष्ण इति**।। **यः**-कृष्णः, **अथ** अनन्तरं प्राप्य द्वारकामिति शेषः, **सत्राजिदहितवधकृत्**-सत्राजितः अहितः शत्रुः शतधन्वा, तस्य वधं करोतीति स तथोक्तः। श्वफल्कस्य श्वफल्कनामकयादवस्य सूनौ पुत्रे अक्रूरे विद्यमानमिति शेषः। **रत्नं** स्यमन्तकं **सन्दर्श्य**-दर्शयित्वा, **रामं** बलरामं, **गतरुषं** गता रुट् कोपो यस्य सः गतरुट् तम्। **व्यधित** अकरोत्। 'डुधाञ् धारणपोषणयोः' लुङात्मनेपदम्। **इन्द्रप्रस्थस्थपार्थान्**-इन्द्रप्रस्थाख्यपुरे विद्यमानान् पार्थान्, द्रष्टुकामः द्रष्टुं कामो इच्छा यस्य स तथा। **प्रतस्थे**-गतवान्, 'ष्ठा-गतिनिवृत्तौ', 'समवप्रविभ्यस्थ' इति सूत्रेण आत्मनेपदम्। लिट्। **अथ**-अनन्तरं, **सहविजयः** विजयेन अर्जुनेन सह वर्तत इति **स** तथोक्तः। **यामुनं** यमुनायाः सम्बन्धि 'तस्येद' मित्यण् प्रत्यये आदिवृद्धौ यामुनमिति रूपम्। **तीरं** तटम्। **आयन्**-आगच्छन्। **तत्र** यमुनातीरे **कालिन्दीं**-कालिन्दीनाम्नीं स्त्रियम्। लब्ध्वा प्राप्य। **यमसुतपुरकृत्** यमस्य सुतः धर्मः, तस्य पुरं इन्द्रप्रस्थं करोतीति स तथा। **द्वारकास्थः** द्वारकां प्राप्तः। **सः**-कृष्णः, **मां पातु**-रक्षतु। '**पा**-रक्षणे' लोट् परस्मैपदम्।।

अनेन कृष्णः पूर्वोक्तरीत्या पाण्डवान् विचार्य पाञ्चालदेशाद्द्वारकां प्राप्य, सत्राजिद्वधकृतं शतधन्वानं हन्तुं विचार्य, अक्रूरे मणिं न्यस्य भीत्या अश्वमारुह्य शतयोजनं पलायितं शतधन्वानं बलरामेण सह रथमारुह्य, अतिद्रुत्या मिथिलोपवनप्रदेशे चक्रेण तस्य शिरश्छित्वा, तस्मिन् मणिमदृष्ट्वा, बलरामं प्रत्युक्त्वा, स्वस्मिन् विप्रलिप्साबुध्या मैथिलनगरं प्रति गच्छन्तं बलराममनुज्ञाप्य, स्वयं च द्वारकां प्राप्य, सर्ववृ-

त्तान्तं सत्यभामायै उक्त्वा, तत्पितुः और्ध्वदैहिकं कर्म कारयित्वा, द्वारकायां अक्रूरानवस्थाननिमित्तेन नानाविधव्याधिपीडितैः स्वजनैः अक्रूरागमनार्थं प्रार्थितः, शतधन्ववधं श्रुत्वा, स्वभीत्या देशान्तरं गतम् अक्रूरं बलरामं चाहूय, अक्रूरे विद्यमानं स्यमन्तकं बलरामाय प्रदर्श्य, तं सान्त्वयित्वा, बन्धूनां व्याधिशान्तिं कृत्वा, पुनश्च अक्रूरस्यैव मणिं दत्वा, कदाचित् पाण्डवान् द्रष्टुं, बलरामादिभिस्सह इन्द्रप्रस्थाख्यनगरं प्राप्य, पाण्डवैस्सम्पूजितः,तत्प्रीत्यर्थं तत्रैव इन्द्रप्रस्थे वर्षाकाले निवसन्, कदाचित् अर्जुनेन सह मृगयार्थं वने सञ्चरन्, यमुनातीरं प्राप्य, तत्र स्वपतित्वहेतोः तपः कुर्वतीं सवितुः पुत्रीं कालिन्दीनाम्नीं प्राप्य, विश्वकर्माणमाहूय इन्द्रप्रस्थं अतिविस्तीर्णतया पुरन्दरपुरप्रख्यं कारयित्वा, पाण्डवैरनुज्ञातः स्वजनैस्सह द्वारकामेत्य, कालिन्दीविवाहं कृत्वा, तया सह रममाणः सर्वानतोषयदित्यादिकथा सूचिता।। १६।।

यो जहे मित्रविन्दामथ दृढवृषभान् सप्त बध्वाथ नीलां
भद्रां मद्रेशकन्यामपि परिजगृहे शक्रविज्ञापितार्थः।
तार्क्ष्यारूढस्सभार्यो हिमगिरिशिखरे भौमदुर्गं समेत्य
छित्वा दुर्गाणि कृन्त्वा मुरगलमरिणा देवतेड्यस्समाव्यात्।। १७।।

।। **य इति**।। **यः** कृष्णः, **मित्रविन्दां** मित्रविन्दाख्यां, **जहे** प्राप्तवान्। "हृञ्-हरणे" लिङात्मनेपदम्। **अथ**-अनन्तरं, **सप्त** सप्तसंख्याकान्, **दृढवृषभान्**, दृढाः बलिष्ठाः ते च ते वृषभाश्च, तान्, **बध्वा** पाशैर्बन्धनं कृत्वा, **नीलामपि जहे** इति पूर्वेणान्वयः। **भद्रां** भद्राख्यामपि जहे इत्यन्वयः। मद्रेशकन्यां अपि मद्रेशस्य मद्रदेशाधिपतेः कन्यां लक्षणाख्यामपि **परिजगृहे** परिगृहीतवान्। परीत्युपसर्गपूर्वक "ग्रह उपादाने" इत्यस्माल्लिडात्मने पदम्। **शक्रविज्ञापितार्थः** शक्रेण इन्द्रेण, विज्ञापितः अर्थः प्रयोजनं यस्य स तथा। "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः। **तार्क्ष्यारूढः** तार्क्ष्ये गरुडे आरुढः स्थितः "गरुत्मान् गरुडस्तार्क्ष्य" इत्यमरोक्तेः। सभार्यः भार्यया सत्यभामया सहितः। **हिमगिरिशिखरे** हिमगिरेः हिमवत्पर्वतस्य शिखरे प्रदेशविशेषे, "कूटोऽस्त्री शिखरं शृङ्ग" मित्यभिधानात्। **भौमदुर्गं** भूमेरपत्यं पुमान् भौमः, नरकासुरः, तस्य दुर्गं पुरं **समेत्य** प्राप्य, **दुर्गाणि** गिरिदुर्गादीनि, **छित्वा, मुरगलं** मुरस्य मुराख्यासुरस्य, गलं कण्ठं, "कण्ठो गलोऽथ ग्रीवाया" मित्यभिधानात्। **अरिणा** चक्रेण कृन्त्वा छित्वा, "कृती-छेदने" इत्यस्मात् क्त्वा प्रत्यये रूपमेतत्। देवतेड्यः देवैः ईड्यः स्तुत्यः, सः कृष्णः मा मां, " त्वामौ द्वितीयाया" इति द्वितीयैकवचनान्तः अस्मदोमा इत्यादेशः। अव्यात् रक्षेत्। "अव-रक्षणे" लिङ् परस्मैपदम्।।

अनेन कृष्णः कालिन्दीविवाहानन्तरं पितृष्वसुः सुतां मित्रविन्दां स्वयंवरे बलादाहृत्य सकलभूपालान् तिरस्कृत्य नग्नजिन्नामकस्य राज्ञः पुरं प्राप्य, तेन पूजितः स्वपुत्रीवरेच्छया पुंसां बलपरीक्षणार्थं नग्नजिता सम्पादितान् तीक्ष्णशृङ्गान् अतिबलिष्ठान् सप्तवृषभान् स्वयं च सप्तरूपेण लीलया पाशैर्बध्वा राजानं सन्तोष्य, तेन दत्तां तत्पुत्रीं नीलाख्यां प्राप्य, केकयदेशाधिपतेः श्रुतिकीर्तिनाम्नः पुत्रीं भद्रां च प्राप्य, सुतां च मद्राधिपतेः लक्षणां लक्षणैर्युतां, स्वयंवरे लक्ष्यवेधं कृत्वा प्राप्य, नरकासुरपीडितेन इन्द्रेण नरकासुरवधार्थं प्रार्थितः इन्द्रमनुज्ञाप्य, सभायां रुक्मिण्याः नारदानीतपारिजातपुष्पदानेन कुपितायाः सत्यभामायाः पारिजातवृक्षदानेन कोपशान्त्यर्थं स्वभार्यया सत्यभामया सह गरुडमारुह्य हिमगिरिशिखरस्थं प्राग्जोतिषाख्यं गिरिजलाग्निमुरपाशादिदुर्गैरावृतं भौमपुरं प्राप्य, गिरिदुर्गं गदया भित्वा, जलदुर्गं वायुना शोषयित्वा, वारुणास्त्रेण अग्निदुर्गं नाशयित्वा, मुरपाशदुर्गं स्वखड्गेन छित्वा, अन्तःप्रविश्य, युद्धार्थमागतं भौममन्त्रिणं पञ्चमुखं मुराख्यं निरायुधं कृत्वा, तस्य शिरांसि चक्रेण छित्वा, देवैः प्रसूनैः अभिषिच्यमानः सर्वानतोषयदित्यादिकथा सूचिता।। १७।।

त्रिंशत्पञ्चावधीद्यो सचिववरसुतान् भूमिजेनातिघोरं
युद्धं कृत्वा गजाद्यैररिहतशिरसं तं व्यधाद्भूस्तुतोऽथ।
कृत्वा राज्येऽस्य सूनुं वरयुवतिजनान् भूरिशश्चारुवेषान्
प्रापय्य द्वारकां सोऽकृत मुदमदितेः कुण्डलाभ्यामवेन्माम्।। १८।।

।। **त्रिंश दिति**।। **यः**-कृष्णः, **त्रिंशत्पञ्च** पञ्चोत्तरत्रिंशत्संख्याकान्। **सचिववरसुतान्** सचिवमन्त्रिणः "मन्त्री धीसचिवोऽमात्य" इत्यभिधानात्। तेषां वराः श्रेष्ठाश्च ते सुताश्च, तान्। **अवधीत्**-जघान। "हन-हिंसागत्योः" लुङि वधादेशे अवधीत् इति रूपम्। गजाद्यैः गजः आद्यो येषाम् अश्वादीनां तैः। सहितेनेति शेषः। **भूमिजेन**-नरकासुरेण, सहेति शेषः। **अतिघोरं**-भयङ्करम्। **युद्धं कृत्वा तं** नरकासुरं, **अरिहतशिरसं**-अरिणा चक्रेण हतम् अपहृतं शिरो यस्य सः अरिहतशिराः, तं, **व्यधात्**-अकरोत्। विपूर्वात् "डुधाञ् धारणपोषणयो" रित्यस्माल्लुङि रूपमेतत्। **अथ**-अनन्तरं, **भूस्तुतः** भुवा भूदेव्या स्तुतः, **अस्य**-भौमस्य, **सूनुं**-पुत्रं भगदत्तनामानं, **राज्ये**-राज्याधिपत्ये कृत्वा, **चारुवेषान्**-चारुः मनोहरः वेषः अलङ्कारः येषान्ते, तान्, "आकल्पवेषौ नेपथ्यम्" इत्यभिधानात्। **भूरिशः**-बहून्, **वरयुवतिजनान्**-युवतयः यौवनस्थाः स्त्रियः, वराश्च ते युवतिरूपजनाश्च तान्, **द्वारकां प्रापय्य** यापयित्वा, "गतिबुद्धिप्रत्यवसानार्थे" त्यादिना द्विकर्मकत्वम्, अदितेः अदि-

तिनाम्न्याः इन्द्रमातुः। **कुण्डलाभ्यां** कर्णभूषणाभ्याम्। **मुदं** हर्षं "मुत्प्रीतिः प्रमदो हर्ष" इत्यभिधानात्। **अकृत** अकरोत्। "डुकृञ् करणे" लुङात्मनेपदम्। **सः** कृष्णः **मां अवेत्** रक्षेत्। "अव रक्षणे" लिङ् परस्मैपदम्।।

अनेन कृष्णः मुरवधानन्तरं अन्यान् पीठ-निशुम्भ-हयग्रीवपञ्चजनाख्यान् भौममन्त्रिणो दैत्यान् हत्वा, मुरादिपञ्चमन्त्रिणां पुत्रान् प्रत्येकशः सप्तसंख्याकान् मिलित्वा पञ्चत्रिंशाख्यान् रुद्रवरादवध्यान्, हत्वा, गजादिमहत्या सेनया युक्तम्, युद्धार्थमागतं, पृथिव्यभिमानिन्यां धरादेव्यां वराहरूपिणा विष्णुना जातम्, ब्रह्मवराद- वध्यम्, नरकासुरं चक्रेण हत्वा, देवैः प्रसूनैरभिषिच्यमानः, नरकासुरस्य मात्रा धरादेव्या स्तुतः, भौमपुत्रं भगदत्तनामानं पूर्वं कुबेरं नरकासुरापहतस्वकीय 'सुप्रतीका' ख्यगजप्राप्त्यर्थं नरकपुत्रत्वेन जातं प्राग्जोतिषपुराधिपतिं कृत्वा, अन्तःपुरं प्रविश्य, पूर्वजन्मन्यग्निपुत्रतया पुरुषत्वावस्थायां स्वपतित्वहेतोः वायुं प्रति तपःकृत्वा स्त्रीत्वं प्राप्य, बदरिकाश्रमं प्राप्य, तत्रस्थनारायणानुग्रहादप्सरस्त्वं प्राप्य, राजकुले जाताः, बलाद्भौमेनापहृताः नवयौवनाः अक्षताः सद्व्रतस्थाः नानाविधालङ्करोपेताः, शतोत्तर- षोडशसहस्रसंख्याकाः स्त्रियः दृष्ट्वा, ताभिः स्वदर्शनेन सन्तुष्टाभिः, पतित्वेन व्रियमाणः तास्त्रियः कनकशिबिकास्वारोप्य द्वारकां प्रापय्य, भौमापहृतादितिकुण्डले आदाय, स्वर्गं प्राप्य अदित्यै कुण्डले दत्वा, सर्वानतोषयदित्यादिकथा सूचिता।। १८।।

इन्द्राराध्योऽमरेन्द्रप्रियतममगमाहृत्य देवान्विजित्य
प्राप्याथ द्वारकां यस्सुतमतिरुचिरं रुक्मिणीतः प्रपेदे।
भ्रातृव्यं पौण्ड्रकाख्यं पुररुधमतनोत्कृत्तशीर्षं तदीया-
पत्योत्पन्नां च कृत्यां रथचरणरुचा कालयन् कामधुक्स्यात्।। १९।।

।। **इन्द्रे ति**।। **यः** कृष्णः **इन्द्राराध्यः** इन्द्रेण आराध्यः पूज्यः, **अमरेन्द्रप्रियतमम्** अमरेन्द्रस्य-देवेन्द्रस्य, प्रियतमं-अतिप्रीतिविषयं, **अगं**-न गच्छतीत्यगः तं पारिजातवृक्षं, **आहृत्य**-अपहृत्य, **देवान्**-इन्द्रादीन् विजित्य, **अथ**-अनन्तरं द्वारकां प्राप्य, **अतिरुचिरं**-अतिमनोहरं, **सुतं**-पुत्रं, **रुक्मिणीतः**-रुक्मिण्याः "पञ्चम्यास्तसिल्" इति पञ्चम्यर्थे तसिल्प्रत्ययः। **प्रपेदे**-प्राप्तवान्, प्रपूर्वात्पदगतावित्यस्माल्लिडात्मनेपदे रूपमेतत्। **भ्रातृव्यं**-शत्रुं, "व्यन् सपत्ने" इति सूत्रेण भ्रातृशब्दात् व्यन् प्रत्ययः। **पुररुधं**-पुरं रुणद्धि द्वारकाख्यं आवृणोतीति पुररुत्, तं, **पौण्ड्रकाख्यं** पौण्ड्रकवासुदेवनामानं, **कृत्तशीर्षं**-कृत्तं छिन्नं शीर्षं शिरः यस्य स तथोक्तः तम्। "उत्तमाङ्गं शिरश्शीर्षं" इत्यभिधानात्। **अतनोत्** कृतवान्। "तनु-विस्तारे" लङ् परस्मैपदम्।

तदीयापत्योत्पन्नां-तस्य पौण्ड्रकवासुदेवस्य सम्बन्धि तदीयम्, "त्यदादीनि चे" ति वृद्धसंज्ञायां "वृद्धाच्छः" इति "छ" प्रत्यये छस्य ईयादेशे रूपमेतत्। तदीयं च तत् अपत्यं च, तत्सुत इति यावत्। तेन उत्पन्नां **कृत्यां** च दहनरूपाकृतिं च। **रथचरणरुचा**-रथचरणस्य चक्रस्य रुचा कान्त्या, **कालयन्** पलायितां कुर्वन्, **सः** कृष्णः **कामधुक्** कामं अभीष्टं दोग्धि ददातीति कामधुक्, ममेति शेषः। **स्यात्** भवेत्। "अस् भुवि" लिङ् परस्मैपदम्।।

अनेन कृष्णः अदितेः कुण्डलदानानन्तरं इन्द्रादिभिस्तुतःताननुज्ञाप्य, मार्गे विद्यमानम् इन्द्रस्यातिप्रीतिविषयं नन्दनवनं क्रीडार्थं प्रविश्य, तस्मिन्वने विद्यमानं मणिकाञ्चनात्मकं समस्तकामप्रदम् आर्तिहारिणं पारिजातवृक्षं दृष्ट्वा, सत्यभामया स्वगृहाङ्गणे स्थापयितुं प्रार्थितः, तमुत्पाट्य, गरुडांसे न्यस्य सत्यभामया सह स्वयं च गरुडमारुह्य द्वारकां प्रति गच्छन् वनपालकैः एतद्वृत्तान्तं श्रुत्वा, कोपेन शचीवचनेन दिक्पालकैस्सह असुरावेशाद्युद्धार्थमागतम् इन्द्रं पराजितं कृत्वा, सर्वान् विजित्य, तैस्तुतः, स्वकृतापराधशान्तये इन्द्रेण दत्तं मणिपर्वतस्य शृङ्गञ्चोपादाय ताननुज्ञाप्य द्वारकां प्राप्य, पारिजातवृक्षं सशृङ्गं सत्यभामाया गृहाङ्गणे न्यस्य, स्वकीयानां यथेष्टरत्नानि च दत्वा, असुरमोहनार्थं रुद्रं प्रति तपःकृत्वा, रुक्मिण्यां पुत्रं पूर्वं हरेण दग्धं मन्मथं प्रद्युम्ननामकं (विष्णोरावेशात्प्रद्युम्ननामकं) जनयित्वा, तदा नारदबोधितेन शम्बरेण शत्रुबुध्या समुद्रे क्षिप्तं मत्स्येनोपभुक्तं मत्स्यजीविभिः पुरुषैः महता जालेन गृहीतं, तन्मत्स्येन सह शम्बरगृहं प्राप्तं सूदैः मत्स्यविपाटनसमये शम्बरेण दृष्टं, पञ्चभर्तृपेतद्रौपदीदूषणापराधनिमित्तेन चतुर्मुखेन असुरदूषिता भवेति शप्तया, रूपान्तरेण शम्बरगृहं प्राप्तया रत्या रक्षितं, वर्षचतुष्टयेन प्राप्तयौवनं, स्वस्त्रिया रत्या बोधितोपायेन शम्बरासुरं हत्वा, तया सह द्वारकां प्राप्तं स्वपुत्रं दृष्ट्वा, रुक्मिण्या बन्धुभिश्च सह सन्तोषं प्राप्य, कदाचित्स्वस्य बदरिकासमवस्थानसमये द्वारकोपद्रवार्थं रात्रौ समागतं, पूर्वं वसुदेवात् दितिस्वरूपभूतायां काशीराजस्य पुत्र्यां पुत्रिकापुत्रन्यायेन जातं पौण्ड्रकवासुदेवाख्यं वेनस्वरूपं सुवर्णगरुडाद्युपेतं स्वशत्रुं, बलरामादिभिः पराजितं, पुनः काशीं प्रति गतं, बदरिकाश्रमादागत्य श्रुत्वा, पौण्ड्रकवासुदेवेन युद्धार्थमाहूतः काशीं प्रति गत्वा तस्य शिरश्छित्वा द्वारकां प्राप्य, पौण्ड्रकवासुदेवसुतेन सुदक्षिणाख्येन स्वपितृहननकोपेन, द्वारकानाशार्थं रुद्रं प्रति तपःकृत्वा अभिचारविधानेन दक्षिणाग्नौ उत्पादिताम् अग्निस्वरूपां भयङ्करचरणाद्युपेताम् असुरावेशाद्द्वारकां प्रति प्राप्तां कृत्यां जाज्वल्यमानेन अतिभयङ्करेण स्वचक्रेण पलायितां कृत्वा, तया कृत्यया वाराणसीस्थसुदक्षिणम् आभिचारकर्मकर्तारं नाशयित्वा, तदीयान् सर्वान् स्वचक्रेण नाशयित्वा

पुनः सुदर्शनं प्राप्य सर्वानतोषयदित्यादिकथा सूचिता।। १९।।

कृष्णः सूर्योपरागे निजयुवतिगणैर्भार्गवं क्षेत्रमाप्तः
तत्रायातान् स्वबन्धून् मुनिगणमपि सन्तोष्य यज्ञं स्वपित्रा।
योऽनुष्ठाप्याप्य नैजं पुरमथवदितानेकतत्त्वानि पित्रे
मातुः पुत्रान्प्रदर्श्याकृत हितमहितं मेऽपनुद्यात्स ईशः।। २०।।

।। **कृष्ण इति**।। **यः** कृष्णः, **सूर्योपरागे** सूर्यग्रहणसमये, **निजयुवतिगणैः**-स्वकीयपत्नीसमूहैः, सहेति शेषः। **भार्गवं** परशुरामेण कृतं **क्षेत्रं** स्यमन्तपञ्चकाख्यपुण्यक्षेत्रं "महतश्चतुर्मुखा" दितिवदयं निर्देशः। यद्वा "यत्र वा पितुस्तद्वा पुत्रस्ये" ति श्रुतेः भृगुशब्दः परशुरामवाची तस्मात्सम्बन्धार्थे अण् प्रत्यये भार्गवमिति रूपम्। **आप्तः**-प्राप्तः, कर्तरि क्तः। **तत्र**-क्षेत्रे, **आयातान्**-आगतान्, **स्वबन्धून्**-स्वस्य बन्धून् प्रीतिविषयान्, **मुनिगणमपि** मुनीनां समूहमपि **सन्तोष्य**-हर्षयित्वा, **स्वपित्रा**-स्वस्य पित्रा वसुदेवेन, **यज्ञमनुष्ठाप्य, नैजं**-स्वकीयं, **पुरं**-द्वारकाख्यं, **आप्य**-प्राप्य, **अथ**-अनन्तरं, **पित्रे**-वसुदेवाय, **अनेकतत्त्वानि**-भगवद्विषय(क)बहुतत्त्वानि, **वदिता**- "वद व्यक्तायां वाची" त्यस्मात् कर्तरि तृचि इडागमे वदितृशब्दनिष्पत्तिः। **मातुः**-देवक्याः, **पुत्रान्**, **प्रदर्श्य**-दर्शयित्वा, **हितं**-हर्षं, **अकृत**-अकरोत्। "डु कृञ् करणे" लुङात्मनेपदम्। **ईशः**-परमसमर्थः, **सः**-कृष्णः, **मे**-मम, **अहितं**-अनभिमतं, **अपनुद्यात्**-परिहरेत्। अपपूर्वात् "णुद प्रेरणे" इत्यस्माद्धातोः लिङ् परस्मैपदे रूपमेतत्।।

अनेन कृष्णः कदाचित्सूर्यग्रहणसमये स्वस्त्रीजनैः पुत्रपौत्रादिभिश्च सह परशुरामेण दुष्टक्षत्रियान् हत्वा तेषां रुधिरौघेन निर्मितं महाह्रदोपेतं समन्तपञ्चकाख्यं पुण्यक्षेत्रं प्राप्य तत्र गतान् नन्दादीन् पाण्डवादीन् अन्यांश्च भूपालान् वसिष्ठादिमुनींश्च सन्तोष्य, तान् मुनीन् ऋत्विजः कृत्वा, स्वपित्रा वसुदेवेन त्रिवारं यज्ञं कारयित्वा, सर्वान् तत्तद्देशं प्रत्यनुज्ञाप्य, स्वबन्धुभिस्सह द्वारकां प्राप्य, कदाचित्स्वपित्रे वसुदेवाय भगवद्विषयकजगज्जन्मादिकारणत्वरूपतत्त्वान्युपदिश्य, स्वमात्रा देवक्या कंसेन हतान् पुत्रान् द्रष्टुं प्रार्थितः बलरामेण सह सुतललोकं प्रविश्य, बलिचक्रवर्तिकृतपूजां स्वीकृत्य, तत्र विद्यमानान् कार्श्यहेतोरुपहासापराधेन देवलेन शप्तान् कालनेमिप्रसूतान्, चतुर्मुखं प्रति तपःकृत्वा अवध्यतां प्राप्तान्, हिरण्यकशिपुना स्वात्मान्यचतुर्मुखतो वरलिप्सापराधनिमित्तेन भूतले संभवध्वं तत्र स्वतातो भवतां निहन्तेति शप्तान्, कालनेमिसुतदेहतः स्वापसमये आकृष्य दुर्गया क्रमेण देवकीगर्भे स्थापितान्, षट्संख्याकान् मरीचिपुत्रान्,

कालनेमिस्वरूपेण कंसेन हतान् तानुपादाय मातुः दर्शयित्वा मातरं सन्तोष्य, स्वभुक्तस्तन्यपानेन शुद्धान् पुत्रान् मोचयित्वा सद्गतिं प्रापय्य सर्वानतोषयदित्यादिकथा सूचिता।। २०।।

रुक्मिण्या नर्मवाक्यैररमत बहुभिस्त्रीजनैर्योऽथ पुत्रा-
नेकैकस्यां प्रपेदे दशदश रुचिरान्पौत्रकानप्यनेकान्।
पौत्रस्योद्वाहकाले भृशकुपितबलाद्रुक्मिणं घातयित्वा
नन्दन्योषिद्गणेन प्रतिगृहमबलाप्रीतिकारी गतिर्मे।। २१।।

।। **रुक्मिण्या इति**।। **यः**-कृष्णः, **रुक्मिण्या**-रुक्मिणीदेव्या, सहेति शेषः। **नर्मवाक्यैः**-उपहासवाक्यैः, **अरमत**-विजहार। "रमु क्रीडायां" लङात्मनेपदम्। **बहुभिः**-स्त्रीजनैररमतेति पूर्वेणान्वयः। **अथ**-अनन्तरम्, **एकैकस्यां**-पृथक् पृथक् स्वस्त्रियां, **रुचिरान्**-मनोहरान्, **दश दश**-प्रत्येकं दशसङ्ख्याकान्, **पुत्रान्, प्रपेदे**-अजनयत् **अनेकान्**-अनेकसंख्याकान्, **पौत्रकानपि**-पौत्रानपि प्रपेद इति पूर्वेणान्वयः। **पौत्रस्य**-प्रद्युम्नपुत्रस्यानिरुद्धस्य, **उद्वाहकाले**-विवाहकाले, **भृशकुपितबलात्**-भृशं अधिकं कुपितश्चासौ बलो बलरामः, तस्मात्, **रुक्मिणं**-रुक्मिनामकं, **घातयित्वा**-नाशयित्वा, **योषिद्गणेन**-स्वस्त्रीगणेन सहेति शेषः। **नन्दन्**-हर्षं प्राप्नुवन्, **प्रतिगृहं**-प्रतिगृहेषु, "अव्ययं विभक्ती" त्यादिना वीप्सायामव्ययीभावः। **अबलाप्रीतिकारी**-अबलानां स्त्रीणां प्रीतिं हर्षं करोतीति स तथा। **सः**-कृष्णः, **मे**-मम, **गतिः**-प्राप्यस्सर्वाभीष्टदो वा, स्यादितिशेषः।।

अनेन कृष्णः कदाचिद्रुक्मिण्या अन्तर्गृहे नानाविधपुष्पादिभिरलङ्कृते तत्रस्थपर्यङ्कोत्तमे सुखेन स्थितः, रत्नदण्डोपेतबालव्यजनहस्तया रुक्मिण्या सेव्यमानः, तया सह नानाविधोपहासपूर्वकं क्रीडां कुर्वन्, गृहान्तरेष्वबलाभिस्त्रीभिश्च रममाणः, तासु स्त्रीषु प्रत्येकं दश दश पुत्रानेकैकां कन्यामपि जनयित्वा, तेषां विवाहं कृत्वा, तेषामपि पुत्रान् जनयित्वा, स्वपौत्रस्य प्रद्युम्नसुतस्यानिरुद्धस्य रुक्मिपौत्रीविवाहार्थं बलरामादिभिः रुक्मिण्या च सह रुक्मिपुरं भोजकटाख्यं प्राप्य, विवाहं कारयित्वा तस्मिन्समये कलिन्दादिप्रेरणेन बलरामपराजयार्थं बलरामेण सह अक्षैर्दीव्यन्तं बलरामेण पराजितं, बलराममुपहसन्तं रुक्मिणं कुपितेन बलरामेण घातयित्वा, सभार्यं पौत्रं रथमारोप्य स्वकीयैस्सह द्वारकां प्राप्य, प्रतिगृहं स्वस्त्रीभिस्सह क्रीडां कुर्वन् सर्वानतोषयदित्यादिकथा सूचिता।। २१।।

नानारत्नप्रदीप्तासमविभवयुतह्यष्टसाहस्रकान्ता-
गेहेष्वश्नन् शयानः क्व च जपमृगयादीनि कुर्वन् क्वचिच्च।
दीव्यन्नक्षैर्ब्रुवाणः प्रवचनमपरैर्मन्त्रयन्नेवमादि-
व्यापारान्नारदस्य प्रतिसदनमहो दर्शयन्नः स पायात्।। २२।।

सः कृष्णः, **नानारत्नप्रदीप्तासमविभवयुतह्यष्टसाहस्रकान्तागेहेषु।** नानारत्नैः-नानाप्रकाररत्नैः प्रदीप्तानि-प्रकाशमानानि च तानि असमविभवयुतानि असदृशैश्वर्ययुक्तानि च षोडशसहस्रसंख्याकस्त्रीणां गेहानि गृहाणि च तेषु, **क्वच-**क्वचित्, अस्य सर्वत्रान्वयः। **अश्नन्-**भोजनं कुर्वन्, **शयानः-**शयनं कुर्वन् **जपमृगयादीनि-** जपःगायत्र्यादिमन्त्रादिजपः, मृगया-"आखेटो मृगया स्त्रिया" मित्यमरः। क्रीडार्थं वने मृगहननादिव्यापार आदिर्येषां तानि, चरित्राणि, **कुर्वन्,** क्वचिच्च गेहे द्यूतसाधनैः अक्षैः **दीव्यन्-**क्रीडां कुर्वन्, **प्रवचनं-**वेदव्याख्यानं, **ब्रुवाणः-**कुर्वन्, **अपरैः-** उद्धवादिभिस्सहेति शेषः। **मन्त्रयन्-** राज्यविषयकालोचनं कुर्वन्। एवमादिव्यापारान् शिशुलालनाद्यनेकव्यापारांश्च, **नारदस्य प्रतिसदनं** प्रतिगृहं दर्शयन्, सः कृष्णः, **नः-**अस्मान्, पायात्। **अहो** आश्चर्यम्।।

अनेन कृष्णः कदाचित् स्वस्य बहुभार्यासुवृत्तिं ज्ञातुमागताय नारदाय, नानारत्ननिर्मितातिमनोहरह्यष्टसहस्रकान्तागृहेषु भोजनशयनाद्यनेकव्यापारान् तावत्स्वरूपैरेक एव दर्शयित्वा विस्मितेन नारदेन प्रणतः तमनुज्ञाप्य सर्वानतोषयदित्यादिकथा सूचिता।। २२।।

प्रातर्ध्यायन्प्रसन्नः कृतनिजविहितः सत्सभां प्राप्य कृष्णो
दूतं राज्ञां प्रतोष्यामरमुनिविदिताशेषकृत्यः प्रयासीत्।
शक्रप्रस्थं चमूभिर्बहुविभवयुतं बन्धुभिर्मानितोऽयं
भीमेनापात्य बार्हद्रथमथ नृपतीन् मोचयन्मे प्रसीदेत्।। २३।।

।। प्रातरिति।। यः कृष्णः, **प्रातः** अरुणोदयकाले, **प्रसन्नः** प्रसन्नान्तःकरणः, **ध्यायन्** स्वात्मानमितिशेषः। **कृतनिजविहितः** कृतानि स्वकीयानि विहितानि विध्युक्तानि स्नानसन्ध्यावन्दनादिकर्माणि येन स तथा। **सत्सभां** निर्दुष्टसभां **प्राप्य** राज्ञां भूपानां **दूतं** भृत्यं **प्रतोष्य** सन्तोष्य, **अमरमुनिविदिताशेषकृत्यः**-अमरमुनिना नारदेन विदितानि विज्ञापितानि अशेषाणि कृत्यानि कर्तव्यानि यस्य स तथोक्तः। **चमूभिः** सेनाभिः सहेति शेषः। **बहुविभवयुतं** अनेकैश्वर्योपेतं **शक्रप्रस्थं** शक्रप्रस्थाख्य

(इन्द्रप्रस्थाख्य) नगरं प्रति **प्रयासीत्** गतवान्। "प्रपूर्वात् या प्रापणे" इत्यस्माल्लुङि रूपमेतत्। अनित्यमागमशासनमित्यडागमो नेति ज्ञेयम्। **बन्धुभिः** स्वबन्धुभिः पाण्डवैः **मानितः**-पूजितः **बार्हद्रथं** बृहद्रथस्यापत्यं पुमान् बार्हद्रथः तं जरासन्धं भीमेन भीमसेनेन **आपात्य** घातयित्वा। अथानन्तरं **नृपतीन्** भूपान् **मोचयन्** निगडाद्विमोचयन्। **अयं** कृष्णः **मे प्रसीदेत्** प्रसन्नो भवेत्। "प्रपूर्वात् षद्‌लृ-विशरणगत्यवसादनेषु" इति धातोः लिङि "पाघ्राध्मे" त्यादिना सीदादेशे रूपमेतत्।।

अनेन कृष्णः कदाचित् ब्राह्मे मुहूर्ते उत्थाय पादप्रक्षालनादिकं कृत्वा प्रसन्नान्तःकरणः "एकं पज्ज्योति" रित्याद्युक्तानेकगुणविशिष्टतया स्वात्मानमेव ध्यायन्, स्नानसन्ध्यावन्दनौपासनादिकं कृत्वा, सुधर्माख्यां सभां प्राप्य, तत्र परमासने उपविष्टः सकलयादवैस्सेव्यमानः, तदा जरासन्धेन युधि विजित्यानीतैः, रौद्रमखे पशुत्वेन कल्पयितुं गिरिदर्यां प्रतिरुद्धैः अष्टशतोत्तरद्वाविंशतिसहस्रसङ्ख्याकैः, शतोत्तरषोडश सहस्रकान्ताभिरन्वितैः भूपैः जरासन्धेनात्ममोचनार्थं प्रेषितं स्वसमीपं प्राप्तं दूतं सन्तोष्य, तस्मिन्नेव समये आगतेन नारदेन पाण्डवचिकीर्षितराजसूयमखोद्योगं श्रुत्वा, तत्र गन्तुं तेन प्रार्थितः तमनुज्ञाप्य, अष्टोत्तरशतयुक्तषोडशसहस्रकान्ताभिरन्वितः पुत्रपौत्रादिभिरनेकसेनाभिश्च सह कनकमयशिबिकादिवाहनेष्वारुह्य सकलकामैः पूर्णं इन्द्रप्रस्थपुरं प्राप्य, पाण्डवैः पूजितः भीमार्जुनाभ्यां सह ब्राह्मणरूपेण जरासन्धपुरं प्राप्य, भीमेन जरासन्धेन सह पञ्चदशदिनेषु द्वन्द्वयुद्धं कारयित्वा, जरासन्धं घातयित्वा, जरासन्धेन रुद्धान् स्वबन्धून् (सबन्धून्) भूपान् विमोच्य, तैः स्तुतः तेषां मज्जनादिकं कारयित्वा, यथेष्टभाग्यानि दत्वा, तान् तत्तद्देशान्प्रति अनुज्ञाप्य, सर्वानतोषयदित्यादिकथा सूचिता।। २३।।

पुत्रं राज्येऽस्य कृत्वा हतशिरसमथो चेदिराजं विधाय
प्रोद्यन्तं राजसूयं यमसुतविहितं संस्थितं यो विधाय।
शक्रप्रस्थात्प्रयातो निजनगरमसौ साल्वभग्नं समीक्ष्य
क्रुद्धो घ्नन्नब्धिगं तं शिववरबलिनं यान्पुरं पातु नित्यम्।। २४।।

"**पुत्र**" मिति। **यः** कृष्णः, **अस्य** जरासन्धस्य पुत्रं सहदेवाख्यं कुमारं **राज्ये** मगधदेशाधिपत्ये कृत्वा, **अथो** अनन्तरं, **चेदिराजं** चेदिदेशानां राजा चेदिराजः। "राजाहःसखिभ्यष्टजिति" समासान्तटच्प्रत्ययः। तं शिशुपालं हतशिरसम्। हतं संहतं शिरो यस्य स तथा। **विधाय**-कृत्वा। **प्रोद्यंतं** उपक्रान्तम्। **यमसुतविहितम्** यमस्य सुतो धर्मराजः, तेन विहितं क्रियमाणं **राजसूयं** राजसूयनामकयागम्। **संस्थितं** समापितम्। **विधाय** कृत्वा। शक्रप्रस्थात् इन्द्रप्रस्थात्। **निजनगरं** स्वकीयद्वारकाख्यं पुरम्।

प्रयातः प्राप्तः। "कर्तरि क्तः"। **साल्वभग्नं** साल्वेन भग्नं पतितप्राकाराद्युपेतम्। निजनगरमिति अत्राप्यन्वेति। **समीक्ष्य। क्रुद्धः** कोपयुक्तः। **अब्धिगं** अब्धौ समुद्रे विद्यमानम्। शिववरबलिनम्। शिवस्य रुद्रस्य वरेण बलिनं बलिष्ठम्। तं साल्वं साल्वनामकासुरम्। **घ्नन्**-संहरन्। **पुरं**-द्वारकां प्रति, **यान्**-गच्छन्। असौ कृष्णः। **नित्यं**-निरन्तरम्। **पातु**-रक्षतु। मामिति शेषः। "पा रक्षणे" लोट् परस्मैपदम्।।

अनेन श्रीकृष्णः जरासन्धवधानन्तरं तत्पुत्रं पत्रतापाख्यरुद्रस्वरूपं सहदेवनामकं स्वभक्तं जरासन्धराज्याधिपत्ये कृत्वा भीमार्जुनाभ्यां सह इन्द्रप्रस्थं प्राप्य धर्मराजेन राजसूयनामकं यज्ञं कारयन्, तदा अग्रपूजाविषये बहुशः स्वात्मनिन्दकं चेदिदेशाधिपतिं शिशुपालं चक्रेण छित्वा उपक्रान्तं यज्ञं सम्यक् समाप्य, तत्रैव पाण्डवप्रीत्यर्थं कतिचिन्मासानुषित्वा पाण्डवैरनुज्ञातः, पुत्रमित्रकलत्रादिभिस्सह द्वारकां प्राप्य, साल्वभग्नां द्वारकां दृष्ट्वा, साल्वहननार्थं तत्समीपं प्राप्य, रुद्रप्रसादलब्धसौभविमानमारुह्य समुद्रस्योपरि विद्यमानं, पूर्वं बलिमाविश्य हरौ देवेषु च विरोधं कृतवन्तं बलिनामकासुरं, ब्रह्मदत्तसुतत्वेन जातं साल्वं चक्रेण हत्वा, देवादिभिः स्तूयमानः, द्वारकां प्राप्य, सर्वानतोषयदित्यादि कथा सूचिता।। २४।।

विप्रादाकर्ण्य धर्मं वनगतमनुजैस्सान्त्वयित्वैत्य सर्वान्
अभ्येत्य द्वारकां यो नृगमथ कुजनिं दिव्यरूपं चकार।
गत्वा वैदेहगेहं कतिपयदिवसांस्तत्र नीत्वाऽतिभक्तौ
सन्तोष्य द्वारकां यान् बहुबलसमितोऽयन्नुपप्लाव्यमव्यात्।। २५।।

।। **विप्रा दिति**।। **यः** कृष्णः, **अनुजैर्भ्रातृभिः** सहेति शेषः। **वनगतं** वनं प्राप्तम्। **धर्मं** धर्मराजम्। **विप्रात्** ब्राह्मणादाकर्ण्य श्रुत्वा, **एत्य** प्राप्य वनमिति शेषः। **सर्वान्** पाण्डवान् **सान्त्वयित्वा** अनुकूलवचनैः दुःखशमनं कृत्वा। द्वारकामभ्येत्य प्राप्य। **अथ** अनन्तरम्। **कुजनिं** कुत्सिता जनिः जन्म यस्य स तथा। तं कृकलासरूपधरम्। नृगं नृगनामकराजानम्। दिव्यरूपं मनोहररूपं चकार अकरोत्। "डु कृञ्" करणे लिट् परस्मैपदम्। वैदेहगेहं विदेहस्य विदेहदेशाधिपतेः बहुलाश्वनामकस्य राज्ञः गेहं गृहं **गत्वा** प्राप्य **तत्र** वैदेहगृहे **कतिपयदिवसान्** कतिचिद्दिनानि नीत्वा, **अतिभक्तौ** अत्यन्तं भक्तौ विदेहदेशाधिपतिश्रुतदेवनामकयादवश्रेष्ठौ च **सन्तोष्य द्वारकां यान्** प्राप्तवान्। **बहुबलसमितः** बहुबलेन बहुसेनया समितो युक्तः **उपप्लाव्यं**-उपप्लाव्याख्यपुरं। **अयन्** प्राप्नुवन् **सः** श्रीकृष्णः अव्यात् रक्षेत्। मामिति शेषः। "अव" रक्षणे लिङ् परस्मैपदम्।।

अनेन श्रीकृष्णः कदाचित्सुधर्माख्यसभायां स्वकीयैस्सेव्यमानः, अधर्मचारिणा दुर्योधनेन अक्षैः पराजितं भ्रातृभिस्सह वनं प्राप्तं धर्मराजं तत्प्रेषितब्राह्मणेन श्रुत्वा क्रोधोद्रिक्तमनाः, तूर्णं सत्यभामया सह रथमारुह्य पाण्डवसमीपं प्राप्तवान् नानाविधवचनैस्समाश्वास्य, तैरनुज्ञातः द्वारकां प्राप्य, तत्रोपवने जलरहितकूपे पतितं, कस्यचिद्ब्राह्मणस्य सम्बन्धिनं गोरूपपशुं प्रामादिकेन विधिना स्वकीयगोषु प्रविष्टम् अज्ञानतः अपहृत्यान्यस्मै दापनापराधनिमित्तेन कृकलासरूपं प्राप्तं पर्वतनिभं नृगाख्यं राजानं, तत्र वने क्रीडद्भिर्यादवैः श्रुत्वा, तैरुद्धर्तुमशक्यं तं लीलया वामेन करेणोद्धृत्य कृकलासदेहान्मोचयित्वा, तं दिव्यस्वरूपं कृत्वा, तेन राज्ञा स्तुतः, तमनुज्ञाप्य, स्वकीयानां ब्रह्मस्वापहारादि न कर्तव्यमिति धर्मशिक्षां च कृत्वा विदेहपुरवासिनं स्वभक्तं यादवश्रेष्ठं श्रुतदेवनामानं तथा विदेहदेशाधिपतिं स्वभक्तं बहुलाश्वनामकं राजानं च द्रष्टुं विदेहनगरं प्राप्य, स्वस्वगृहं प्रत्यागमनार्थम् उभाभ्यां प्रार्थितः युगपदेव रूपद्वयेन राजगृहं श्रुतदेवगृहं च प्राप्य, ताभ्यां कृतपूजां स्वीकृत्य, राजप्रीत्यर्थं तद्गृहे कतिचिन्मासानुषित्वा स्वभक्तौ राजश्रुतदेवौ सन्तोष्य ताभ्यामनुज्ञातः द्वारकां प्राप्तवान्, वनवासतः अज्ञातवासतश्च पारङ्गतान् गोग्रहे जितकौरवान्, महत्या सेनयावृतान्, उपप्लाव्यं गतान् पाण्डवान् श्रुत्वा, सन्तुष्टमनाः यादवैस्सह अक्षौहिण्या सहितः, उपप्लाव्यं प्राप्य, पाण्डवैः पूजितः सर्वानतोषयदित्यादि कथा सूचिता।। २५।।

दौत्यं कुर्वन्ननन्ताः निजरुचिरतनूर्दर्शयन् दिव्यदृष्टेः
गीतातत्त्वोपदेशाद्रणमुखविजयस्याचरन् सारथित्वम्।
नीत्वा कैलासमेनं पशुपतिमुखतो दापयित्वाऽस्त्रमस्मै
भीमेनापात्य दुष्टं क्षितिपतिमकरोद्धर्मराजं तमीडे।। २६।।

।। **दौत्य मिति**।। **यः** कृष्णः **दौत्यं** दूतस्य कर्म दौत्यम्। ब्राह्मणादित्वात् ष्यञ्। कुरुपाण्डवानां सन्धिकार्यार्थमिति शेषः। **कुर्वन्। दिव्यदृष्टेः** दिव्या दृष्टिः यस्य धृतराष्ट्रस्य तस्य। **अनन्ताः** अपरिच्छिन्नाः। **निजरुचिरतनूः**, निजाः स्वकीयाश्च ताः रुचिराः मनोहराः तनवः मूर्तयश्च ताः दर्शयन्। **गीतातत्त्वोपदेशात्** भगवद्गीतोक्ततत्त्वोपदेशात्। रणमुखविजयस्य। रणे युद्धे मुखं यस्य स रणमुखः, स चासौ विजयः अर्जुनश्च। तस्य दिव्यदृष्टेरित्यत्राप्यन्वेति। **सारथित्वं आचरन्** कुर्वन्। **एनमर्जुनं कैलासं** कैलासपर्वतं **नीत्वा** प्रापय्य। **पशुपतिमुखतः** पशुपतेः रुद्रस्य मुखतः मुखात्। **अस्त्रमस्मै** अर्जुनाय दापयित्वा। **भीमेन** भीमसेनेन **दुष्टं** दोषाकरं कलिस्वरूपम् **आपात्य** घातयित्वा। **धर्मराजं** युधिष्ठिरम्। **क्षितिपतिं** पृथिवीपतिं **अकरोत्** कृतवान्। "डु कृञ्" करणे

लङ् परस्मैपदम्। **तं** कृष्णं **ईडे** स्तौमि। अहमिति शेषः। "ईड-स्तुतौ" लड्डुत्तमपुरुषैक-वचनम् आत्मनेपदम्।।

अनेन कृष्णः उपप्लाव्यगमनानन्तरं दुर्योधनादीनां पाण्डवानां च सन्धिकार्यार्थं दौत्यं कुर्वन् धृतराष्ट्रसमीपं गत्वा, पाण्डवानां राज्यदानार्थमनुकूलवचनैर्धृतराष्ट्रं तत्सुतं दुर्योधनं च प्रबोध्य, सन्धिकार्यमनिच्छन्तं स्वबन्धनार्थमुद्युक्तं कुमतिं दुर्योधनं ज्ञात्वा, स्वमहिमप्रकाशनेन दुर्योधनादीनां भयजननार्थं धृतराष्ट्रस्य दिव्यदृष्टिं दत्वा स्वस्यापरिच्छिन्नानन्तरूपाणि दर्शयित्वा, स्वतेजसा दुर्योधनादिचक्षूंषि पिधाय तेषां भयं जनयित्वा, धृतराष्ट्रेण पूजितस्तस्य दृष्टिं पूर्ववत्पिधाय (रूपं) पुनरेव चान्धं धृतराष्ट्रं विधाय, पाण्डवसमीपं प्राप्य, तैर्युद्धोद्योगं कारयित्वा, पाण्डवसम्बन्धिसप्तसंख्याक्षौहिणीसेनायाः दुर्योधनसम्बन्ध्येकादशसंख्याकाक्षौहिणीसेनायाश्च मध्ये अर्जुनरथं संस्थाप्य तस्य सारथित्वमाचरन्, स्वबान्धवान् दृष्ट्वा तद्वधपापशङ्कया युद्धान्निवृत्तमर्जुनं दृष्ट्वा, तस्य दिव्यदृष्टिं दत्वा, तद्योग्यतानुसारेण स्वकीयविश्वरूपं दर्शयित्वा, भगवद्गीतोक्तरीत्या स्वस्यैव सर्वस्वातन्त्र्यादिरूपतत्त्वमुपदिश्य, तेन युद्धं कारयन् तदा, एकस्मिन् दिने जयद्रथेन हतं स्वपुत्रमभिमन्युं श्रुत्वा, जयद्रथस्य वधे प्रतिश्रवं कृतवन्तमर्जुनं तस्यां रात्रौ स्वप्ने कैलासगतरुद्रं प्रति नीत्वा, स्वयमेवाखिलजगत्सृष्ट्याद्यमितशक्तिमान् (अपि) "अप्यच्युतो गुरुद्वारा प्रसादकृदहं त्विति" ज्ञापयन्, अर्जुनगुरो रुद्रादर्जुनस्य वाञ्छितमुल्बणमन्त्रं दापयित्वा, अर्जुनेन सहोपप्लाव्यं प्राप्य, पाण्डवैरष्टादशदिनपर्यन्तं युद्धं कारयित्वा, कौरवान् सर्वान् घातयित्वा, भीमसेनेन गदायुद्धेन दुर्योधनं शिववरबलिनं कलिस्वरूपं घातयित्वा, ब्रह्मादिभिः स्तूयमानः शत्रुरहितं युद्धदेशं परित्यज्य पाण्डवैस्सह हस्तिनपुरं प्राप्य, धृतराष्ट्रं गान्धारीं च सान्त्वयित्वा धर्मराजं साम्राज्येऽभिषिच्य, भीमसेनं यौवराज्येऽभिषिच्य अर्जुनादीन् स्वस्वव्यापारेषु नियोज्य, तैर्जगत्पालयन् सर्वानतोषयदित्यादिकथा सूचिता।। २६।।

प्राप्तस्स्थानं यदूनां प्रियसखमकृतावाप्तकामं कुचेलं
कुर्वन्कर्माश्वमेधं निजभवनमथो दर्शयित्वाऽर्जुनाय।
पुत्रान्विप्राय दत्वा सहसहजमसौ दन्तवक्त्रं निपात्य
प्राप्याथ द्वारकां स्वां समवतु विहरन्नुद्धवायोक्ततत्त्वः।। २७।।

।। प्राप्त इति।। यः कृष्णः **यदूनां** यादवानां **स्थानं** आवासस्थानं द्वारकां प्राप्तः **प्रियसखं** प्रियः प्रीतिविषयश्चासौ सखा च तं। "राजाहस्सखिभ्यष्टजि"ति समासान्तात् टच् प्रत्यये सखिशब्दस्याकारान्तत्वम्। **कुचेलं** कुचेलाख्यस्वभक्तं। **अवाप्तकामं** अवाप्ताः

कामाः काम्यमानार्थाः येन तमकृत अकरोत्। "डु कृञ्" करणे कर्तरि लुङात्मनेपदम्। **अथो** अनन्तरं। **अश्वमेधं** अश्वमेधाख्यं **कर्म** यज्ञं कुर्वन्। **निजभवनं** स्वकीयभवनमनन्तासनं **अर्जुनाय** दर्शयित्वा, **पुत्रान्** कुमारान् **विप्राय** ब्राह्मणाय **दत्वा, सहसहजं** सहजेन सह वर्तमानं **दन्तवक्त्रं** दन्तवक्त्राख्यदैत्यं **निपात्य** हत्वा। **अथ** अनन्तरं **स्वां** स्वकीयां **द्वारकां प्राप्य विहरन्** क्रीडन्। **उद्धवायोक्ततत्त्वः** उद्धवाय उक्ततत्त्वः, उक्तानि तत्त्वानि येन स तथोक्तः। अनेन पदेन एकादशस्कन्धोक्तकथा संगृहीतेति ज्ञेयम्। **असौ** कृष्णः **समवतु** रक्षेत्। मामिति शेषः। "अव रक्षणे" लोट् परस्मैपदम्।।

अनेन कृष्णः पाण्डवानां साम्राज्यप्राप्त्यनन्तरं तैरनुज्ञात स्वकीयैस्सह द्वारकां प्राप्य, कदाचित्स्वस्यातिप्रीतिविषयं सखायं स्वेन सह गुरुकुलवासं कृतवन्तं शमदमाद्यनेकगुणोपेतं, यदृच्छालाभसन्तुष्टं, दारिद्र्यदोषेण कृशया स्वस्त्रिया **"ननु ब्रह्मन्! भवतस्सखा साक्षाच्छ्रियःपतिः। ब्रह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः। तमुपेहि महाभागं साधूनाञ्च परायणम्।। दास्यति द्रविणं भूरि सीदते ते कुटुम्बिने"** (भाग०, स्कं० १० अ० ९८-२५,२६) इत्याद्यनेकप्रकारेण प्रार्थितः, "अयं हि परमो लाभ उत्तमश्लोकदर्शन" मिति सञ्चिन्त्य मनसा स्वसमीपं प्राप्तं कुचेलं, दोर्भ्यामालिङ्ग्य स्वपर्यङ्क उपवेश्य गन्धपुष्पाक्षतादिनानाविधोपचारैः तं पूजयित्वा, भोजनादिकं कारयित्वा, तेनोपायनार्थमानीतान् पृथुकतण्डुलानुपादाय किञ्चिद्भक्षयित्वा, तेन सह गुरुकुलवासकृतव्यापारादिकथनेन तां रात्रिं नीत्वा प्रातः, तमनुज्ञाप्य, तस्य गृहं देवेन्द्रभवनसदृशं कृत्वा, तस्य सकलभाग्यानि दत्वा, कदाचित्पाण्डवान्नानाजनपदेश्वरान् भूपान् ऋषींश्चाहूय, (आश्विकं) अश्वमेधाख्ययज्ञं कुर्वन्, तृणपूगधरं---**"मम सुताः जननोत्तरक्षण एवादृश्यतां यान्ती"** ति वदन्तं, दुःखेन क्रोशन्तं, स्वसमीपं प्राप्तं कञ्चन ब्राह्मणं दृष्ट्वा, तत्पुत्ररक्षणे कृतप्रतिश्रवं **"तव तत्पुत्ररक्षणे शक्तिर्नास्ती"** ति स्वेनोक्तं वचनं असुरावेशेनानादृत्य "अग्निं प्रवेक्ष्येऽशक्तश्चे" दिति वदन्तमर्जुनमनुज्ञाप्य, ब्राह्मणस्त्रियः प्रसवकाले शस्त्रैर्दिग्बन्धनाद्युपायैः पुत्ररक्षणार्थमुद्योगं कृत्वा, जननकाल एव पूर्ववददृश्यतां प्राप्तं पुत्रं रक्षितुमशक्तं, स्वसमीपं प्राप्य वह्निप्रवेशार्थमुद्युक्तं अर्जुनं निवार्य, ब्राह्मणार्जुनाभ्यां सह रथमारुह्य उदीचीं दिशं गत्वा, सप्त वारिधीन् सप्त द्वीपांश्च क्षणेन तीर्त्वा, लोकालोकपर्वतञ्चातीत्य, अतिनिबिडमन्धतमसं चक्रेण विदार्य, घनोदकमप्यतीत्य, अनन्तासनाख्यं स्वमन्दिरं अर्जुनाय दर्शयित्वा, दूरे सरथं सविप्रं पार्थं संस्थाप्य स्वमन्दिरं प्रविश्य, तत्रस्थेन शेषशायिना अष्टभुजयुक्तेन किरीटादिभूषणैरलङ्कृतेन ज्ञानानन्दस्वरूपिणा लक्ष्मीनारायणेनैकीभूय मुहूर्तं स्थित्वा, स्वपार्षदान् सुनन्दादीन् विप्रसुतत्वेन जातान् अर्जुनस्य दर्पं निहन्तुं हरिणा तत्रानीतानुपादाय,

अप्राकृतात्स्वमन्दिरान्निस्सृत्य ब्राह्मणार्जुनाभ्यां सह रथमारुह्य समुद्रादीन् तीर्त्वा, ब्राह्मणाय सुतान् दत्वा तमनुज्ञाप्य, अर्जुनेन सह यज्ञशालां प्रविश्य, लोकशिक्षार्थमेव सार्धमुहूर्तं यज्ञविच्छेदनेन तन्निमित्तप्रायश्चित्तं कृत्वा यज्ञं समाप्य, तत्राऽगतान् ब्रह्मादीन् पूजयित्वा, स्वस्त्रीभिः पुत्रपौत्रादिबन्धुजनैश्च सह यमुनायां अवभृतस्नानं कृत्वा, वस्त्रभूषणादिभिस्सम्यगलङ्कृत्य रथमारुह्य स्वकीयैस्सह द्वारकां प्रति गच्छन् मार्गे युद्धार्थमागतं महत्या सेनया युक्तं, स्वकीयशिशुपालादिवधेन कुपितं दन्तवक्त्रं गदया हत्वा, तद्देहस्थं स्वपार्षदमनुगृह्य, तदाविष्टमसुरं तमसि निरस्य, तस्यानुजं विडूरथं चक्रेण हत्वा तमसि निरस्य तत्सैन्यं नाशयित्वा, तत्सम्बन्धिगजादिकं स्वीकृत्य, देवादिभिस्स्तूयमानः द्वारकां प्राप्य, तत्र शतोत्तरषोडशसहस्रसंख्याकाभिस्स्वस्त्रीभिः रुक्मिण्यादिप्रधानस्त्रीभिश्च सह अनेकरूपैः क्रीडां कुर्वन् पुत्रपौत्रादिभिस्सहितः सर्वान् सन्तोष्य, उद्धवाय तत्त्वानि उपदिश्य सुखेन स्थितवानित्यादिकथा सूचिता।। २७।।

रक्षन् लोकान्समस्तान्निजजननयनानन्दकारी निरस्ता-
वद्यस्सौख्यैकमूर्तिस्सुरतरुकुसुमैः कीर्यमाणोऽमरेन्द्रैः।
सिद्धैर्गन्धर्वपूर्वैर्जयजयवचनैस्स्तूयमानोऽत्र कृष्णः
स्त्रीभिःपुत्रैश्च पौत्रैस्स जयति भगवान्सर्वसम्पत्समृद्धः।। २८।।

एवं स्तोत्रकर्ता भागवताद्युक्तकथां सङ्गृह्य नक्षत्रमालिकारूपेण सप्तविंशतिश्लोकैः कृष्णं स्तुत्वा, इदानीं कृष्णोपासकानां सज्जनानामैहिकामुष्मिकसकलाभीष्टप्राप्त्यर्थं **तं यथोपासते तथैव भवती** ति श्रुत्युक्तन्यायेन तादृशानेकगुणविशिष्टतया श्रीकृष्णं स्तुवन् वस्तुनिर्देशरूपं मङ्गलमाचरति "रक्ष" न्निति।

समस्तान् लोकान् जनान् भुवनानीति वा। "लोकस्तु भुवने जन" इत्यमरोक्तेः। **रक्षन्** पालयन्। **निजजननयनानन्दकारी**-निजाः स्वकीयाश्च ते जनाश्च, तेषां नयनानि चक्षूंषि तेषामानंदं सन्तोषं करोतीति स तथा। **निरस्तावद्यः** निरस्तानि निराकृतानि अवद्यानि दोषाः येन स तथोक्तः। **सौख्यैकमूर्तिः**-सौख्यं सुखमेव एका मूर्तिर्विग्रहो यस्य स तथोक्तः। "दोषैकदृक् पुरोभागी, ह्लादैकमयीम्", "निखिलपूर्णगुणैकदेहम्"। "सदागमैकविज्ञेय" मित्यादि प्रयोगदर्शनात् संख्यार्थस्यैकशब्दस्य "पूर्वकालैकेति" सूत्रेण पूर्वनिपातः, न केवलार्थस्येति ज्ञेयम्। अमरेन्द्रैर्देवश्रेष्ठैर्ब्रह्मादिभिस्सुरतरुकुसुमैः। **सुरतरवः** पारिजातादिदेववृक्षास्तेषां कुसुमैः **पुष्पैराकीर्यमाणः**- अभिषिच्यमानः **जयजयवचनैः**-'जय जय' इति वचनानि येषां ते **तैर्गन्धर्वपूर्वैः** गन्धर्वाः

पूर्वे येषान्ते तैः। **सिद्धै**र्देवगायकैस्स्तूयमानः **भगवान्** समग्रैश्वर्यादिषड्गुणयुक्तः। **सर्वसम्पत्समृद्धः**-सकलसम्पद्भिस्समृद्धः पूर्णः। **सः** भूभारहरणाद्यनेकव्यापारविशिष्टः कृष्णः, **स्त्रीभिः** रुक्मिण्याद्यनेकस्त्रीभिः, पुत्रैः प्रद्युम्नादिपुत्रैः, पौत्रैश्च अनिरुद्धादिपौत्रैश्च सहेति शेषः। अत्र जगति जयति उत्कृष्टो वर्तते। ''जि जये'' लट् परस्मैपदे रूपमेतत्। ''जयेर्जयाभिभवयोराद्येऽर्थे सावकर्मकः। उत्कर्षप्राप्तिराद्योऽर्थः द्वितीयेऽर्थे सकर्मकः'' इति वचनाज्जयिरत्रोत्कर्षार्थः।। २८।।

एवं समापितस्तोत्रः (ग्रन्थः) श्रीमद्राघवेन्द्रतीर्थमुनिः स्वकृतस्तोत्रस्य (ग्रन्थस्य) नाम कुर्वन् तस्याप्तिमूलत्वेनाप्युपादेयत्वज्ञापनाय स्वनाम कीर्तयन् स्वस्य स्वकीयानाञ्च तत्साध्यफलमाशास्ते ''**इती**'' ति।।

इति श्रीकृष्णचारित्र्यमञ्जरी लेशतः कृता।
राघवेन्द्रेण यतिना भूयात्कृष्णप्रसाददा।। २९।।

इति शब्दः प्रकारवाची। एवंप्रकारेण राघवेन्द्रेण यतिना लेशतः संक्षेपतः कृता श्रीकृष्णस्य चारित्राणि कर्माणि तेषां मञ्जरीव मञ्जरी तत्प्रतिपादिकेति यावत्। कृष्णप्रसाददा कृष्णस्य प्रसादं ददातीति सा तथा। भूयादिति। आशिषि लिङ्। एतत्स्तोत्रस्य (ग्रन्थस्य) वक्तॄणां श्रोतॄणां च कृष्णः प्रसन्नः सर्वाभीष्टप्रदो भवतीत्यर्थः।। इति सर्वमतिमङ्गलम्।। २९।।

इति सर्वतन्त्रस्वतन्त्रषड्दर्शनाचार्यश्रीमद्वैष्णवसत्सिद्धान्तप्रतिष्ठापनाचार्यश्रीमद्विजयीन्द्रतीर्थपूज्यचरणकरकमलसञ्जातश्रीमत्सुधीन्द्रतीर्थपूज्यपादशिष्यैश्श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमैर्विरचिता श्रीकृष्णचारित्रमञ्जरी सम्पूर्णा।।

यत्प्रसादात्सम्पदस्स्युर्ब्रह्मादीनां श्रियोऽपि च।
नमस्ते रुक्मिणीसत्यभामाश्लिष्टाय सर्वदा।। १।।
लक्ष्मीनारायणाख्येन गुरुपादप्रसादतः।
कृतेयं मञ्जरीमाला कृष्णः प्रीणातु मे तया।। २।।

इति श्रीमत्परमहंसकुलशेखरश्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनगरिष्ठश्रीमदानन्दतीर्थभगवत्पादाचार्यसमलङ्कृत-विद्यासिंहासनाधीश्वरजगद्गुरुश्रीमद्राघवेन्द्रतीर्थगुरुपादशिष्येण लक्ष्मीनारायणाख्येन कृता श्रीकृष्णचारित्रमञ्जरीमालाख्या व्याख्या समाप्ता इति शम्।।

।। श्रीकृष्णार्पणमस्तु।।

श्रीः

श्रीराघवेन्द्रतीर्थविरचितः

भारततात्पर्यनिर्णयभावसंग्रहः

।। श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः।।

शरणागतरक्षणैकदीक्षामुपयाते गुरुराजसार्वभौमे।
रतिरस्तु निरन्तरा हि भूयः करुणाशालिनि राघवेन्द्रराजे।। १।।
श्रीराघवेन्द्रतीर्थार्यनिर्मितं भावसङ्ग्रहम्।
व्याख्यास्येऽहं यथाबोधं तेषामेव कृपाबलात्।। २।।

योऽग्रेऽभूद्विश्वगर्भः सुखनिधिरमितैर्वासुदेवादिरूपैः
क्रीडन् देवैरजाद्यैरगणितसुगुणो नित्यनीचोच्चभावैः।
वेदैर्वेद्योऽस्तदोषोऽप्यसुरजनमनो मोहयन् मर्त्यवृत्त्या
भक्तानां मुक्तिदाता द्विषदसुखकरः पातु सोऽस्मान् रमेशः।।१।।

श्रीमन्महाभारततात्पर्याख्यग्रन्थभावसङ्ग्रहं कर्तुकामः आद्याध्यायार्थमादौ सङ्गृह्णाति **योऽग्र** इति। यः **अग्रे** सृष्टेरादिकाले **विश्वगर्भः** विश्वं गर्भे यस्य सः विश्वगर्भः स्वोदरस्थितजगदित्यर्थः। विश्वगर्भस्सन् **सुखनिधिः** आनन्दपूर्णः अभूत् स्थितः। अगणितसुगुणः यः **नित्यनीचोच्चभावैरजाद्यैर्देवैर्ब्रह्मादिदेवैः** सह **अमितैर्वासुदेवादिरूपैः क्रीडन् अभूत्।** यः **वेदैर्वेद्यः अस्तदोषो**ऽपि **मर्त्यवृत्त्या असुरजनमनो मोहयन्** **यः भक्तानां मुक्तिदाता द्विषदसुखकरः स रमेशः अस्मान्** पातु इत्यन्वयः।। १।।

सद्ग्रन्थानां समूहे जगति विलुलिते येन तद्भावमुच्चैः
वक्तुं मध्वो नियुक्तो व्यधित सुवचसामुद्धृतिं भारतस्य।
देवोत्कृष्टस्य विष्णोः परमपुरुषतां तारतम्यं सुराणां
वायोर्जीवोत्तमत्वादिकमपि वदतां व्यासमीडे तमीशम्।। २।।

द्वितीयाध्यार्थं संगृह्णाति सद्ग्रन्थेति। सद्ग्रन्थानां भारतादिग्रन्थानां **समूहे, जगति विलुलिते** सति, अपपाठादिना व्याकुलिते सति **येन** भगवता **तद्भावं** सद्ग्रन्थानां भावं **वक्तुं** मध्वः नियुक्तः सन् **देवोत्कृष्टस्य विष्णोः परमपुरुषतां** सर्वोत्तमत्वम्, सुराणां तारतम्यं वायोः **जीवोत्तमत्वादिकमपि,** आदिपदेन अतिरोहितविज्ञानत्वादिग्रहः। **वदतां सुवचसां** समस्तसच्छास्त्राणाम् उद्धृतिं तदर्थनिर्णायकग्रन्थविशेषं महाभारततात्पर्यनिर्णयाख्यं ग्रन्थं व्यधित कृतवान् तमीशं व्यासम् ईडे स्तौमीत्यन्वयः।। २।।

आदौ रूपचतुष्टयो सृजति यो देवान् पुरानुक्रमात्
ब्रह्माण्डं पुरमब्जजादिविबुधान् सृष्ट्वा हरत्यन्ततः।
स्रष्टा पूर्ववदस्य सर्वजगतो मत्स्यादिरूपोऽभवत्
रामोऽभूदनुजान्वितो दशरथात्पायात्स नः श्रीपतिः।। ३।।

तृतीयाध्यायार्थं संगृह्णाति। आदाविति। **आदौ रूपचतुष्टयः** वासुदेवादिरूपचतुष्टयात्मकः **यः पुराऽनुक्रमात्** पूर्वकल्पीयक्रमानुसारेण **देवान्** ब्रह्मादीन् सूक्ष्मरूपेण **सृजति। ब्रह्माण्डं पुरं** च सृजति। तत इत्यध्याहार्यम्। तदनन्तरं **अब्जजादिविबुधान्** ब्रह्मादिदेवान् **सृष्ट्वा** ततः प्रलयकाले हरति। यः **अस्य जगतः स्रष्टा** यः **मत्स्यरूपः** अभवत् **दशरथादनुजान्वितः** सन् **रामः** अभूत्। **सः श्रीपतिः पायादि**त्यन्वयः।। ३।।

यद्वृद्धिर्जनमोहिनी मुदमिता यद्दर्शनात्सज्जनाः
येनार्थिप्रियकारिणा निशचरीहन्त्रा क्रतू रक्षितः।
योऽहल्यां सपतिं व्यधाद्धरधनुर्भङ्क्त्वाऽऽवहज्जानकीं
जेता वर्त्मनि भार्गवस्य नगरीं रामो गतोऽव्यात्स माम्।। ४।।

चतुर्थाध्यायं संगृह्णाति। यद्वृद्धिरिति। यस्य रामस्य **वृद्धिर्जनमोहिनी** जनस्य मन्दजनस्य मोहिनी अयथार्थज्ञानसंपादिका, यस्य **दर्शनात् सज्जनाः मुदमिताः** प्राप्ताः, **अर्थिप्रियकारिणा** विश्वामित्राय अर्थिने अभीष्टं कुर्वता, **निशचरीहन्त्रा येन क्रतुः** विश्वामित्रस्य यज्ञः **रक्षितः** पालितः, अत्र "ढ्र लोपे पूर्वस्य दीर्घोऽणः" इति दीर्घः। यः **अहल्यां** पतिशापेन शिलाभूतां गौतमभार्यां **सपतिं** स्वदर्शनेन मानुषतां प्रापयित्वा पतिभोग्यां चकार। यः **हरधनुः भंक्त्वा** छित्वा **जानकीं** जनकस्य सुता**मावहत्। वर्त्मनि भार्गवस्य** जेता **नगरीं** अयोध्यां **गतः** स रामः **मामव्या**दित्यन्वयः।। ४।।

त्यक्त्वा राज्यमितो वनं वचनतो मातुश्च काकाक्षिगं
दैत्यं व्यस्य विकर्णघोणखचरीबन्धून् खरादीन्खलान्।

मारीचं च निहत्य रावणहृतां सीतां विचिन्वन्निव
प्राप्तो वायुसुतेन सूर्यजयुजा रामोऽवताद्वन्दितः।। ५।।

पञ्चमाध्यायार्थं संगृह्णाति। त्यक्त्वेति। यः **मातुर्वचनतः राज्यं त्यक्त्वा वनमितः** प्राप्तः सन् **काकाक्षिगं** दैत्यं च **व्यस्य** संहृत्य विकर्णघोणखचर्याः छिन्नकर्ण-नासिकायाः राक्षस्याः शूर्पणखायाः बन्धून् **खलान् खरादीन् मारीचं** च **निहत्य रावणहृतां सीतां** सीताकृतिं **विचिन्वन्निव** अन्वेषमाण इव स्थितः **सूर्यजयुजा वायुसुतेन प्राप्तः** सन् **वन्दितः रामः** नः अवतादित्यन्वयः।। ५।।

सुग्रीवेण सखित्वमाप्य शपथं कृत्वा वधे वालिनः
तालान् सप्त विभिद्य वालिनिधनं कृत्वा स्वराज्ये स्थितम्।
मार्तण्डिं च विधाय मारुतियुजा याम्यां दिशं गच्छता
सीतान्वेषणमिच्छताब्धितरणे रामोऽवतात्संस्तुतः।। ६।।

षष्ठाध्यायभावमाह सुग्रीवेणेति। सुग्रीवेण सखित्वं मैत्रीभाव**माप्य वालिनो वधे** वधविषये **शपथं** प्रतिज्ञां **कृत्वा सप्ततालान् विभिद्य** छित्वा वालिनिधनं कृत्वा **मार्तण्डिं** सुग्रीवं **स्वराज्ये स्थितं** विधाय **याम्यां दिशं** दक्षिणदिशं प्रति **गच्छता सीता-न्वेषणमिच्छता मारुतियुजा** कपिसमूहेन **अब्धितरणे** अब्धितरणकाले संस्तुतः रामः अवतादित्यन्वयः।। ६।।

यस्य श्रीहनुमाननुग्रहबलात्तीर्णाम्बुधिर्लीलया
लङ्कां प्राप्य निशाम्य रामदयितां भङ्क्त्वा वनं राक्षसान्।
अक्षादीन् विनिहत्य वीक्ष्य दशकं दग्ध्वा पुरीं तां पुन-
स्तीर्णाब्धिः कपिभिर्युतो यमनमत्तं रामचन्द्रं भजे।। ७।।

सप्तमाध्यायभावं वक्ति। यस्येति। यस्यानुग्रहबलादित्यस्य सर्वत्राप्यन्वयः। **हनुमान् लीलया तीर्णाम्बुधिः** सन् **लङ्कां प्राप्य** रामदयितां निशाम्य सीताकृतिं दृष्ट्वा वनं भङ्क्त्वा अक्षादीन् राक्षसान् विनिहत्य दशकं रावणं दृष्ट्वा तां पुरीं दग्ध्वा पुन-स्तीर्णाब्धिः सन् यमनमत् तं रामचन्द्रं भजे इत्यन्वयः।। ७।।

सिन्धुं दक्षिणमागतो दशमुखभ्रात्रिष्टदोऽभ्यर्चितो
बध्वा सेतुमवाप्य राक्षसपुरीं सैन्यैः कपीनां युतः।
हत्वेन्द्रारिकरीरकर्णदशकादीन् राक्षसान् जानकी-
मादायाप्य पुरीं स्वराज्यपदवीं प्राप्तोऽवताद्राघवः।। ८।।

अष्टमाध्यायाभिप्रायमाह। सिन्धुमिति। यः दक्षिणं सिन्धुं दक्षिणसमुद्रं आगतः प्राप्तः दशमुखभ्रात्रिष्टदः दशमुखभ्राता विभीषणः तस्य इष्टप्रदाता अर्चितः सिन्धुनेति शेषः। सेतुं बध्वा राक्षसपुरीमवाप्य कपीनां सैन्यैर्युतः सन् इन्द्रारिः इन्द्रजित् करीरकर्णः, कुम्भकर्णः "घटः करीरः कलशः" इत्यादेः। दशको दशशिरः रावणः तदादीन् राक्षसान् हत्वा जानकीं सीताकृतिमादाय पुरीमयोध्यामाप्य स्वराज्यपदवीं प्राप्तः स राघवोऽवतादित्यन्वयः।। ८।।

प्राप्तः साम्राज्यलक्ष्मीं प्रियतमभरतं यौवराज्येऽभिषिच्य
स्वीयान् रक्षन् सुतौ द्वौ जनकदुहितरि प्राप्य यज्ञैर्यजन् स्वम्।
सीताहेतोर्विमोह्य क्षितिजदितिसुतानर्थितो देवसङ्घैः
सद्भिर्युक्तो हनूमद्वरद उपगतः स्वं पदं पातु रामः।। ९।।

नवमाध्यायाभिप्रायमाह। प्राप्त इति। साम्राज्यलक्ष्मीं प्राप्तः सन् यौवराज्ये प्रियतमभरतम् अभिषिच्य स्वीयान् स्वसम्बन्धिजनान् रक्षन् सन् जनकदुहितरि द्वौ सुतौ प्राप्य यज्ञैः स्वं यजन् सन् सीताहेतोः सीतार्थं, भूमौ उत्पन्नान् दैत्यान् विमोह्य मोहयुक्तान् कृत्वा देवसङ्घैः अर्चितः सन् सद्भिर्युक्तः हनूमद्वरदः स्वं पदं स्वस्थानं स्वकीयस्थानमुपगतः प्राप्तो रामः पातु इत्यन्वयः।। ९।।

क्षीराब्ध्युन्मथनादिकात्मचरितं देवैर्गृणद्भिः स्तुतः
सज्ज्ञानाय पराशराख्यमुनिना यः सत्यवत्यामभूत्।
व्यासत्वेन विधाय वेदविवृतिं शास्त्राणि सर्वाण्यपि
ज्ञानं सत्सु विधाय तद्गतकलिं निघ्नन् स नोऽव्याद्धरिः।। १०।।

दशमाध्यायाभिप्रायमाह। क्षीराब्धीति। यः क्षीराब्ध्युन्मथनादिकात्मचरितं क्षीरसमुद्रमथनाय आत्मचरित्रं गृणद्भिः वदद्भिः देवैः स्तुतः सन् सत्यवत्यां पराशराख्यमुनिना सज्ज्ञानाय सम्यग् ज्ञानाय व्यासत्वेन व्यासरूपेण अभूत् अवतारं कृतवान्। तत इति योज्यम्, ततः वेदविवृतिं विभागादिकं सर्वाणि शास्त्राणि च विधाय सत्सु ज्ञानं विधाय तद्गतं सज्जनगतकलिं निघ्नन् स हरिः नः अव्यादित्यन्वयः।। १०।।

भूपा यत्र पुरूरवप्रभृतयो जाता विधोरन्वये
यद्वाद्या भरतादयः कुरुमुखा भीष्माम्बिकेयादयः।
भूभारक्षयकाङ्क्षिभिः सुरवरैरभ्यर्थितः श्रीपतिः
तत्राविर्भवितुं सहामरगणैरिच्छन्न् हरिः पातु माम्।। ११।।

एकादशाध्यायतात्पर्यमाहः। भूपा इति। यत्र पुरूरवप्रभृतयः यद्वाद्याः यदुराजमुखाः भरतादयः कुरुमुखाः कुरुराजप्रभृतयो भूपाः राजानः भीष्माम्बिकेयादयः भीष्मधृतराष्ट्रप्रभृतयः भूपा जाताः तत्र विधोरन्वये चन्द्रवंशे भूभारक्षयकांक्षिभिः अपेक्षावद्भिः सुरवरैः देवश्रेष्ठैः अभ्यर्थितः सन् अमरगणैः सह अमरश्रेष्ठैः इति यावत्। आविर्भवितुं इच्छन् श्रीपतिर्मां पातु इत्यन्वयः।। ११।।

देवक्यां वसुदेवतोऽग्रजयुतो जातो व्रजं यो गतो
बालघ्नीशकटाक्षहा स्वजननीमान्यस्तृणावर्तहा।
यत्पूर्वं भरतश्च पाण्डुतनया यत्सेवनं जज्ञिरे
कर्तुं धर्ममरुद्वृषाश्विनरजं नन्दात्मजं नौमि तम्।। १२।।

द्वादशाध्यायाभिप्रायमाहः। देवक्यामिति। यः देवक्यां वसुदेवतः अग्रजयुतः सन् जातो, यः व्रजं गोकुलं प्राप्तः, बालघ्नी पूतना, शकटाक्षः तन्नामकदैत्यः, तयोर्हन्ता, स्वजननीमान्यः स्वजनन्या मान्यः, तृणावर्ताख्यासुरहन्ता, यदवतारात्पूर्वं भरतः भगवद्भरणे रतः भगवच्छय्यारूपः शेषः बलराम इत्यभिप्रायः। पाण्डुतनया धर्ममरुद्वृषाश्विनरजं धर्मो यमधर्मः, मरुद्वायुः, वृष इन्द्रः, अश्विनौ, नरः शेषः तज्जन्यं तत्तद्योग्यमिति यावत्। यत्सेवनं यस्य सेवनं कर्तुं जज्ञिरे तं नन्दात्मजं नौमीत्यन्वयः।। १२।।

संस्कारान् प्राप्य गर्गाद्बहुशिशुचरितैः प्रीणयन् गोपगोपीः
वत्सान् धेनूश्च रक्षन् अहिपतिदमनो यः पपौ काननाग्निम्।
विप्रस्त्रीप्रीतिकारी धृतधरणिधरो गोपिकाभिर्निशासु
क्रीडन् मल्लांश्च कंसं न्यहनदुपगतोऽव्यात्स कृष्णः पुरीं स्वाम्।।१३।।

त्रयोदशाध्यायभावं वक्तिः। संस्कारानिति। यः गर्गाचार्यात् संस्कारान् जातकर्मादीन् लब्ध्वा बहुबाललीलाभिः गोपगोपीः प्रीणयन् धेनूर्वत्सांश्च रक्षन् अहिपतिदमनः कालियाख्यनागमर्दनः काननाग्निं पपौ। विप्रस्त्रीप्रीतिकारी तद्धृतान्नभोजनादिना प्रीतिकर्ता, धृतधरणिधरः गोवर्धनपर्वतोद्धर्ता निशायां रात्रौ गोपिकाभिः क्रीडन् सन् स्वां पुरीं स्वोत्पत्तिस्थानभूतपुरीं मधुरामुपगतः मल्लान् कंसं च न्यहनत् सः कृष्णः अव्यादित्यन्वयः।।१३।।

पित्रोर्बन्धं निरस्य क्षितिपतिमकरोदुग्रसेनं गुरोर्यः
पुत्रं प्रादात्परेतं युधि विजितजरासन्धपूर्वारिवर्गः।
पार्थान् पित्रा विहीनानुपगतनगरान् यस्त्वजोऽपाद्विपद्भ्योः
नन्दादीनुद्धवोक्त्या गतविरहशुचः कारयन्मावतात् सः।। १४।।

चतुर्दशाध्यायभावं वक्ति। पित्रोरिति। यः अजः पित्रोर्मातापित्रोर्देवकीवसुदेवयोः बन्धं निगडबन्धं निरस्य परिहृत्य उग्रसेनं क्षितिपतिमकरोत्। गुरोः परेतं मृतं पुत्रं प्रादात्। युधि विजितजरासन्धपूर्वारिवर्गः पित्रा विहीनान् उपगतनगरान् पार्थान् पाण्डवान् विपद्भ्योऽपात्। ररक्ष। उद्धवोक्त्या नन्दादीन् गतविरहशुचः कारयन् सः मामवतादित्यन्वयः।। १४।।

यस्माद्व्यासस्वरूपादपि विदितसुविद्या अप्ययुश्च प्रमोदम्
पार्था द्रोणः सुतार्थं प्रतिगतभृगुपो यन्नियत्यार्थकामः।
तस्मादाप्तोरुविद्यो द्रुपदमुपगतोऽनाप्तकामः स्वविद्याः
शिष्येभ्यः कौरवेभ्यो दितिजनिरसनोऽदात्स नोऽव्यान्मुरारिः।।१५।।

पञ्चदशाध्यायाभिप्रायमाह। यस्मादिति। यस्माद्व्यासस्वरूपात् विदितसुविद्याः सन्तः प्राप्तसमीचीनविद्याः सन्तः पार्थाः मोदम् अप्ययुः प्राप्तवन्तः। अप्यायुरित्यत्र "अपीत्युपसर्ग सन्ध्यकारलोपे" अप्ययुरिति रूपसिद्धिः। **"वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः। टापं चैव हलन्तानां यथा वाचा दिशादिक"** मित्युक्तेः। अत एव माघकाव्ये पञ्चमसर्गे- **"आवाप्यधुर्वसुमतीमभिरोचमानास्तूर्णं पयोधय इवोर्मिभिरापतन्तः"** इत्युक्तम्। यन्नियत्या यत्प्रेरणया द्रोणः सुतार्थं सुतस्य क्षीरप्राप्त्यर्थं, प्रतिगतभृगुपः परशुरामं प्राप्तः परशुरामात् प्राप्तोरुविद्यः अर्थकामः गोप्राप्तिलक्षणप्रयोजनकामः द्रुपदराजं प्राप्तः अलब्धप्रयोजनवान् शिष्येभ्यः कौरवेभ्यः स्वविद्याः आदरात् तेभ्यः स्वप्रयोजनं भवेदित्यभिप्रायेण अदात्। सः दितिजनिरसनः मुरारिः नोऽव्यादित्यन्वयः।। १५।।

भूयस्त्वागतमाहवे सह जरासन्धं नृपैर्नीतये
ज्ञात्वायात्सहजान्वितोऽतिगहनं गोमन्तमत्रागतान्।
तार्क्ष्याल्लब्धकिरीट उन्नतगिरेराप्लुत्य जित्वा रिपून्
हत्वा स्वीयशृगालमात्मनगरीं प्राप्तः स नोऽव्याद्धरिः।। १६।।

षोडशाध्यायभावमाह। भूयस्त्विति। यः सहजान्वितः सन् नृपैः सह युद्धाय भूयस्तु आगतं जरासन्धं ज्ञात्वा नीतये नीत्यर्थं नत्वसामर्थ्येन अतिगहनं गोमन्तमयात्। अरिपर्वते तार्क्ष्याल्लब्धकिरीटः उन्नतगिरेराप्लुत्य आगतान् रिपून् जित्वा स्वसहजं शृगालवासुदेवं हत्वा आत्मनगरीं मथुरां प्राप्तः स हरिर्नोऽव्यादित्यन्वयः।।१६।।

भग्नाशान् नृपतीनरीन् व्यधित यः स्वर्गाधिपाग्र्यासने
लग्नो भीष्मकसत्कृतोऽथ यवनं जघ्ने सतीमात्मनः।

निघ्नां योऽकृतरुक्मिणीं समजयद्दुर्गर्वरुक्म्यादिकान्
विघ्नं सत्रजिदात्मजापतिरसौ मे घ्नन्भवेत्सर्वदा।। १७।।

सप्तदशाध्यायभावं वक्तिः- भग्नाशानिति। अरीन् नृपतीन् भग्नाशान् व्यथित। स्वर्गाधिपाग्र्यासने महेन्द्रदत्तदिव्यासने लग्नः स्थितः सन् भीष्मकराजेन सत्कृतः पूजितः। अथ कालयवनं जघ्ने संहृतवान्। यः आत्मनः निघ्नां स्वाधीनां रुक्मिणीं सतीमकृत। दुर्गर्वरुक्म्यादिकान् समजयत्। असौ सत्रजिदात्मजापतिस्सर्वदा मे विघ्नन् परिहर्ता भवेदित्यन्वयः।। १७।।

अस्त्रज्ञेष्वधिकोऽर्जुनोऽथ यदनुक्रोशेन भीमं विना
सद्धर्मे निरतं ददौ स्वगुरवे वध्वा नृपं पार्षतम्।
पुत्रौ सा द्रुपदोऽपि वह्निविबुधस्त्रीरूपकावाप्तवान्
इष्टां धर्मज आप राजपदवीं स प्रीयतां मे हरिः।। १८।।

अष्टादशाध्यायाभिप्रायमाह। अस्त्रज्ञेष्विति। यदनुक्रोशेनेत्यस्य सर्वत्रान्वयः। यस्य दयया अर्जुनः भीमं विना अस्त्रेष्वधिकः सन् सद्धर्मे निरतं पार्षतं नृपं द्रुपदराजं बध्वा गुरवे ददौ। सः द्रुपदोऽपि वह्निविबुधस्त्रीरूपकौ पुत्रौ दृष्टद्युम्नद्रौपद्याख्यौ प्राप्तवान्। धर्मज्ञः इष्टां राजपदवीं आप। स हरिर्मे प्रीयतामित्यन्वयः।। १८।।

यत्कारुण्यबलेन पाण्डुतनया निस्तीर्णनानापदः
भिक्षान्नाशिन आगमाभ्यसनिनो हत्वा बकं द्रौपदीम्।
उद्वाह्याखिलभूपतीनपि रणे जित्वा गताः स्वां पुरीम्
इन्द्रप्रस्थपुरेऽवसन् कृतधरारक्षाः स नोऽव्याद्धरिः।। १९।।

एकोनविंशाध्यायतात्पर्यमाह। यत्कारुण्यबलेनेति। यत्कारुण्यबलेन पाण्डुतनयाः निस्तीर्णनानापदः, भिक्षान्नाशिन भिक्षान्नमशनमेषामस्तीति तथोक्ताः। आगमाभ्यसनिनः विद्याभ्यासवन्तः बकासुरं हत्वा द्रौपदीमुद्वाह्य रणे अखिलभूपतीनपि जित्वा स्वां पुरीं गताः कृतधरारक्षाः सन्तः इन्द्रप्रस्थपुरे अवसन् स हरिर्नोऽव्यादित्यन्वयः।। १९।।

यः पार्थान् परिपालयन् हरिपुरे स्त्रीपुत्रसम्पद्युतान्
संहर्ता शतधन्वनोऽष्टमहिषीभर्ता सुरर्षिस्तुतः।
हत्वा भौममपाहरत्सुरतरुं बह्वीरुवाहाङ्गनाः
प्रायच्छद्धरिसूनवे स्वसहजां पायात्स नः केशवः।। २०।।

विंशत्यध्यायभावमाह। य इति। यः हरिः इन्द्रप्रस्थे स्त्रीपुत्रसम्पद्युतान् पार्थान्

परिपालयन् शतधन्वनः संहर्ता अष्टमहिषीभर्ता सुरर्षिणा नारदेन स्तुतः भौमं नरकासुरं हत्वा सुरतरुमपाहरत्। बह्वीरङ्गना उवाह, हरिसूनवे अर्जुनाय स्वसहजां सुभद्रां प्रायच्छत् सः केशवः नः पायादित्यन्वयः।। २०।।

पार्थान् लब्धसभान् विधाय मयतः प्राप्तः पुरं स्वं गतः
क्षेत्रं कौरवमर्कपर्वणि पुरीं संप्राप्य कर्ता क्रतोः।
पाण्डून् प्राप्य जरासुते विनिहते तैः कारयित्वाऽध्वरं
प्राप्तः स्वं पुरमच्युतो विजयते द्यूते जितैश्च स्मृतः।। २१।।

एकविंशत्यध्यायतात्पर्यमाह। पार्थानिति। यः पार्थान् मयतः देवतक्षकसकाशात् प्राप्तसभान् विधाय स्वपुरं प्राप्तः अर्कपर्वणि कौरवं क्षेत्रं गतः पुरीं संप्राप्य क्रतोः कर्ता पाण्डून् प्राप्य जरासन्धे विनिहते सति पाण्डवैरध्वरं राजसूयाध्वरं कारयित्वा स्वपुरं प्राप्तः द्यूते जितैस्तैः स्मृतः सः अच्युतः विजयते उत्कृष्टो वर्तते इत्यन्वयः।। २१।।

पार्था याता अरण्ये निहतनिशिचराः प्रीणयन्तो द्विजौघान्
वार्तां श्रुत्वा स्वकीयामुपगतहरिणा मानिताः सिन्धुराजम्।
जित्वा दुर्योधनादीन् हरिहयपुरुषव्रातबद्धान्विमोच्य
प्राप्ता धर्मप्रसादं यमथ मुररिपुं तुष्टुवुस्तं प्रपद्ये।। २२।।

द्वाविंशाध्यायभावमाह। पार्था इति। पार्थाः अरण्यं गताः सन्तः निहतनिशिचराः द्विजौघान् ऋषिसमूहान् प्रीणयन्तः। स्वकीयवार्तां स्वसम्बन्धिजनक्षेमसमाचारम् उपगतहरिणा आगतेन कृष्णेन श्रुत्वा सिन्धुराजं सैन्धवं जित्वा पराजित्य हरिहयपुरुषव्रातबद्धान् इन्द्रभृत्यभूतगन्धर्वसमूहैर्बद्धान् दुर्योधनादीन् विमोच्य धर्मराजस्य प्रसादं प्राप्ताः सन्तः अथ यं मुररिपुं तुष्टुवुः, तं प्रपद्ये इत्यन्वयः।। २२।।

अन्यं वेषमुपागताः पृथगितो गत्वा विराटालयं
तद्देहस्थहरेर्निषेवणपरा मल्लं तथा कीचकान्।
हत्वा गोग्रहणोद्यतानपि कुरून् जित्वा विराटार्चिताः
पार्थाः स्वान्तिकमागतं यमजितं भेजुस्तमीडेऽच्युतम्।। २३।।

त्रयोविंशाध्यायाभिप्रायमाह। अन्यं वेषमिति। पार्थाः अन्यं वेषं वेषान्तरमुपगताः प्राप्ताः इतः अरण्यात् विराटालयं गत्वा पृथक् प्रत्येकं तद्देहस्थहरेः विराटशरीरस्थभगवतः निषेवणपराः, मल्लं तथा कीचकान् हत्वा गोग्रहणोद्यतान् दुर्योधनादीन् जित्वा विराटार्चिताः विराटेन पूजिताः सन्तः स्वान्तिकमागतं स्वसमीपं प्राप्तं यं भेजुः तमजितमच्युतम् ईड इत्यन्वयः।। २३।।

यत्सम्मत्या पृषततनुजप्रेषितब्राह्मणोक्त्या
राज्यं नादादनुजजनितश्चाम्बिकेयोऽनुजस्य।
यत्साहाय्यं व्यधित नगरीं कौरवाणामवाप्तः
स्वोक्ते कृष्णस्तदनभिमतेऽवाप्तपार्थः स नोऽव्यात्।। २४।।

चतुर्विंशाध्यायभावमाह। यत्सम्मत्येति। यत्सम्मत्या पृषततनुजेन प्रेषितो यो ब्राह्मणो धौम्याचार्यः तदुक्त्या आम्बिकेयः धृतराष्ट्रः अनुजः जनिता यस्य सः अनुजजनिता तस्येति विग्रहः। पाण्डुपुत्रस्य अनुजस्य राज्यं नादात् यः कौरवाणां नगरीमवाप्तः साहाय्यं व्यधित स्वोक्ते स्ववचने तदनभिमते सति धृतराष्ट्रानभिमते सति अवाप्तपार्थः स कृष्णः नोऽव्यादित्यन्वयः।। २४।।

सेने वीक्ष्य रणोन्मुखे करुणया शस्त्रोज्झितं फल्गुनं
सद्गीतामुपदिश्य कार्मुकधरं चक्रेऽस्य यः सारथिः।
अन्योऽन्यं कुरुपाण्डवैश्च पृतनां योऽजीषयत् स्यन्दनात्
यो भीष्मं निरपातयत् सुतशरैः पाण्डोस्तमीडेऽच्युतम्।। २५।।

पंचविंशाध्यायभावमाह। सेन इति। रणोन्मुखे सेने युद्धोन्मुखं सैन्यद्वयम् वीक्ष्य करुणया शस्त्रोज्झितं शस्त्रमुज्झितं येन सः शस्त्रोज्झितः तं परित्यक्तशस्त्रं फल्गुनम् अर्जुनं यः सद्गीतामुपदिश्य कार्मुकधरं धनुर्धरं चक्रे। अस्य सारथिः कुरुपाण्डवैरन्योऽन्यं परस्परं पृतनामजीषयत् जितां कारयामास, यत्स्यन्दनात् पाण्डोः सुतशरैः भीष्मं निरपातयत्, तमच्युतमीड इत्यन्वयः।। २५।।

द्रोणे युध्यति पाण्डवैर्विनिहतं प्राग्ज्योतिषं पार्थतः
कृत्वा तस्य सुते हते निशि शिवं नीत्वार्जुनं सैन्धवम्।
तद्दत्तास्त्रबलादजीघनदतो द्रोणे हते द्रौपदेः
यो भीमं च निजास्त्रनम्रमकरोत् तं नौमि नारायणम्।। २६।।

षड्विंशाध्यायार्थमाह। द्रोण इति। यः पाण्डवैः सह द्रोणे युध्यति सति प्राग्ज्योतिषं भगदत्तं पार्थतः अर्जुनात् निहतं कृत्वा तस्य अर्जुनस्य सुते अभिमन्यौ हते सति निशि रात्रौ अर्जुनं रुद्रं प्रति नीत्वा तद्दत्तास्त्रबलात् शिवदत्तास्त्रसामर्थ्यात् सैन्धवमजीघनत् संहृतमकरोत् अतः अनन्तरं द्रौपदेः द्रुपदसुतात् धृष्टद्युम्नात् द्रोणे द्रोणाचार्ये हते सति भीमं च निजास्त्रनम्रं नारायणास्त्रविषये नम्रम् अकरोत्तं नारायणं नौमीत्यन्वयः।। २६।।

यत्सामर्थ्यबलेन सूर्यतनुजे पार्थेन युद्धे जिते
पश्चाच्छल्यमवाप्य सारथिवरं धर्मात्मजं सायकैः।
शीर्णाङ्गं कृतवत्यमुं शिबिरगं पार्थं च मृत्योरपात्
यः पार्थेन हतेऽर्कजे नृपनुतः पायात् स नः केशवः।। २७।।

सप्तविंशाध्यायभावमाह। यत्सामर्थ्यबलेनेति। यस्य सामर्थ्यबलेन सूर्यतनुजे कर्णे पार्थेन अर्जुनेन जिते सति, पश्चादनन्तरं शल्यं सारथिवरमवाप्य धर्मात्मजं धर्मराजं सायकैः शीर्णाङ्गं कृतवति सति शिबिरगम् अमुं धर्मराजं पार्थं च मृत्योरपात् "ल्यब्लोपनिमित्ता पञ्चमी" "आसनात्प्रैक्षत" इत्यादिवत्। मृत्युं परिहृत्य ररक्ष। धर्मराजसंहारार्थमुद्युक्तं पार्थं निवार्य धर्मराजं मृत्योरपालयत्। अग्रजहननोद्योगजनितापराधपरिहाराय आत्महत्यार्थमुद्यतं पार्थं, आत्मस्तुतिकरणे आत्महत्या कृता भवतीत्युक्त्वा आत्महत्याख्यमृत्युं परिहृत्य ररक्षेत्याशयः। यः पार्थतः अर्कजे कर्णे हते सति नृपनुतः धर्मराजेन नुतः स केशवः नः पायादित्यन्वयः।। २७।।

शल्ये धर्मसुताद्धते कुरुकुले पार्थैः समूहे हते
भीमेनानुजसंयुते विनिहते दुर्योधने द्रौणिना।
सुप्तानां निधने कृते निशि ततो मुक्त्वा विधेरस्त्रतः
पार्थान् राज्यमितांश्च तत्सुतसुतं योऽपात्स नोऽव्याद्धरिः।। २८।।

अष्टाविंशाध्यायभावमाह। शल्य इति। शल्ये धर्मसुतात् धर्मराजात् हते सति समस्ते कुरुकुले कौरवसमूहे पार्थैः पाण्डवैर्हते सति अनुजसंयुते दुर्योधने भीमेन हते सति निशि द्रौणिना द्रोणपुत्रेण अश्वत्थाम्ना सुप्तानां निधने कृते सति यस्ततो विधेरस्त्रतः मुक्त्वा राज्यमितान् पार्थान् तत्सुतसुतं पार्थसुतः अभिमन्युः, तत्सुतः परीक्षित् तम् अपात् ररक्ष, स हरिः नः अव्यादित्यन्वयः।। २८।।

कृष्णाभ्यामपि भूसुरैर्नृपसुतो राज्येऽभिषिक्तो द्विजै-
र्दग्धे निन्दति भिक्षुके खलतरे स्वं विप्रतीसारतः।
राज्यं त्यक्तुमथोद्यतो वचनतो यस्याप्तभीष्मस्तत-
श्शुश्रावाखिलधर्मनिर्णयमदः कृष्णद्वयं धीमहि।। २९।।

एकोनत्रिंशाध्यायभावमाह। कृष्णाभ्यामिति। कृष्णाभ्यां वासिष्ठकृष्णयादवकृष्णाभ्यां भूसुरैरपि राज्ये अभिषिक्तः नृपसुतो धर्मराजः, खलतरे विप्रतीसारतः विरोधात् निन्दति निन्दां कुर्वति भिक्षुके भिक्षुकरूपधरे दुर्योधनमित्रभूते द्विजैर्दग्धे सति स्वं राज्यं त्यक्तुमुद्यतः उद्युक्तः अथ यस्य वचनतः यद्वाक्यात् आप्तभीष्मः सन् यो भीष्मा-

दखिलधर्मनिर्णयं शुश्राव, अदः एतादृशं कृष्णद्वयं धीमहीत्यन्वयः।। २९।।

स्मृत्वायं द्युसरित्सुतो वसुरभूत् राजा यदाश्वासितः
निर्दुःखोऽपि जुगोप धर्मनिरतो जित्वा स्वराज्यं कलिम्।
यः पार्थं समबोधयन् मृतशिशुं योऽजीवयत्पाण्डवैः
यो यज्ञं समकारयत् बहुधनैर्ध्यायामि तं केशवम्।। ३०।।

त्रिंशाध्यायभावमाह। स्मृत्वेति द्युसरित्सुतो भीष्मः यं स्मृत्वा वसुरभूत्। राजा धर्मराजः यदाश्वासितः, येन आश्वासितः समाहितः सन् निर्दुःखः सन् कलिं जित्वा स्वराज्यं शशास, यः पार्थं समबोधयत्, मृतशिशुं अजीवयत्, यः बहुधनैः पाण्डवैः यज्ञं समकारयत् तं केशवं ध्यायामीत्यन्वयः।। ३०।।

यद्युक्ताः पाण्डुपुत्रा क्षितिमथ जुगुपुर्धर्मराजस्त्वरावान्
धर्मे यत्प्रीतयेऽभूत्पवनजवचनैराम्बिकेयं विरक्तम्।
व्यासात्मा यो वनस्थं त्वकृत निजमनोऽभीष्टवन्तं गतस्वं
नायं पार्थान् स्मरन्तो मुमुदुरपि पदं यस्य कृष्णं तमीडे।। ३१।।

एकत्रिंशाध्यायतात्पर्यमाह। यद्युक्ता इति। अथ कौरवहननानन्तरं यद्युक्ताः येन कृष्णेन युक्ताः पाण्डुपुत्राः धर्मराजादयः क्षितिं जुगुपुः रक्षितवन्तः। धर्मराजः पवनजवचनैः यत्प्रीतये धर्मे त्वरावान् अभूत्। यो व्यासात्मा व्यासरूपः कृष्णः गतस्वं धनादिरहितम् आम्बिकेयं धृतराष्ट्रराजं विरक्तं वैराग्यशालिनम् निजमनोऽभीष्टवन्तं वने तपश्चरणलक्षणस्वीयमनोभीष्टशालिनं वनस्थमकृत कृतवान्। पार्था अपि यस्य कृष्णस्य पादं स्मरन्तः मुमुदुः सन्तोषयुक्ता बभूवुः। तं कृष्णमीडे स्तौमीत्यन्वयः।। ३१।।

यो यष्टा विप्रशापाद्यदुकुलमवधीत् अर्थितोऽगात्स्वलोकं
देवैर्भीष्माद्युपेतो यदनु निजपदं पाण्डवा अप्यवापुः।
दैत्या यद्द्वेषतोऽन्धे तमसि निपतिता बुद्धरूपोऽभवद्यः
कल्यात्मान्ते कलेर्यः कुजननिधनकृत्पातु सोऽस्मान्सुरेशः।। ३२।।

महाभारततात्पर्यनिर्णयाशयसङ्ग्रहः।
राघवेन्द्रेण यतिना कृतः सज्ज्ञनसंविदे।।

।। भावसङ्ग्रहः सम्पूर्णः।।

द्वात्रिंशाध्यायभावमाह। यो यष्टेति। यः यष्टा यज्ञकारी विप्रशापात् यदुकुलं यदूनां कुलम् अवधीत् संहृतवान्। देवैरर्थितः भीष्माद्युपेतः सन् स्वलोकमगात्। यदनु भगवत्स्व-

लोकगमनानन्तरं पाण्डवा अपि निजपदं स्वकीयस्थानं अवापुः। यद्द्वेषतः दैत्याः अन्धन्तमसि निपतिताः। यः बुद्धरूपः अभवत् यः कलेरन्ते कल्क्यात्मा सन् कुजननिधनकृत् दुष्टजनानां नाशकः सः सुरेशः मुकुन्दः अस्मान् पातु रक्षत्वित्यन्वयः।। ३२।।

इति विद्वच्चक्रचूडामणिभिः श्रीमल्लक्ष्मीनारायणाचार्यैः
विरचिता भावसंग्रहव्याख्या सपूर्णा।

प्रातःसङ्कल्पगद्यम्

।। ॐ ।। लौकिकवैदिकभेदभिन्नवर्णात्मकध्वन्यात्मकाशेषशब्दार्थ ऋगादिसर्ववेदार्थविष्णुमन्त्रार्थपुरुषसूक्तार्थगायत्र्यर्थवासुदेवद्वादशाक्षरमन्त्रान्तर्गताद्याष्टाक्षरार्थ श्रीमन्नारामणाष्टाक्षरमन्त्रार्थवासुदेवद्वादशाक्षरमन्त्रान्तर्गतान्त्यचतुरक्षरार्थव्याहृत्यर्थ मातृकामन्त्रार्थप्रणवोपासकनां, पापाविद्धदैत्यपूगाविद्धश्रीविष्णुभक्त्याद्यनन्तगुणपरिपूर्णरमाव्यतिरिक्तपूर्वप्रसिद्धव्यतिरिक्तानन्तवेदप्रतिपाद्यमुख्यतमानंतजीवनियामकानन्तरूपभगवत्कार्य साधकपरमदयालुक्षमासमुद्रभक्तवत्सलभक्तापराधसहिष्णुश्रीमुख्यप्राणावतारभूतानाम्, अज्ञज्ञानार्थिज्ञानयोग्यभगवत्कृपापात्रभूतसल्लोककृपालुब्रह्मरुद्राद्यर्थितभगवदाज्ञां शिरसि परमादरेणानर्घ्यशिरोरत्नवन्निधाय तथा अशेषदेवताप्रार्थनां हारवत् हृदि निधाय सर्वस्वकीयसज्जनानुग्रहेच्छया कर्मभुव्यवतीर्णानाम्।

तथाऽवतीर्य सकलसच्छास्त्रकर्तॄणां सर्वदुर्मतभञ्जकानाम् अनादितः सत्सम्प्रदायपरम्पराप्राप्तश्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापकानाम् अत एव भगवत्परमानुग्रहपात्रभूतानां, सर्वदा भगवदाज्ञया भगवत्सन्निधौ पूज्यानां, तथा भगवता दत्तवराणां, द्वात्रिंशल्लक्षणोपेतानां तथा समग्रगुरुलक्षणोपेतानाम् असंशयानां प्रसादमात्रेण स्वभक्ताशेषसंशयच्छेतॄणां, प्रणवाद्यशेषवैष्णवमन्त्रोद्धारकाणां, सर्वदा सर्ववैष्णवमन्त्रजापकानां, संसिद्धसप्तकोटिमहामन्त्राणां, भगवति भक्त्यतिशयेन भगवदुपासनार्थं स्वेच्छया गृहीतरूपाणां, तत्र तत्र पृथक् पृथक् भगवतोऽनंतरूपेषु पृथक्-पृथक् वेदोक्ततदनुक्तभारतोक्ततदनुक्तसंप्रदायागतस्वेतरस्वाभिन्नतयाप्यशेषशक्तिविशेषाभ्यां पृथग् व्यवहारविषयसर्वसामर्थ्योपेतनिरवधिकानंतानवद्यकल्याणगुणपरिपूर्णानन्तगुणोपसंहर्तॄणां, तथा वेदोक्तसर्वक्रियोपसंहर्तॄणाम् एवम् अनन्तरूपावयवगुणक्रियाजात्यवस्थाविशिष्टभगवदुपासकानां, परमदयालूनां क्षमासमुद्राणां, भक्तवत्सलानां, भक्तापराधसहिष्णूनाम्।

स्वभक्तान् दुर्मार्गादुद्धृत्य सन्मार्गस्थापकानां, स्वभक्तं मामुद्दिश्य भगवतः पुरः परमदयालो क्षमासमुद्र, भक्तवत्सल, भक्तापराधसहिष्णो त्वदधीनं दीनं दूनम् अनाथं शरणागतम् एनम् उद्धर इति विज्ञापनकर्तॄणां, सर्वज्ञशिरोमणीनां अशेषगुर्वन्तर्यामिणां,

सदा भगवत्पराणां, भगवतोऽन्यत्र सर्ववस्तुषु मनस्सङ्गरहितानां, सर्वत्र सर्वदा सर्वाकारसर्वाधारसर्वाश्रयसर्वोत्पादकसर्वपालकसर्वसंहारक सर्वनियामक, सर्वप्रेरक-सर्वप्रवर्तक-सर्वनिवर्तक यथायोग्यं सर्वज्ञानाज्ञानबन्धमोक्षप्रद, सर्वसत्ताप्रद, सर्वशब्दवाच्य, सर्वशब्दप्रवृत्तिनिमित्त, सर्वगुणातिपरिपूर्णतम, सर्वदोषातिदूर, सर्वाचिंत्य, सर्वोत्तम, सर्वेश्वर, सर्वात्यन्तविलक्षण, स्वगतभेदविवर्जितत्वादिना भगवद्द्रष्टृणाम्, अभिमानादिसर्वदोषदूराणाम्,असूयेर्ष्याद्यशेषमनोदोषनिवर्तकानां, नित्यापरोक्षीकृतरमायुक्ताशेषभगवद्रूपाणाम् अत एव विलीनाशेषप्रकृतिबन्धानां, अत एव दूरोत्सारिताशेषानिष्टानाम्, अत एव अशेषभक्ताशेषानिष्टनिवर्तकानाम् प्रणवोपासकानां अस्मदादिगुरूणां श्रीमदानन्दतीर्थश्रीमच्चरणानाम्।

अन्तर्यामिन्,अनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवात्मक श्रीमध्ववल्लभ श्रीलक्ष्मीवेदव्यासात्मकाण्डस्थितानंतरूपावयव गुणक्रियाजात्यवस्थाविशिष्टरमायुक्तक्षीराब्धिशेषशायिश्रीपद्मनाभात्मकाण्डात् बहिरभिव्यक्तशुद्धसृष्टित्वेनाभिमतश्रीचतुर्मुखमुख्यप्राणोपास्यत्वाद्यनेकप्रयोजनक, अनन्तानन्तरूपमूलभूत, तथा अशेषजगत्पालनप्रयोजनक, शान्तिपत्यनिरुद्धमूलभूत, जगत्सृष्टिप्रयोजनक कृतिपतिप्रद्युम्नमूलभूत, जगत्संहारप्रयोजनक जयापतिसङ्कर्षणमूलभूत, तथा, स्वस्वसमग्रयोग्यताभिज्ञपरमानुग्रहशील, भगवत्प्रेरितचतुर्मुखादिसद्गुरूपदिष्ट, स्वस्वयोग्यभगवद्रूपगुणोपासनया, सञ्जातस्वस्वयोग्यभगवद्रूपविशेषदर्शनभोगाभ्यां, विनष्टानिष्टसञ्चितप्रारब्धलक्षणाशेषकर्मणां, स्वस्वयोग्यतानुसारेण सम्पूर्णसाधनानां, पूर्वकल्पे ब्रह्मणा सह विरजानदीस्नानेन त्यक्तलिङ्गानां, तथा, विनष्टावशिष्टेष्टाशेषप्रारब्धकर्मणां, प्रलयकाले भगवदुदरे वसताम्, आनन्दमात्रवपुषां, तदनुभवरहितानां, स्वस्वयोग्यभगवद्रूपविशेषध्यानरतानां, सृष्टिकाले भगवदुदराद्बहिर्गतानां श्रीश्वेतद्वीपदर्शनं निमित्तीकृत्य प्रधानावरणभूतस्वेच्छापसरणेन स्वस्वयोग्यानन्दाविर्भावलक्षणमुक्तिप्रदानप्रयोजनक, मायापतिश्रीवासुदेवात्मक, लक्ष्म्यात्मक प्रलयाब्धिस्थ, श्रीवटपत्रशेषशाय्यशेषजगदुदराशेष, मुक्तनाभिदेशोर्ध्वभागकुक्ष्याख्यदेश त्रिविधाशेषसंसारिनाभिदेश, अखिलतमःपतितनाभ्यधोभागदेश, श्रीभूम्यालिङ्गितकालादिचेष्टक परमाण्वाद्यशेषकालावयव, सृष्ट्यादिकर्तृशेषनामक, परमपुरुषनामक, श्रीचतुर्मुखमुख्यप्राणोपासितचरण, अनिरुद्धादिचतूरूपात्मकगायत्रीनामक, सवितृनामक, रूपविशेषात्मक, व्याप्तरूप, बृहच्छरीर, शून्याभिध, कालाभिध केवलाभिध, ब्रह्माभिध, अनन्ताभिध, रूपविशेषात्मक, निरुपचरितमूलरूप, निरुपचरितव्याप्त, अप्रतिबद्धानन्ततेजःपुञ्ज तादृशरमायुक्तरूपविशेषात्मक, गायत्रीभूत, वाक्पृथिवीश-

रीरहृदयभेदेन, षड्विधगायत्रीनामक, लोकवेदसमीररमान्तर्गत प्रणवाख्यतुरीयपादोपेत, गायत्रीपादचतुष्टयप्रतिपाद्य, वैकुण्ठस्थित अनन्तासनस्थित, श्वेतद्वीपस्थित, सर्वजीवस्थित, रूपभेदेन,चतूरूपात्मक देहव्याप्तजीवान्तर्यामिरूपभेदेन चतूरूपात्मक, निरुपचरित, सर्ववागर्थप्रतिपादक, श्रीदेव्यादिरमारूपाष्टकाभिमन्यमान चक्रशंखवराभययुक्त हस्तचतुष्टयोपेतप्रदीपवर्णसर्वाभरणभूषित, विश्वादिभगवद्रूपाष्टकप्रतिपादक, अकाराद्यष्टाक्षरात्मक, श्रीमत्प्रणवाद्यष्टमहामंत्रप्रतिपाद्याष्टरूपात्मक, मन्त्राध्यायोक्त भूवराहाद्यशेषवैष्णव मन्त्रप्रतिपाद्य भूवराहाद्यशेषरूपविशेषात्मक, रमादिमन्त्रप्रतिपाद्य रमादिनिष्ठ रमादि नामक रूपविशेषात्मक, श्रीलक्ष्मीनृसिंहात्मक, परमदयालो, क्षमासमुद्र, भक्तवत्सल, भक्तापराधसहिष्णो, देशकालाधिपते देहेन्द्रियाधिपते, सूर्यवंशध्वजरघुकुलतिलक, लक्ष्मणभरतशत्रुघ्नाग्रज, श्रीमद्धनुमदुपासितचरण, सीतापते, श्रीरामचन्द्र, त्वदाज्ञया त्वत्प्रसादात् त्वत्प्रेरणया, त्वत्प्रीत्यर्थं, त्वामुद्दिश्य त्वाम् अनुस्मरन्नेव त्वदाज्ञया नियतेन, चेष्टाप्रदप्राणनामक, धारणाप्रदधर्मनामक मन्नियामकेन, सत्ताप्रदवायुनामक मुक्तिप्रदभुक्तिनामक रूपविशेषैः, मद्हृदिस्थितेन परमदयालुना, क्षमासमुद्रेण भक्तवत्सलेन, भक्तापराधसहिष्णुना, सर्वस्वामिना सर्वप्रेरकेण, सर्वतात्विकदेवताप्रेरकेण सर्वतात्विकासुरभञ्जकेन, तथा तत्प्रेरणाप्रयुक्ताशेषदुर्मतभञ्जकेन, अत एव प्रभञ्जनशब्दवाच्येन, प्रतिदिनं प्रतिक्षणं बुद्धिशोधकेन, सर्वकर्मकर्त्रा, सर्वकर्मकारयित्रा, सर्वकर्मस्वामिना, सर्वकर्मसमर्पकेन, सर्वकर्मफलभोक्त्रा, सर्वकर्मफलभोजयित्रा, सर्वकर्मप्रेरकेण, सर्वकर्मोद्बोधकेन, सर्वकर्मशुद्धिप्रदेन, सर्वकर्मसिद्धिप्रदेन, सर्वकर्मनिष्ठेन, सर्वकर्मसाक्षिणा, सर्वकर्मनिष्ठभगवद्रूपोपासकेन, अशेषजीवनिःसंख्यानादिकालीनधर्माधर्मद्रष्ट्रा, स्वेच्छयोद्बोधकेन, तद्वाचककपिलोपासकेन,रमाव्यतिरिक्तपूर्वप्रसिद्धव्यतिरिक्तानन्तवेदप्रतिपाद्यमुख्यतमानन्तगुणपरिपूर्णेन सर्वदोषदूरेण, त्वच्चित्ताभिज्ञेन, त्वच्चित्तानुसारचित्तेन, त्वत्परमानुग्रहपात्रभूतेन, मद्योग्यताभिज्ञेन, श्रीभारतीरमणेन, रुद्राद्यशेषदेवतोपासितचरणेन, मम सर्वास्ववस्थासु चित्रधा विचित्रधा त्वदुपासकेन, श्रीमुख्यप्राणेन प्रेरितः सन्, त्वत्संस्मृतिपूर्वकं शयनात् समुत्थाय, अद्यतनं स्ववर्णाश्रमोचितं देशकालावस्थोचितं नित्यनैमित्तिककाम्यभेदेन, त्रिविधं त्वत्पूजात्मकं कर्म यथाशक्ति यथाज्ञप्ति यथावैभवं करिष्ये। मदाज्ञाकारिभिः विद्यासम्बन्धिभिः देहसम्बन्धिभिश्च त्वदीयैः अशेषैः जनैः त्वत् सर्व कर्तृत्वकारयितृत्वाद्यनुसन्धानपूर्वकं कारयिष्ये च।

इति श्रीराघवेन्द्राख्ययतिना कृतमञ्जसा।
प्रातःसङ्कल्पगद्यं स्यात् प्रीत्यै माधवमध्वयोः।।

।। श्रीप्रातःसङ्कल्पगद्यं सम्पूर्णम्।।

।। इति श्रीराघवेन्द्रयतिविरचितं प्रातः सङ्कल्पगद्यं सम्पूर्णम्।।

।। श्रीकृष्णार्पणमस्तु।।

सर्वसमर्पणगद्यम्

जाग्रत्स्वप्नसुषुप्त्याख्यावस्थात्रयनियामक मदन्तर्यामिमुख्यप्राणान्तर्गतविश्वतैजसप्राज्ञात्मकहिंकारादिषट्सामप्रतिपाद्यषट्कालनियामक अनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेववराहनरसिंहषण्मूर्त्यात्मक स्वहृदयमध्यस्थितसुषुम्नानाडीदक्षिणपार्श्वस्थितपञ्चाशत् संख्याकपिङ्गलनाडीषु तदुत्तरपार्श्वस्थिततावत्संख्याक-अच् व्यञ्जनवर्ण-प्रतिपाद्य तावत्संख्याकेडानाडीषु तत्तद्योग्यतत्कालानुसारप्राप्त तत्तन्नाडिस्थित बृहतीछन्दऋक्सहस्रगत षट्त्रिंशत् सहस्रहंस स्वराख्याक्षरप्रतिपाद्य तन्निष्ठ तन्नियामक प्रातर्माध्यंदिनसायमाख्य सवनत्रय तत्तत् कालीनतदभिमानि वसुरुद्रादित्योपास्य परमाणुसम्बन्धि तावत्संख्याकाहर्नियामकाहर्नामक, मुख्यप्राणोपास्य रमायुक्त पुरुषरूपात्मक प्रादेशमात्र हृदयव्यापक प्रादेशपरिमितस्थानेशात्मकदेहान्तर्गतदेहाङ्गुष्ठपरिमित जीवान्तर्गतजीवाङ्गुष्ठपरिमितस्वहृदयकमलकर्णिकामूलस्थितमूलेशात्मकतावत्परिमितकर्णिकाग्रस्थितबिम्बरूपे जीवेशत्वदृष्ट्याऽनादिकालतः प्राप्तमदीये शुभाशुभकर्मणोर्मध्ये शुभकर्मानुसारतः तत्प्रेरितेन मुख्यप्राणेन तत्वाभिमानिदेवताद्वारानुकारितावस्थात्रयनियामकानुभवकालघटितश्रीविष्णुस्वातन्त्र्य स्मृतिप्रधानक नित्यनैमित्तिककाम्यभेदेन त्रिविधविद्याश्रित स्ववर्णाश्रमोचित सङ्कल्पित भगवत्पूजात्मक कर्मजन्यफलेनापरोक्ष ज्ञानात्पूर्वान्तःकरणशुद्धिद्वारा तदुपासकेन ततः परं भगवदिच्छया प्राप्तनिजगुरूपदिष्ट स्वबिम्बविषयक पूर्णसच्चिदानन्दात्मकचतुर्गुणाद्युपासनजिज्ञासाद्युपासादिभिः स्वबिम्बापरोक्षज्ञानोत्पादकेन मनुष्योत्तमानारभ्य चतुर्मुखपर्यन्तानां पञ्चविधमुक्तियोग्यानां च स्वबिम्बोपासिनां लिङ्गापगमे स्वरूपानन्दाविर्भाववैचित्र्यानन्दप्रदज्ञानेन त्वयि समर्पितेन त्वत्पूजैवास्तु।। १।।

तत्तथा मदीयशुभाशुभकर्मणोर्मध्ये अशुभकर्मानुसारेण त्वत्प्रेरितमुख्यप्राणेन तत्त्वाभिमान्यसुरमारभ्य कलिपर्यन्तानां तमोयोग्यानां पापबाधिभिः गदायुधप्रदानेन महातमसि स्थितानां दुःखानुभवेन स्वरूपभूतदुःखातिशयप्रदातेति ज्ञानेन त्वयि समर्पितेन त्वत्पूजैवास्तु।। २।।

।। इति श्रीराघवेन्द्रयतिविरचितं सर्वसमर्पणगद्यं सम्पूर्णम् ।।

।। श्रीकृष्णार्पणमस्तु।।

नदीतारतम्यस्तोत्रम्

विष्णुपादाब्जसम्भूता गङ्गा सर्वाधिका मता।
ततो गोदावरी न्यूना कृष्णवेणी ततोऽधमा।। १।।

स्वामिचन्द्रापुष्करिण्यौ मानसं च सरोवरम्।
कृष्णवेण्याः समास्ताभ्यः कावेरी च सरस्वती।। २।।

हीनेऽन्योन्यसमे ताभ्यां ऊना च सरयू तथा।
तुङ्गभद्रा समा तस्याः कालिन्द्यूना ततोऽधमा।। ३।।

नर्मदासिन्धुसरितौ तत्समा भवनाशिनी।
ततः कुमुद्वती नीचा ततो नीचा मलापहा।। ४।।

ताम्रपर्णी भीमरथी मञ्जुला च पिनाकिनी।
पृथक् सागरगामिन्यो नद्यो भीमरथी समाः।। ५।।

ततोऽन्याः सरितो नीचाः तटाकाश्च ततोऽधमाः।
ततो नीचाः पुष्करिण्यो देवखाताश्च तत्समाः।। ६।।

ततो वाप्योऽधमास्ताभ्यः कूपाः सर्वाधमा मताः।
स्वोत्तमार्घ्यं प्रदातव्यम् अवरासु न चान्यथा।। ७।।

राघवेन्द्रेण यतिना ब्रह्माण्डाख्यपुराणगः।
इत्युद्धृतः सारभागो नदीनीचोच्चसूचकः।। ८।।

।। इति श्रीराघवेन्द्रयतिविरचितं नदीतारतम्यस्तोत्रं सम्पूर्णम्।।

।। श्रीकृष्णार्पणमस्तु।।

।। श्रीः ।।

श्रीमद्राघवेन्द्रतीर्थविरचितम्

भगवद्ध्यानप्रकरणम्

ॐ रेचकपूरककुम्भकक्रमेण वायुधारणानन्तरं ध्यानं कुर्यात् इत्युक्तं भवति। हृदये अधोमुखं हृत्कमलम् अष्टपत्रं प्रणवेन ऊर्ध्वमुखं कृत्वा तेनैव विकास्य तत्कर्णिकायां सूर्यमण्डलं तदुपरि चन्द्रमण्डलं तदुपरि अग्निमण्डलं ध्यात्वा तज्ज्वालायां रमारूपदिव्यरत्नमण्डपमध्ये दिव्यरत्नखचित सुवर्णमयपीठं ध्यात्वा तत्र पीठदेवताः परदेवताद्याः आवाह्य पीठोपरि षट्कोणपद्मभूमिं ध्यात्वा कोणेषु देवस्याग्रे अग्निं, दक्षिणे सूर्यं, सव्ये चन्द्रमसं, देवस्य सव्ये श्रियं, दक्षिणे भुवं, पृष्ठभागे दुर्गां ध्यात्वा तत्र षट्कोणभूमौ अष्टदलपद्मरमारूपं ध्यात्वा तत्र पद्मदले सूर्यं, केसरेषु सोमं, कर्णिकायां हुताशनं ध्यात्वा प्रत्येकं पद्माष्टदलेषु मध्ये कर्णिकायां च **'विमलोत्कर्षणीज्ञाना क्रिया योगा तथैव च। प्रह्वी सत्या तथेशानाऽनुग्रहा चेति शक्तयः।'** इति परमात्ममूर्तिं ध्यात्वा कर्णिकोपरि तमोरजस्सत्वमिति क्रमेण त्रिगुणाभिमानिनीं लक्ष्मीं तल्पाकारं छत्रकारफणं शेषं ध्यात्वा तदुपरि गुणत्रयाभिमानिनीं चित्रासनरूपां लक्ष्मीं ध्यात्वा तत्र स्वरूपहृदये बाह्याङ्गुष्ठपरिमितं तत्पृष्ठभागे हृत्कमलमध्यव्यापिनं प्रादेशपरिमितं तदधः कर्णिकामूले अङ्गुष्ठाग्रप्रमाणं च परमात्मानं 'नारायणमनामयम्' इत्याद्युक्तप्रकारेण लक्ष्मीधराभ्यामित्यादि तंत्रसारोक्त (१/९-१०) आवरण देवतासहितं उद्यदादित्यवर्णं मेघश्यामं वा ध्यायेत्।

तदुक्तम्-

एकान्ते तु शुचौ देशे जनसम्मर्दवर्जिते।
कुशाजिनाद्यासनगः स्वस्थचित्तः स्थिरः शुचिः।। १।।

समं कायशिरोग्रीवं धारयन्नचलं मनः।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।
अष्टपत्रं तदूहृदये पद्ममध्ये सूर्येन्दुवह्निगम्।। २।।

पीठतन्मध्यमध्यस्थं नारायणमनामयम्।
उद्यदादित्यसङ्काशतेजसानुपसम्पदाम्।। ३।।

सहस्रामितसूर्याणां सर्वदाऽऽनन्दरूपिणम्।
अतिरक्ततलं भास्वन् स्वरव्रातविभूषितम्।। ४।।

वृत्तजङ्घं वृत्तजानुं हस्तिहस्तोरुमीश्वरम्।
महाकटितटत्त्णद्धकाञ्चीपीताम्बरोज्ज्वलम्।। ५।।

निम्ननाभिं च त्रिवलिं सुवृत्तोदरबन्धनम्।
विस्तारवक्षसंभ्राजत् कौस्तुभामुक्तकन्धरम्।। ६।।

वनमालाधरं हारभुजकेयूरभूषितम्।
पृथुदीर्घचतुर्बाहुं शङ्खचक्रगदाम्बुजम्।। ७।।

रक्तमुन्निद्रपद्माक्षं स्फुरन् मकरकुण्डलम्।
पूर्णचन्द्रायुतोद्रिक्तकान्तिसन्मुखपङ्कजम्।। ८।।

सुभ्रुवं सुलल्लाटं तं किरीटाबद्धमूर्धजम्।
निःशेषदुःखशमनं नित्यानन्दं शुचिस्मितम्।। ९।।

लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः।
ब्रह्मवायुशिवाहीशविपैः शक्रादिकैरपि।।
सेव्यमानोऽधिकं भक्त्या नित्यनिःशेषशक्तिमान्।। १०।।

अथ द्वात्रिंशल्लक्षणानि ज्ञेयानि

भुज नेत्र हस्त जानु नासिक पञ्च पञ्चस्थानेषु दैर्ध्याणि। पाणिपाद नेत्रान्त तालु जिह्वाधरोष्ठ नख सप्तस्थानेषु रक्तानि। कक्ष कुक्षि वक्षो घ्राण स्कन्ध ललाटेषु औन्नत्त्यम्। ललाट कुक्षिचक्षुषु पृथुत्वम्। ग्रीवा प्रतनु पृष्ठ जङ्घेषु लघुत्वम्। स्वररसना नाभिषु त्रिषु स्थानेषु गम्भीरत्वं चिन्तयेत्।

तदुक्तम्-

पञ्चदीर्घः पञ्चसूक्ष्मः सप्तरक्तः षडुन्नतः।
त्रिपृथुः त्रि (लघु) त्रिषु गम्भीरः इत्यादि।।

एवं द्वात्रिंशल्लक्षणानि सत् (अत्र लघुशब्दः ह्रस्वमिति विज्ञेयः)। तथा दक्षिणकरे सहस्रारं चक्रं अष्टास्रा गदा। शतावर्तशङ्खं लक्षणं ज्ञेयम्। वामकरे सहस्रदलं पद्मं चक्रलक्षणेन ज्ञेयम्। पादतलयोः वज्राङ्कुशध्वजपद्मरेखाः ध्येयाः। तच्चोक्तं हृदये ध्येयमूर्तयस्तिस्रः।

सर्वेशो हृदये व्याप्तः प्रादेशः पुरुषोत्तमः।
जीवानां स्थानमुद्दिष्टः सर्वदैव सनातनः।।

हृत्कर्णिकामूलगः स्वाङ्गुष्ठाग्रप्रमाणकः।
मूलेश इति नामास्मिन् सर्वे जीवाः प्रतिष्ठिताः।।

अङ्गुष्ठमात्रपुरुषे कर्णिकाग्रस्थिते हरौ।
प्रविशन्ति सुषुप्तौ तु प्रबुद्ध्यन्ते ततः परम्।।
सोऽयं पुरुषो त्रिरूपो भगवान् हृदयाख्ये प्रवर्तितः।।

इदं च यावत्कालं ध्यानवशात् हृदये वासनामयमूर्तिः प्रतीयेत तावत्कालं ध्यानाभ्यासं कुर्यात्। वासनामयप्रतीत्यनन्तरं तस्यां प्रतिमायां वासनामयायां अनवद्योदक (परिशुद्धोदकेन स्नानं) गन्धपुष्पादिभिः मनसा सङ्कल्पितां पूजां कृत्वा तत्प्रतिमान्तर्गतविष्णौ पूर्णनिर्दोषः पूर्णानन्दात्मकः पूर्णस्वामी पूर्णगुणः इति ध्यानं कुर्यात्।

इदं च ध्यानं यावत् स्वरूपज्ञगुरुदर्शनं तावत् कुर्यात्। पश्चात् तादृशगुरूक्तप्रकारेण यावदपरोक्षं ध्यानं कुर्यात्। ध्यानसमाप्त्यनन्तरं सम्पुटाकारेण मातृकान्यासतत्त्वन्यासौ कृत्वा ध्यानं हरौ समर्पयेत्।

।। इति श्रीराघवेन्द्रयतिविरचितं भगवद्ध्यानप्रकरणम्।।

।। श्रीकृष्णार्पणमस्तु।।

।। श्रीमद्राघवेन्द्रगुरुसार्वभौमविरचितः ।।

तन्त्रसारमन्त्रोद्धारः

नानायुधधरं देवं नानारूपं रमापतिम्।
प्रणम्य तन्त्रसारोक्तमन्त्रानुद्धृत्य दर्शये।। १।।

अस्य श्रीप्रणवमन्त्रस्य अन्तर्यामी ऋषिः। दैवीगायत्री छन्दः। परमात्मा देवता। ॐ अं विश्वाय नमः। उं तैजसाय नमः। मं प्राज्ञाय नमः। नाभिहृच्छिरांसि स्थानम्। ॐ भूः हृदयाय नमः। भुवः शिरसे स्वाहा। स्वः शिखायै वषट्। भूर्भुवः स्वः कवचाय हुम्। सत्यम् अस्त्राय फट्। इति पञ्चाङ्गानि।

उद्यद्भास्वत्समाभासश्चिदानन्दैकदेहवान्।
चक्रशङ्खगदापद्मधरो ध्येयोऽहमीश्वरः।।

लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः।
ब्रह्मवायुशिवाहीशविपैः शक्रादिकैरपि।
सेव्यमानोऽधिकं भक्त्या नित्यनिःशेषशक्तिमान्।।

मूर्तयोऽष्टावपि ध्येयाश्चक्रशङ्खवराभयैः।
युक्ताः प्रदीपवर्णाश्च सर्वाभरणभूषिताः।।

इति ध्यानम्। मातृकामन्त्राणां प्रणववत्सर्वं ध्येयम्।। ॐ ॐ ॐ इति मन्त्रः।।

नारायणाष्टाक्षरमन्त्रस्य अन्तर्यामी ऋषिः। देवी गायत्री छन्दः। नारायणो देवता। ॐ ॐ विश्वाय नमः। नं तैजसाय नमः। मों प्राज्ञाय नमः। नां तुरीयाय नमः। राम् आत्मने नमः। यम् अन्तरात्मने नमः। णं परमात्मने नमः। यं ज्ञानात्मने नमः। इति वर्णन्यासः। पज्ञानुनाभिहृदयवाङ्नासानेत्रकेषु चेति स्थानम्। कृद्धोल्काय स्वाहा हृदयाय नमः। महोल्काय स्वाहा शिरसे। वीरोल्काय स्वाहा शिखायै वषट्। द्युल्काय स्वाहा कवचाय हुम्। सहस्रोल्काय स्वाहा अस्त्राय फट्। इति पञ्चाङ्गानि।

ध्यानम् प्रणववत्। ॐ नमो नारायणाय। इति मन्त्रः।

व्याहृतिमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। हरिर्देवता। ॐ भूः अनिरुद्धाय नमः। भुवः प्रद्युम्नाय नमः। स्वः सङ्कर्षणाय नमः। भूर्भुवः स्वः वासुदेवाय नमः। इत्यक्षरन्यासः। नाभिहृन्मुखकेशेषु सर्वेषु स्वः कवचाय हुम्। भूर्भुवःस्वः अस्त्राय फट्। इति पञ्चाङ्गानि। उद्यदादित्यवर्णश्च ज्ञानमुद्राभयोद्यतः। लक्ष्मीधराभ्यामाश्लिष्ट इति ध्यानम्। ॐ भूः। ॐ भुवः ॐ स्वः। ॐ भूर्भुवः स्वः ॐ इति मन्त्रः।

ॐ अस्य **श्रीवासुदेवद्वादशाक्षरमन्त्रस्य** अन्तर्यामी ऋषिः। जगती छन्दः। श्रीवासुदेवो देवता। ॐ ॐ केशवाय नमः। नं नारायणाय नमः। मों माधवाय नमः। भं गोविन्दाय नमः। गं विष्णवे नमः। वं मधुसूदनाय नमः। तें त्रिविक्रमाय नमः। वां वामनाय नमः। सुं श्रीधराय नमः। दें हृषीकेशाय नमः। वां पद्मनाभाय नमः। यं दामोदराय नमः। अष्टाक्षराणां स्थानेषु बाह्वोरूर्वोश्च विन्यसेत्। इत्यक्षरन्यासः। व्यस्तैः समस्तैः पादैः पञ्चाङ्गानि। अच्छवर्णोऽभयवरकरो ध्येयोऽमितद्युतिः। लक्ष्मीधराभ्यामाश्लिष्ट इति ध्यानम्। ॐ ॐ नमो भगवते वासुदेवाय ॐ इति मन्त्रः।

गायत्रीमन्त्रस्य ब्रह्मा ऋषिः गायत्रीछन्दः। सवितृनामा नारायणो देवता। तम्। त्सम्। विम्। तुम्। वम्। रेम्। णिम्। यम्। भम्। र्गोम्। देम्। वम्। धीम्। मम्। हिम्। धिम्। योम्। नम्। प्रम्। चोम्। दम्। याम्। दोःपत्सन्धिषु साग्रेषु। नाभिहृन्मुखकेषु स्थानेष्वक्षरन्यासः। ॐ हृदयाय नमः। भूः। भुवः। स्वः। इति पञ्चाङ्गानि।

प्रोद्यदादित्यवर्णश्च सूर्यमण्डलमध्यगः।
चक्रशङ्खधरोऽङ्कस्थःदोर्द्वयोर्ध्येय एव च।।

इति ध्यानम्। ॐ तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॐ। इति मन्त्रः।

पुरुषसूक्तमन्त्रस्य नारायण ऋषिः। अनुष्टुप् छन्दः। अन्त्या त्रिष्टुप्छन्दः। पुरुषो देवता। अन्यत्सर्वं तारवत्।

विष्णुषडक्षरमन्त्रस्य अन्तर्यामी ऋषिः। देवीगायत्री छन्दः। विष्णुर्देवता। ॐ विं विश्वाय नमः। षं तैजसाय नमः। णं प्राज्ञाय नमः। वें तुरीयाय नमः। नम् आत्मने नमः। मः अन्तरात्मने नमः। पञ्चानुनाभिहन्नासिकेषु स्थानम्। अक्षरैः षडङ्गन्यासः।

इन्द्रनीलसमाभासश्चिदानन्दैकदेहवान्।
चक्रशङ्खगदापद्मधरो ध्येयोऽहमीश्वरः।।

इत्यादि ध्यानम् ॐ विष्णवे नमः। इति मन्त्रः।

वराहमन्त्रस्य ब्रह्मा ऋषिः। अनुष्टुप् छन्दः। वराहो देवता। ॐ हृदयाय नमः। वराहाय शिरसे स्वाहा। भूधराय शिखायै वषट्। परमात्मने कवचाय हुम्। सर्वज्ञाय नेत्राभ्यां वषट्। सर्वशक्तये अस्त्राय फट्। इति षडङ्गानि।

श्यामः सुदर्शनदराभयसद्वरेतो
भूम्या युतोऽखिलनिजोक्तपरिग्रहैश्च।

ध्येयो निजैश्च तनुभिः सकलैरुपेतः
कोलो हरिः सकलवाञ्छितसिद्धयेऽजः।।

इति ध्यानम्। ॐ हुं नमो भगवते वराहरूपाय भूर्भुवःस्वः पतये भूपतित्वं मे देहिं। द (दा) दापय स्वाहा। इति एको मन्त्रः।

अष्टाक्षरवराहमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। वराहो देवता। पूर्वोक्तषडङ्गानि। ध्यानम्। ॐ हुं वराहाय नमः।

अस्य मन्त्रस्य ब्रह्मा ऋषिः। धृतिच्छन्दः। पूर्वोक्ते एवाङ्गन्यासध्याने। ॐ हुम् नमो भगवते महावराहाय स्वाहा।

श्रीकराष्टाक्षरमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। नारायणो देवता। भीषय भीषय हृदयाय नमः। त्रासय त्रासय शिरसे स्वाहा। प्रमर्दय प्रमर्दय शिखायै वौषट्। प्रध्वंसय प्रध्वंसय कवचाय हुम्। रक्ष रक्ष अस्त्राय फट्। इति पञ्चाङ्गानि।

आदित्यचन्द्रावपि चक्रशङ्खगदाप्रसूनाख्यनिधी दधानः।
द्वाभ्यां कराभ्याम् वसु तर्पयन्सःस्वाङ्कस्थलक्ष्मीर्गरुडांससंस्थः।।

उत्तिष्ठ श्रीकर स्वाहा इति मन्त्रः।

नृसिंहमन्त्रस्य ब्रह्मा ऋषिः। अनुषुप् छन्दः। नृसिंहो देवता। व्यस्तैः समस्तैः पादैः सर्वज्ञायेति षडङ्गानि।

ध्यायेन्नृसिंहमुरुवृत्तरवित्रिनेत्रं
जानुप्रसक्तकरयुग्ममथापराभ्याम्।

चक्रं दरं च दधतं प्रियया समेतं
तिग्मांशुकोट्यधिकतेजसमग्र्यशक्तिम्।। इति ध्यानम्।

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्।। इति मन्त्रः।

चतुर्विंशाक्षरनृसिंहमन्त्रस्य ब्रह्मा ऋषिः। गायत्रीच्छन्दः। नृसिंहो देवता। पदैः व्यस्तैः समस्तैः षडङ्गानि। ध्यानम् पूर्ववत्। जय जय नृसिंहाय सर्वज्ञाय महातेजोबलवीर्याय स्वाहा। इति मन्त्रः।

नृसिंहगायत्रीमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। नृसिंहो देवता द्विरावृत्तैः पादैः षडङ्गानि। ध्यानम् पूर्ववत्। नारसिंहाय विद्महे महाबलाय धीमहि। तन्नोऽनन्तः प्रचोदयात्। इति मन्त्रः।

हंसमन्त्रस्य ब्रह्मा ऋषिः गायत्री छन्दः। हंसो देवता द्विरावृत्तैः षडङ्गानि।

ध्यायेद्रवीन्द्रकरमिन्दुसहस्रलक्षस्वकान्तिं
प्रियासहितमास्थितमिन्दुबिम्बे।
शङ्खारिदोर्द्वयमुदर्कमहेन्दुबिम्बात्
संसिच्यमानममृतेन रमाधिनाथम्।।

ॐ हंसः सोहं स्वाहा ॐ इति त्रयो मन्त्राः। एत एव ॐ ह्रीम् इत्याभ्यां मन्त्राभ्यां युक्ता पञ्च मन्त्राः।

मुख्यप्राणेन मद्देहे मन्त्रत्रयजपः सदा।
अनुग्रहाय मे विष्णोः प्रीतये क्रियते हि सः।।

एकविंशत्सहस्रात्मा सषट्शतमहर्निशम्।
तत्सर्वं विष्णुपूजाऽस्तु प्रीयेताम् प्राणमापती।। इति समर्पणम्।

अन्नाधिपतिमन्त्रस्य ब्रह्मा ऋषिः। धृतिछन्दः। अन्नाधिपतिर्देवता। पादैः षडङ्गन्यासः।

ध्यायेत्सुशुक्लमरविन्ददलायताक्षं सौवर्णपात्रदधिभोज्यमथामृतं च।
दोर्भ्यां दधानमखिलैश्च सुरैः परीतं शीतांशुमण्डलगतं रमया समेतम्।

इति ध्यानम्। ॐ **नमो भगवते विष्णवे अन्नाधिपतये स्वाहा।** इति मन्त्रः।

वामनाष्टाक्षरमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। वामनो देवता। व्यस्तैः समस्तैः पादैः पञ्चाङ्गानि।

उद्यद्रविप्रभमरीन्द्रदरौ गदां च ज्ञानं च बिभ्रतमजं प्रियया समेतम्।
विश्वप्रकाशमभितः प्रतिभासयन्तं भासा स्वया विष्णुमजादिवन्द्यम्।।

ॐ वां वामनाय नमः। इति मन्त्रः।

अस्य मन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। **अमृतात्मने नमः** इति मन्त्रः।

त्रिविक्रममन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। त्रिविक्रमो देवता। द्विरावृत्तैः पादैः षडङ्गानि। ध्यानम् पूर्ववत्। **त्रिविक्रमाय विद्महे विश्वरूपाय धीमहि। तन्नो विष्णुः प्रचोदयात्।** इति मन्त्रः।

परशुरामषडक्षरमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। परशुरामो देवता। वर्णैः षडङ्गन्यासः।

अङ्गारवर्णमभितोऽण्डबहिःप्रभाभिर्व्याप्तं परश्वधधनुर्धरमेकवीरम्।
ध्यायेदजेशपुरुहूतमुखैः स्तुवद्भिरावीतमात्मपदवीं प्रतिपादयन्तम्।।

इति ध्यानम्। रां रामाय नमः। इति मन्त्रः।

रामषडक्षरमन्त्रस्य ब्रह्मा ऋषिः गायत्रीछन्दः। रामो देवता। वर्णैः षडङ्गन्यासः।

श्यामं रवीन्द्वमितदीधितिकान्तियुक्तं ज्ञानं शरं च दधतं प्रियया समेतम्।
स्वात्मस्वरूपममितं हनुमन्मुखेषु सन्दर्शयन्तमजितं स्मरतोरुगीर्भिः।।

इति ध्यानम्। रां रामाय नमः। इति मन्त्रः।

भार्गवाष्टाक्षरमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः भर्गवरामो देवता। व्यस्तैः समस्तैः पादैः पञ्चाङ्गानि। ध्यानम् पूर्ववत्। ॐ ॐ भां भार्गवाय नमः। इति मन्त्रः।

गोपालकृष्णमन्त्रस्य ब्रह्मा ऋषिः। धृतिच्छन्दः। गोपालकृष्णो देवता। पदैः पञ्चाङ्गानि।

ध्यायेद्धरिन्मणिनिभं जगदेकवन्द्यं सौन्दर्यसारमरिशङ्खवराभयानि।
दोर्भिर्दधानमजितं सरसं च भैष्मीसत्यासमेतमखिलप्रदमिन्दिरेशम्।।

क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा इति मन्त्रः।

अस्य **कृष्णषडक्षरमन्त्रस्य** ब्रह्मा ऋषिः। गायत्री छन्दः। कृष्णो देवता। पूर्णज्ञानात्मने। पूर्णैश्वर्यात्मने। पूर्णप्रभात्मने। पूर्णानन्दात्मने। पूर्णतेजआत्मने। पूर्णशक्त्यात्मने। अस्त्राय फट् इति षडङ्गानि। ध्यानं पूर्ववत्। ॐ क्लीं कृष्णाय नमः इति मन्त्रः।

वेदव्यासमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। वेदव्यासो देवता। पूर्ववदेवाङ्गन्यासः।

विज्ञानरोचिःपरिपूरितान्तर्ब्रह्माण्डकोशं हरितोपलाभम्।
तर्काभयेतं विधिशर्वपूर्वगीर्वाणविज्ञानदमानतोऽस्मि।।

इति ध्यानम्। व्यां वेदव्यासाय नमः इति मन्त्रः।

अस्य **व्यासगायत्रीमन्त्रस्य** ब्रह्मा ऋषिः। गायत्री छन्दः। वेदव्यासो देवता। पूर्ववदङ्गन्यासः।

ध्यायेच्छशाङ्कशतकोट्यधिसौख्यकान्तिं
संसिच्यमानममृतोरुघटैः सुरेशैः।
वर्णाभिमानिभिरजेशमुखैः सहैव
पञ्चाशता प्रतिगिरन्तमशेषविद्याः।।

इति ध्यानम्। पूर्णज्ञानाय विद्महे पूर्णानन्दाय धीमहि। तन्नो व्यासः प्रचोदयात्। इति मन्त्रः।

हयग्रीवमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। हयग्रीवो देवता। न्यासः पूर्वत्रेव।

वन्दे तुरङ्गवदनं शशिबिम्बसंस्थं चन्द्रावदातममृतात्मकरैः समन्तात्।
अण्डान्तरं बहिरपि प्रतिभासयन्तं शखाक्षपुस्तकसुबोधयुताब्जबाहुम्।।

नस्तो मुखादपि निरन्तरमुद्गिरन्तं विद्या अशेषत उताब्जभवेशमुख्यैः।
संसेव्यमानमतिभक्तिभरावनम्रैः लक्ष्म्याऽमृतेन सततं परिषिच्यमानम्।।

इति ध्यानम्। हां हयग्रीवाय नमः इति मन्त्रः।

कपिलमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। कपिलो देवता कृष्णमन्त्र इवाङ्गानि।

प्रोद्यद्दिवाकरसमानतनुं सहस्रसूर्योरुदीधितिभिराप्तसमस्तलोकम्।

ज्ञानाभयाङ्कितकरं कपिलं च देवं ध्यायेदजादिसमितिं प्रतिबोधयन्तम्।।

इति ध्यानम्। ॐ कं कपिलाय नमः इति मन्त्रः।

दत्तात्रेयमन्त्रस्य ब्रह्मा ऋषिः। बृहती छन्दः। दत्तात्रेयो देवता। पूर्वत्रेवांगानि।

प्रोद्यद्दिवाकरसहस्रतनुं सहस्रसूर्योरुदीधितिभिराप्तसमस्तलोकम्।
ज्ञानाभयाङ्कितकरं कपिलं च देवं ध्यायेदजादिसमितिं प्रतिबोधयन्तम्।।

इति ध्यानम्। ॐ दं दत्तात्रेयाय नमः। इति मन्त्रः।

धन्वन्तरिमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। धन्वन्तरिर्देवता। कृष्णमन्त्र इवाङ्गानि।

चन्द्रौघकान्तिममृतात्मकरैर्जगन्ति सञ्जीवयन्तममितात्मसुखं परेशम्।
ज्ञानं सुधाकलशमेव च सन्दधानं शीतांशुमण्डलगतं स्मरतात्मसंस्थम्।।

इति ध्यानम्। ॐ धं धन्वन्तरये नमः। इति मन्त्रः

दुर्गामन्त्रस्य कश्यप ऋषिः। गायत्री छन्दः। दुर्गा देवता। आ। ई। ऊ। ऐ। औ। अः। एतैर्ह्रींकारेण सप्ताङ्गानि।

कौशेयरक्तवसनामरविन्दनेत्रां पाशाङ्कुशाभयवरोत्पलपद्महस्ताम्।
ताम्बूलनीलोत्पलचक्रशङ्खान् शूलं च तर्जनमथो दधतीं त्रिनेत्राम्।
श्यामां समस्तवरहारविभूषणाढ्यां ध्यायेद्विधीशनुतपादयुगां जनित्रीम्।।

इति ध्यानम्। ॐ दुं दुर्गायै नमः इति मन्त्रः।

हिरण्यगर्भमन्त्रस्य भृगु ऋषिः पङ्क्ति छन्दः। ब्रह्मा देवता। ब्रह्मणे नमः हृदयाय नमः। धात्रे नमः। शिरसे स्वाहा। विरिञ्चाय नमः। शिखायै वषट्। अजाय नमः। कवचाय हुम्। पद्माय नमः अस्त्राय फट्। इति पञ्चाङ्गानि।

ध्यायेन्निषण्णमजमच्युतनाभिपद्मे प्रोद्यद्दिवाकरसमूहनिकाशमस्य।
मातृप्रकारकरमुत्तमकान्तिमद्भिर्वक्त्रैः सृजंतमखिलाः परमार्थविद्याः।।

इति ध्यानम्। **ब्रह्मणे नमः** इति मन्त्रः। तस्यैवान्यो मन्त्रः। हिरण्यगर्भाय नमः इति।

प्राणमन्त्रस्य भृगु ऋषिः। पङ्क्तिच्छन्दः। मुख्यप्राणो देवता। प्राणाय। अपाना-

य। व्यानाय। उदानाय। समानायेति पञ्चाङ्गानि।

उद्यद्रविप्रकरसंनिभमच्युताङ्के स्वासीनमस्य नुतिनित्यवचःप्रवृत्तिम्।
ध्यायेद्गदाभयकरं सुकृताञ्जलिं तं प्राणं यथेष्टतनुमुन्नतकर्मशक्तिम्।।

इति ध्यानम्। प्राणाय अपानाय व्यानाय उदानाय समानाय नम इति पञ्च मन्त्राः।

ब्रह्माणीभारतीमन्त्रयोः दीर्घतमा ऋषिः। पङ्क्तिच्छन्दः। ब्रह्माणीभारत्यौ देवते। अक्षरैरङ्गन्यासः।

उद्यद्दिवाकरसमूहनिभां स्वभर्तुरङ्कस्थितामभयसद्वरबाहुयुग्माम्।
मुद्रां च तत्त्वदृशये वरपुस्तकं च दोर्युग्मकेन दधतीं स्मरतात्मविद्याम्।।

इति ध्यानम्। **ब्रह्माण्यै नमः। भारत्यै नमः** इति मन्त्रौ।

शिवमन्त्रस्य वामदेव ऋषिः। पङ्क्तिच्छन्दः। शिवो देवता वर्णैरङ्गन्यासः।

ध्येयः पञ्चमुखो रुद्रः स्फटिकामलकान्तिमान्
विद्युच्छुभ्रासितरजःश्यामान्यस्य मुखानि च।
जटावबद्धेन्दुकलः प्रियायुङ्नागभूषणः।।

इति ध्यानम्। शिवाय नम **इति मन्त्रः।**

पार्वतीमन्त्रस्य वामदेवर्षिः पङ्क्तिच्छन्दः। शिवो देवता। वर्णैरङ्गन्यासः। भवानी देवता वर्णैरङ्गानि। गौरी वराभयकरा ध्येया पीताम्बरा च सा। इति ध्यानम्। शिवायै नमः। इति मन्त्रः।

शेषषडक्षरमन्त्रस्य सनत्कुमार ऋषिः। गायत्री छन्दः शेषो देवता। वर्णैरङ्गानि।

दधानो हलसौनन्दौ श्वेतवर्णः कृताञ्जलिः।
सहस्रमूर्धाऽद्वितीयकर्णश्रूषः प्रियायुतः।
वनमाली नीलवासाः ध्येयो विष्णोस्तु पृष्ठतः।।

इति ध्यानम्। शं शेषाय नमः। इति मन्त्रः।

गरुडमन्त्रस्य कश्यप ऋषिः। पङ्क्तिच्छन्दः। गरुडो देवता। वर्णैरङ्गानि।

ध्येयः सदाऽयं पक्षीन्द्रः सुधापूर्णं हिरण्मयम्।
दधानः कुम्भमभयं पीतशुक्लारुणो हरिः।
कृष्णाश्वाज्ञानुतो नाभेः कण्ठात् कादन्त एव च।

प्रियायुक् पुरतो विष्णोः पक्षतुण्डसमन्वितः।
जङ्गमस्थावरविषहृदयं सर्वकामदः।।

क्षिप ॐ स्वाहा इति मन्त्रः।

इन्द्रादिलोकपालमन्त्राणां कश्यप ऋषिः। पङ्क्तिः छन्दः। इन्द्रादिर्देवता। सर्वकामार्थसिद्ध्यर्थ्ये विनियोगः। वर्णैरङ्गानि।

पीतसितरक्तश्वेतरक्तशुक्लाश्च वर्णतः।
सप्रियाः साभया वज्रशक्तिदण्डासि पाशिनः।
गदाकुमुदशूलर्ष्टिखड्गिनो भूषणोज्ज्वलाः।।

इति ध्यानम्। इन्द्राय नमः। अग्नये नमः। यमाय नमः। निरृत नमः। वरुणाय नमः। वायवे नमः। कुबेराय नमः। ईशानाय नमः। इति मन्त्राः।

स्कन्दमन्त्रस्य कौशिक ऋषिः। गायत्री छन्दः। स्कन्दो देवता। वर्णैरङ्गानि।

कौशिकोऽस्य मुनिर्वह्निवर्णः षण्मुख उज्ज्वलः।
धनुः शक्तिधरो ध्येयः कामदो भयनाशनः।।

इति ध्यानम्। कामदो भयनाशनः इत्यस्य वराभयमुद्र इत्यर्थः। रं स्कन्दाय नम इति मन्त्रः।

सौराष्टाक्षरमन्त्रस्य कौशिको ऋषिः। गायत्री छन्दः। सूर्यो देवता घृणये सूर्याय आदित्याय सूर्याय घृणये इति षडङ्गानि। पद्मयुगलधरो ध्येयोऽरुणवर्णो रविः। इति ध्यानम्। घृणि सूर्य आदित्य इति मन्त्रः।

गणेशमन्त्रस्य कौशिको ऋषिः। गायत्री छन्दः। गणेशो देवता। द्विरावृत्तैः पादैरङ्गानि।

रक्ताम्बरो रक्ततनू रक्तमाल्यानुलेपनः।
महोदरो गजमुखः पाशदन्ताङ्कुशाभये।
बिभ्रद्ध्येयो विघ्नहरः कामदस्त्वरया ह्ययम्।।

इति ध्यानम्। ॐ क्षिप्रप्रसादाय नमः। इति मन्त्रः।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्राघवेन्द्रयतीन्द्रकृत-श्रीमत्तन्त्रसारमन्त्रोद्धारः।।

।। श्रीराघवेन्द्रयतिविरचितः ।।

प्रमेयसंग्रहः

निर्दोषानन्तकल्याणगुणपूर्णो नारायणः स्वस्वावतारैस्तथा अंशरूपैर्गजतुरगशरीरस्थैः तदाकाररूपैरेकीभूतः स्वसंहृतचेतनाचेतनात्मकं जगत् स्वोदरे तारतम्येन निवेश्य प्रकृत्यात्मकप्रलयोदकस्थश्रीरूपवटपत्रोपरि शिशुरूपी सन् ब्रह्मायुःपरिमितकालं योगनिद्रया शेते। स चास्योपचारतो निमेषमात्रम्। तदाऽव्याकृताकाशकालमूलजडप्रकृत्येकपञ्चाशद्वर्णादयो अनादिनित्यपदार्थाः व्याप्ततया वर्तन्ते। ततो ब्रह्मायुरष्टमांशकाले सर्ववेदाभिमानिन्या रमया सृष्ट्यर्थम् असंख्यातवेदैः संस्तुतः स्वामी सर्वदा अवाप्तसर्वकामत्वेन प्राप्तव्यप्रयोजनाभावेऽपि केवलं लीलया रमायाश्च पुत्रादिलक्षणमहदैश्वर्यं दातुं, तथा ब्रह्मादिसकलभक्ता[1] तिवात्सल्यतया सात्त्विकादित्रिविधजीवराशीनां अनादिकर्मस्वरूपलक्षणयोग्यतानुसारेणैतान् सृजामीति इच्छतीति। तदा हरेर्नाभ्यधोदेशेऽप्राप्ततमसः प्राप्तव्यतमसश्चेति द्विविधास्तमोयोग्याः वर्तन्ते। तथा नाभिसमभागे अप्राप्तलिङ्गभङ्गा नित्यसंसारिणस्तिष्ठन्ति। तथा तन्नाभ्युपरि[2] स्तनप्रदेशे प्राप्तस्वरूपानन्दाः प्राप्तव्यस्वरूपानन्दाः इति द्विविधा मुक्तियोग्याः सन्ति। एवं पञ्चविधा जीवराशयो मुक्तियोग्यास्तमोयोग्या नित्यसंसारिण इति त्रिविधा गीयन्ते। स एव हरिरुक्तप्रकारेण स्वाश्रितानेतान् जडप्रकृत्या सह गृहीत्वा स्रष्टुमुद्युक्तः सन् आदौ पुरुषरूपेणावतीर्य तदानीन्तनं दुर्गात्मकं तमःपीत्वा देवर्षिपितृपनरा इति मुक्तास्तु पञ्चधेति प्रमाणानुसारेण सिद्धसर्वजीवोत्तमब्रह्मादिसर्वजीवानां मुक्तिं दातुं वासुदेवनाम्ना मायाख्यश्रीरूपया सहावततार। तदा माया देहस्थस्वेदोदकेन मुक्तियोग्य-जीवावरकानादिषोडशकलात्मकलिङ्गदेहध्वंसकारणीभूतप्रधानविरजानदी जाता। स सृष्ट्यर्थं प्रकृत्याख्यया

---

१. भक्तवात्सल्यतया,

२. तन्नाभ्युपरिप्रदेशे

श्रिया सह प्रद्युम्न इत्यवततार। ततः स संहारार्थं जयाख्यया श्रिया सह सङ्कर्षण इत्यवततार। स स्थित्यर्थं शान्त्याख्यया श्रिया सह अनिरुद्ध इत्यवततार।।

।। इत्यवतारचतुष्टयम् ।।

ततः सूक्ष्मसृष्टिप्रकारः - वासुदेवान्मायायां पुरुषनामा जातः। सङ्कर्षणाज्जयायां सूत्रनामा वायुर्जातः। प्रद्युम्नात्प्रकृत्यां प्रधानसंज्ञा सरस्वती, श्रद्धासंज्ञा भारती च जातेति। ततः पुरुषनाम्नो ब्रह्मणः प्रधानसंज्ञायां सरस्वत्यां शेषनामक जीवो जातः। सूत्रनाम्नो वायोः श्रद्धासंज्ञायां भारत्यां कालनामक गरुड उत्पन्नः।। इत्यादिप्रकारेण उत्तमद्वारा सृष्टा देवाश्चतुर्वर्णाः भवन्ति। ब्रह्मा ब्राह्मणः। वायुशेषगरुडरुद्रेन्द्रकामवरुणसूर्यचन्द्रयमादयो देवाः क्षत्रियाः। विवस्वानिति सूर्यमृते अन्ये सूर्याः, चन्द्रवरुणोपेन्द्रानृते अन्ये अदितिपुत्राः, मुख्यरुद्रमृते अन्ये रुद्राः, मुख्यप्राणमृते अन्ये मरुतः, अग्निमृते अन्ये (अष्ट) वसव इत्यादयो वैश्याः। अश्विनीपृथ्वीकालमृत्युनिरृत्यादिदेवाः शूद्राः। अत्र सूक्ष्मसृष्टिरित्युक्तषोडश[२] कलात्मकानादिलिङ्गशरीरस्यैवोपचयविशेष इति केषाञ्चित्पक्षः। सूक्ष्मजडप्रकृतिगुणत्रयं महत्तत्वादिनोत्तमेभ्योऽवराणां सूक्ष्मशरीराणि कवचादुपरितनकवचान्तरवदेकस्यैकैकमेकीभूय सन्तीत्यन्यः पक्षः। एवं सूक्ष्मतया सृष्टजीवान् प्रद्युम्नो देवतावत्सरसहस्रोपरि तेषां स्थूलदेहं दातुं अनिरुद्धहस्ते दत्तवान्। सो अनिरुद्धस्तान् गृहीत्वा स्वस्त्रीभूतशांत्युदरे निवेश्य गुणत्रयेण स्थूलदेहयुक्तानकरोत्। स्थूलदेहोपादानं गुणत्रयम्।।

।। गुणत्रयसृष्टिप्रकारः।।

शान्तिदेव्यभिमन्यमानाव्यक्ततत्त्वे सूक्ष्मपरमाणुरूपतया सत्वरजस्तमोगुणमिश्रीभूतानन्तानन्तराश्यात्मकमूलजडप्रकृत्या अनिरुद्धः प्रथमतः सत्वराशिमनन्तरं रजोराशिं ततस्तमोराशिं गृहीत्वा सृजति। एतत् गणनाप्रकारः। नीचक्रमेणैकभागस्तमोराशिः। एतद्विगुणो रजोराशिः। एतद्विगुणः सत्त्वराशिः। एतद्राशित्रयमध्ये सत्त्वराशिः रजस्तमोभ्याम् अमिश्रीभूतो यावान् तावान् सर्वोऽपि शुद्धसत्त्वमिति।। तमोराशिमध्येऽपि प्रकारत्रयम्। तथाहि एकभागं रजः तद्दशांशं तमः, तद्दशांशं सत्त्वमिति। रजोराशेरपि प्रकारत्रयम्। एकभागं तमः तच्छतांशाधिकं रजः, तच्छतांशाधिकं सत्त्वमिति एकैकस्य राशेः प्रकारत्रयम्।। तदेकप्रकारमध्येऽपि प्रकारत्रयमित्येवं तमोगुणो नव प्रकारः। तथाहि एकभागरजोगुणमध्ये प्रकारत्रयम्। रजस्तमः, रजोरजः, रजः

सत्त्वम्। रजोदशभागतमसश्चापि प्रकारत्रयम्। तमस्तमः, तमोरजः तमस्सत्त्वम्[१]। तमोदशभागसत्त्वस्यापि प्रकारत्रयम्। सत्त्वतमः सत्वरजः सत्त्वसत्त्वमिति[२] नवप्रकारः।। तथा रजोगुणोऽपि नवप्रकारः। एकभागतमः प्रकारत्रयम्। तमस्तमः तमोरजः तमस्सत्त्वम्। तमश्शताधिकरजसोऽपि प्रकारत्रयम्। रजस्तमः रजोरजः रजस्सत्त्वमिति।। रजश्शताधिकसत्त्वमपि प्रकारत्रयवत्। सत्त्वतमः सत्त्वरजः सत्त्वसत्त्वमिति। रजोमिश्रतमोराशिः सृष्टिकारणं भवति। शुद्धसत्त्वराशिः सृष्टिकारणं न, किन्तु मुक्तानां भोगसाधनभूतदेहोपादानकारणं भवति। तथा शुद्धतमोऽपि न सृष्टिकारणम्। किन्तु-

. . . . दैत्यरक्षः पिशाचकाः।।
मर्त्याधमाश्चतुर्धैव तमोयोग्याः प्रकीर्तिताः।।

इति प्रमाणसिद्धतमसि पतितानां चतुर्विधजीवानां दुःखभोगशरीराणामुपादानं भवति। सृष्टिकाले सत्त्वरजस्तमोराशीनां विषमावस्था कथमित्युक्ते एकस्मिन् राशावेकस्य प्रवेशेनैव पृथक् पृथगवस्थानमेव विषमावस्थेत्युच्यते। तथा महाप्रलये साम्यावस्था कथमित्युक्ते रजोराशिमध्ये रजस्सत्त्वम्। एतन्मध्ये एकादशभागो महत्तत्त्वस्य पतितोऽस्ति। तन्महत्तत्वनाशानन्तरं स्वराशावागत्य सम्बध्यैव परस्परं दशभागेन[३] गत्वा शुद्धसत्त्वराशिमध्ये सम्बध्यते। उर्वरितैकभागः तमोराशिमध्ये गत्वा युज्यते। एवमेकैकस्मिन् राशावेकैकस्य भवतीति कृत्वा संहारकाले साम्यावस्थेत्युच्यते।।

अत्रेयं शङ्का - यदुक्तं तृतीयस्कन्धादौ सृष्टिकाले गुणत्रयकथनावसरे तमोराशिद्विगुणो रजोराशिः रजोराशिद्विगुणः सत्त्वराशिरिति। तथा तत्रैव बहिरावरणकथनावसरे अबारभ्य गुणत्रयपर्यन्तं क्रमादेकैकस्यापेक्षया एकैकं दशभागाधिकमिति। तथा च गुणत्रयस्यापि एकापेक्षयैकस्य क्रमाद्दशभागाधिक्यमित्यायातम्। तथा च तदेतत्पूर्वोत्तरविरुद्धमिति।।

---

१. रजः स्तमःसत्त्वतमः

२. तमस्तमः तमोरजः तमःसत्त्वं। तमो दशभागसत्त्वस्यापि प्रकारत्रयं तमस्तमः तमोरजः तमः: शताधिक रजसोऽपि प्रकारत्रयम्। रजस्तमः रजोरजः सत्त्वमिति। रजः शताधिकसत्त्वमपि प्रकारत्रयवत्।

३. भागेनैवं।

तत्रेदमुत्तरम्- यदुक्तं सृष्टिकाले गुणत्रयमेकापेक्षया[१] द्विगुणमिति तत्सत्यमेव। इतःपरं यदावरणकथनावसरे अबादिगुणत्रयस्याप्येकैकस्य दशभागाधिक्यमिति[२] तन्न युक्तम्। यथा अबादिकं पृथक् पृथगावरणमेवं सत्त्वादिकं न पृथगावरणं किन्तु गुणत्रयमिलितमेकमेवावरणमिति वक्तव्यम्। तथा च ब्रह्माण्डलिप्तां पृथिवीं विना[३] आपस्तेजो, वायुः, आकाशः, अहङ्कारतत्त्वं, महत्तत्त्वं गुणत्रयं, एवं सप्तावरणम्। एवं च गुणत्रयस्यैकैकस्य द्विगुणाधिक्यं त्रयाणां महत्तत्त्वापेक्षया दशाधिक्यं[४] च युज्यत इति।

अत्रापीयमाशङ्का-- यद्येवं सप्तावरणस्वीकारः[५] तर्हि दशमस्कन्धे यशोदादेवी श्रीकृष्णमुखमध्ये नवावरणं जगद्ददर्शेत्युच्यते तथा च तद्विरोध इति।।

अत्रेदमुत्तरम्-- उपादानभेदभिन्नगुणत्रयविकृता कृष्णरक्तश्वेतरूपवती भूमिर्यशोदादृष्टेर्भिन्नतया गोचरासीदिति तत्र नवावरणकथनम्। वस्तुतस्तु गणनविषये सर्वप्रमाणवाक्यैरावरणसप्तकमेव सिद्धमिति द्रष्टव्यम्।।

इतः परं गुणत्रयसृष्टिप्रकारस्त्वित्थम्। रजोराशिमध्यस्थरजस्सत्त्वं महाप्रलयकाले महत्तत्त्वसंहारानन्तरं शुद्धसत्त्वान्तः प्रविश्य मानं दशभागरजस्सत्त्वम्। तथा तमोराश्यन्तःप्रविश्यमानैकभागरजस्सत्त्वं पुनः स्वराशिभूतरजोराश्यन्तस्थैकभागरजस्सत्त्वमिति द्वादशभागरजःसत्त्वं, पुनस्तमोराश्यन्तस्थैकभागं तम इति त्रयोदशभागेन महत्तत्त्वसृष्टिः। क्रोडीकारेण[६] महत्तत्वान्तःप्रविष्टगुणानां प्रकारस्त्वित्थम्- एकभागं तमः, एतच्छतभागं रजः, एतच्छतभागं सत्त्वम्। एवमेको गुणो भागत्रयात्मकः। एवम्भूतपदार्थानां यावती सृष्टिः तावत्पर्यन्तं तदुपादानभूतगुणत्रयाणां प्रकारत्रयं द्रष्टव्यम्। एतादृशमहत्तत्वं ब्रह्मणः शरीरम्। एतस्याभिमानी पुरुषनामा ब्रह्मा। ब्रह्मणः स्थूलदेहेनोत्पन्नसूत्रनामा वायुरपि महत्तत्त्वाभिमानी। महत्तत्त्वस्य सत्वप्राचुर्यमस्तीति हेतोर्ब्रह्मा सत्त्वसत्त्वधिक इति गीयते।।

---

१. गुणत्रयमेकापेक्षद्विगुणाधिकमिति।
२. दशभागाधिक्यमागतमिति।
३. ब्रह्माण्डलिप्तपृथिवी।
४. दशगुणाधिक्यं युज्यते।
५. सप्तावरणस्याकारः।
६. महत्तत्त्वक्रोडीकारेण।

अत्रेवं[१] शङ्का-- शुद्धसत्त्वराश्यन्तस्थसत्त्वं पतितमस्ति किल। तथा[२] रजस्तमोराश्यन्तस्थसत्त्वमपि पतितमस्ति किल। रजोगुणेन निर्मितमस्तीति सत्त्वसत्त्वाधिक्यं कथमित्युक्ते रजोराश्यन्तस्थरजोगुणस्य रजस्थसत्त्वं[३] पतितमस्ति। तमो रजोगुणापेक्षया रजस्सत्त्वस्य सत्त्वप्राचुर्यमस्तीति हेतोर्ब्रह्मा सत्त्वसत्त्वाधिक इति गीयते।।

तथा सरस्वती भारती[४] च स्थूलदेहेन अव्यक्ततत्त्वस्याभिमानिन्यौ सत्यौ स्वपतिसमीपे स्तः। तयोर्मध्ये गायत्री, सावित्री,सरस्वती इति त्रिरूपाऽऽसीत्। तदुपरि पुरुषनामा ब्रह्मा त्रिरूपासु देवीषु वीर्यमाधाय पुनस्तद्वीर्यमेकीकृत्य गायत्र्युदरे निवेश्य तस्माद् ब्रह्मा स्वयं पुनः वायुश्च व्यक्तौ जातौ। एतादृशमहत्तत्त्वादहङ्करतत्त्वमजायत। तदहङ्करतत्त्वस्यैकांशं तमः, तद्दशांशाधिकं रजः, तद्दशांशाधिकं सत्त्वम्। तमःप्राचुर्यादहङ्कार इति गीयते।

एतादृशाहङ्कारतत्त्वस्य अभिमानिनां वैकारिकतैजसतामसरुद्राणां[५] सृष्टिप्रकारस्त्वित्थम्। महत्तत्त्वाभिमानी ब्रह्मा महत्तत्त्वान्तस्थसत्त्वांशेन सरस्वतीद्वारा वैकारिकरुद्रमुत्पादयामास। तथा महत्तत्त्वाभिमानी वायुरपि महत्तत्त्वान्तस्थरजोंऽशेन भारतीद्वारा तैजसरुद्रमुत्पादितवान्। तथा महत्तत्त्वाभिमानी जीवनामकशेषं, कालनामकगरुडं चोत्पादयामास। अयं जीवनामकशेषो महत्तत्त्वान्तस्थतमोंऽशेन स्वस्त्रीद्वारा तामसाहङ्काररुद्रं जनयामास। तथेन्द्रमित्रसमानदेवानुत्पादयामास। एतादृशाहङ्कारतत्त्वाद्वैकारिकरुद्रः स्वस्त्रीद्वारा मनस्तत्त्वं दशेन्द्रियाभिमानिनो देवानुत्पादयामास।।

तत्प्रकारस्त्वित्थम्। श्रोत्राभिमानिन्यो दिग्देवताः (१) त्वगभिमानी प्राणः (२) चक्षुरभिमानी सूर्यः (३) जिह्वाभिमानी वरुणः (४) घ्राणाभिमानिनावश्विनौ (५) वागभिमानी वह्निः (६) पाण्यभिमानी दक्षः (७) पादाभिमानी जयन्तः (८) पाय्वभिमानी मित्रः (९) उपस्थाभिमानी मनुः (१०) एकादशैते वैकारिकरुद्रेण सृष्टाः। तथा तैजसरुद्रः स्वस्त्रीद्वारा जडानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेति पञ्च ज्ञानेन्द्रियाणि, तथा वाक्पाणिपादपायूपस्था इति पञ्च कर्मेन्द्रियाणि जनयामास। तथा तामसाहङ्काररुद्रः स्वस्त्रीभूतोमाद्वारा शब्दस्पर्शरूपरसगन्धा इति पञ्च तन्मात्राणि च तथा आकाशवायुते-

---

१. अत्रेयं शङ्का।

२. तमोराश्यन्तस्थ।

३. रजःसत्त्वं।

४. सरस्वतीभारत्यौ च

५. वैकारिकतैजसतामसरूपाणां

जोअप्पृथिव्य इति पञ्चभूतानि जनयामास। एतेषु नारायणरूपाणि पृथिव्यप्तेजस्सु अन्नमयरूपं, तेजोवाय्वाकाशेषु प्राणमयरूपं, अहङ्कारतत्त्वे मनोमयरूपं, महत्तत्त्वे विज्ञानमयरूपं, गुणत्रयलक्षणाव्यक्ततत्त्वे च आनन्दमयरूपमित्येकः पक्षः। एषु तत्त्वेषु ब्रह्मणो अन्नमयादयः कोशाः इति पक्षान्तरम्। ततो वायोरपि गरुडशेषेन्द्रादयो देवाः प्रत्येकमुत्तमदेवेभ्यो नीचदेवाः बहिस्सृष्टौ यावन्तः उत्पत्स्यमानास्तावन्तस्तारतम्येन उत्पन्नाः। ततो मायादेवी श्रीभूदुर्गेति त्रिरूपासीत्। तदा श्रीवासुदेवः श्रीरूपया साकं क्रीडां कृत्वा स्वयमेव विष्णुरित्यवतीर्य ब्रह्माण्डान्तः सर्वेषां स्थितिकर्ता बभूव। पुनः स एव वासुदेवः भूरूपया विक्रीड्य स्वयमेव ब्रह्मनामको भूत्वाऽवतीर्य ब्रह्माण्डान्तस्थचतुर्मुखब्रह्मणि स्थित्वा सृष्टिं करोति। तथा स एव वासुदेवः दुर्गारूपया तया सह विक्रीड्य तस्यां स्वयमेव रुद्रनामा सन्नवतीर्य ब्रह्माण्डान्तस्थोमापतिलक्षणे रुद्रे स्थित्वा सर्वं संहरति इति प्रकारान्तरेण बहिस्सृष्टिरासीत्।

ततो ब्रह्माण्डस्थितिरित्थम्-- विष्णुः श्रीदेव्यां वीर्यमाधाय पूर्वोक्तचतुर्विंशतितत्त्वांशैरन्तरितस्ततः सर्वत्र पञ्चाशत्कोटिविस्तारवत् तथा पञ्चाशत्कोटियोजनदलवत्सुवर्णतेजोमयं कुक्कुटाण्डाकारेण ब्रह्माण्डमुत्पाद्य तदन्तर्बहिश्च स्वयमेवाधारः सन् तथा अन्तर्बहिर्व्याप्तो भूत्वा तिष्ठति। ततो ब्रह्माण्डान्तः आतानवितानात्मकं पुरुषरूपमुत्पाद्य तस्मिन् विराट् ब्रह्माणं स्थापयित्वा तस्मिन् स्वामी स्वयमेव व्याप्तः सन् स्थित्वा चतुर्दशलोकानामाधाररूपी आस।

तत्प्रकारस्त्वित्थम्-- तस्य पादमूले पाताललोकः (१) तत्पार्ष्णिप्रदेशे रसातललोकः (२) तद्गुल्फप्रदेशे महातललोकः (३) तज्जङ्घाप्रदेशे तलातललोकः (४) तज्जानुप्रदेशे सुतललोकः। (५) तदूरुद्वयप्रदेशे वितललोकातललोकौ (६-७) तत्कटिप्रदेशे भूलोकः (८) तन्नाभिप्रदेशे नभोलक्षणभुवर्लोकः (९) तदुदरप्रदेशे ज्योतिर्लोकः (१०) तद्ग्रीवाप्रदेशे महर्लोकः (११) तन्मुखप्रदेशे जनोलोकः (१२) तल्ललाटप्रदेशे तपोलोकः (१३) तच्छिरोदेशे सत्यलोकः (१४) इत्याकारेण स्वामी चतुर्दशलोकानां पुरुषरूपेण व्याप्तःसन् 'सहस्रशीर्षा पुरुषः' इत्यादिसूक्तजातेन स्तुतः आधारत्वेन सिद्धः। तस्यैव विराड्ब्रह्मणः अवयवेभ्य उत्पन्नाः सर्वे देवाः अहमधिकोऽस्मीति विवादमकुर्वन्। तदा नारायणचतुर्मुखौ मुख्यप्राणस्य तत्त्वाभिमानिसर्वदेवोत्तमत्वं दर्शयितुं[1] स्वस्वसामर्थ्यमाच्छाद्य तटस्थतया स्थितौ सन्तौ। तदा हि देवाः परस्परं

---

१. युक्त्या दर्शयित्वा स्वस्वं

विवदिषन्तः इत्थमवदन्- यदि सर्वेषामस्माकमेतद्विराट्शरीरनिर्गमे सति यन्निर्गमनादिदं शरीरं पतिष्यति पुनरस्माभिः प्रवेशे कृते यत्प्रवेशादुत्थास्यति स एव श्रेष्ठः इति प्रतिज्ञां कृत्वा तथैव क्रमात्सर्वे तस्मान्निर्गताः। तेषु निर्गतेषु सत्सु प्राणनिर्गमनेनैव शरीरं पतितं, पुनस्तेषु प्रविष्टेषु सत्सु प्राणप्रवेशेनोत्थितं, दृष्ट्वा सर्वे ते प्राणमेवास्माकं मध्ये श्रेष्ठ इति स्तुत्वा पूजां चक्रुः।।

।। इति वैराजसृष्टिसंग्रहः ।।

।। अथ पाद्मसृष्टिः ।।

ब्रह्माण्डे गर्भोदके स एव नारायणः सर्वावताराणां मूलांशभूतपद्मनाभात्मकः सन् लक्ष्म्या सह शेषोपरि योगनिद्रां कुर्वति सति तदवसानकाले लक्ष्म्या स्तुतः सन् स्वनाभेः सकाशाच्चतुर्दशभुवनात्मककमलमुत्पाद्य तत्कमलाच्चतुर्मुखं जनयामास। स ब्रह्मा उदकवायू दृष्ट्वा अतिभीतःसन् तत्कमलनालं प्रविश्य तत्रापि कमप्यदृष्ट्वा पुनरुपर्यागत्य स्थित्वा 'तप' इत्यशरीरं वाक्यं श्रुत्वा देवतासहस्रवत्सरपर्यन्तं तपःकृत्वा चतुर्मुखैश्चतुरो वेदान् वक्ष्यमाणः सन् नारायणमस्तौत्।।

।। अथ कालप्रमाणम् ।।

बहिस्सृष्टिः पञ्चाशद्वत्सरः। अन्तःसृष्टि पञ्चाशत्संवत्सर इति ब्रह्मणो वत्सरशतम्। अथवा बहिस्सृष्टिमारभ्याण्डसृष्टिपर्यन्तं दिनद्वयन्यूनपञ्चाशद्वत्सरः। उर्वरितदिनद्वयमध्ये एकस्मिन् दिने वैराजसृष्टिः। अपरस्मिन् पाद्मसृष्टिः। तथा च बाह्यसृष्टिमारभ्य पाद्मसृष्टिपर्यन्तं पञ्चाशद्वत्सरः। उर्वरितपञ्चाशद्वत्सरे जगत्सृष्टिरिति मिलित्वा ब्रह्मणो वत्सरशतमिति। यद्वा नारायणः चतुर्थे यामे उत्थितः सन् ब्रह्माण्डेन सह सकलबहिस्सृष्टिं कृत्वा ब्रह्माण्डान्तःसृष्टिं ब्रह्मणो वत्सरशतपर्यन्तं करोतीति अतो द्विपरार्धात्मकं ब्रह्मायुरिति गीयते।।

।। अथ कालगणनम् ।।

मनुष्यमासः पितृदिनम्। मनुष्यवत्सरः देवानामेकदिनम्। मनुष्यवत्सराणां षष्ठ्युत्तरशतत्रयं देवानामेको वत्सरः। मानुषत्रिचत्वारिंशल्लक्षविंशत्सहस्रवत्सरमिति देवानां द्वादशसहस्रवत्सरः। देवताद्वादशसहस्रवत्सरात्मकः कालः महायुगः। एवं कृतादिचतुर्युगपरिमितकालः। तथाहि-- कृतयुगं चतुस्सहस्रवत्सरात्मकम्। तत्सन्धि-

कालः अष्टशतात्मकः। त्रेतायुगं त्रिसहस्रवत्सरात्मकम्। तत्सन्धिकालः षट्शतात्मकम्ः। द्वापरयुगं द्विसहस्रम्। तत्सन्धिकालः चतुःशतात्मकः। कलियुगं तु एकसहस्रम्। तत्सन्धिकालश्च द्विशतात्मकः। इति सन्धिकालेन सह कलियुगं देवताद्वादशशतात्मकं। इदमेव मानुषमानेन द्वात्रिंशत्सहस्रसहितं लक्षचतुष्टयम्। एवं युगचतुष्टयं मनुष्यमानेन विंशत्सहस्राधिकत्रिचत्वारिंशल्लक्षवत्सरात्मकः कालः। अयमेव महायुगाख्यः कालः। एतादृशमहायुगसहस्रं ब्रह्मणो दिनम्। तथैव रात्रिश्च। ब्रह्मणो दिवसस्यैकस्य मनुष्यमानेन खर्वत्रयमेकनिर्बुदैकार्बुदं चत्वारिंशदुत्तरशतकोटिवत्सराः। एवं ब्रह्मणो वत्सरशतस्य मनुष्यमानेन महाक्षोहिणीत्रयम्। अक्षौहिण्येकं महाखर्वैकं खर्वैकं निर्बुदचतुष्टयवत्सराः। एतावानेककालो नारायणस्य योगनिद्रारूपकः। ब्रह्मणः एतादृशे त्रिंशद्घटिकात्मके अहनि दशावताराः भवन्ति। तत्रादिभागे स्वायंभुवमन्वन्तरे श्वेतवराहावतारः। अन्येऽवताराश्चतुर्विंशन्महायुगे, केचन सप्तविंशन्महायुगे अष्टाविंशन्महायुगे च। तथा चाक्षुषमन्वन्तरे वैवस्वतमन्वन्तरे च अवताराः भवन्ति। उर्वरितमन्वन्तरे च तत्तदुपासनविषयभूत नारायण एव उपदेशकर्ता।

।। अथ तारतम्यम् ।।

अत्र ब्रह्माण्डान्तःसृष्टिः प्रायस्तारतम्यज्ञापिका न। कुत इत्युक्ते, कालजयादिपार्षदा अन्तःसृष्टौ गरुडशेषोत्पन्ना बहिःसृष्टौ च स्वस्वस्थान एवोत्पन्ना इत्यतो बहिस्सृष्टिस्तारतम्यज्ञापिका न। अन्तर्बहिःसृष्टौ सङ्कलय्य यथाप्रमाणं तारतम्यं संगृह्यते। आदौ जगज्जन्मादिकर्ता सच्चिदानन्दस्वरूपानन्तावतारात्मकत्वेनानन्तानन्तवेदप्रतिपाद्यः श्रीलक्ष्मीनारायणः सर्वोत्तमः ततोऽव्यक्ततत्वाभिमानिनी। तथाऽनन्तावतारात्मिका ब्रह्माद्यैश्वर्यप्रदात्री श्रीः नारायणादनन्तानन्तगुणैरवरा। ततो महत्तत्त्वाभिमानी ब्रह्मा, विज्ञानतत्त्वाभिमानी वायुश्चेमौ द्वौ परस्परं समानौ सन्तौ लक्ष्म्याः कोटिगुणाधमौ। अत्र वायुर्ब्रह्मपदं प्राप्यैव मुक्तो भवति। ततो वेदाभिमानिनी सरस्वती, भक्त्यभिमानिनी भारती च द्वे अपि समे स्वपत्यपेक्षया शतगुणाधमे। भारत्यपि सरस्वतीपदं प्राप्यैव मुक्ता भवति। ततः कालाभिमानी गरुडः जीवाभिमानी शेषश्चेमौ अहङ्कराभिमानी रुद्रश्चेत्येते प्रायः समाः सन्तो भारत्याः शतगुणाधमाः। रुद्रोऽपि शेषपदं प्राप्यैव मुक्तो भवति। ततो जाम्बुवती, कालिन्दी, नीला, भद्रा, मित्रविन्दा, लक्षणा षडेताः नारायणस्त्रियः समाः। गरुडशेषापेक्षया स्वरूपतारतम्ये किंचिन्नीचाः ब्रह्मवाय्वपेक्षया पञ्चाशत्सहस्रगुणैः नीचाः। एतासां मध्ये जाम्बुवती किञ्चिदधिका। षडेतासु लक्ष्म्यावेशोऽ-

स्ति। तत्रापि जाम्बुवत्यां विशेषावेशः सर्वदाऽस्ति। ततो गरुडस्त्री सौपर्णी, शेषपत्नी वारुणी रुद्रस्त्री पार्वती जाम्बुवत्यपेक्षया द्विगुणनीचा। एतास्तिस्रः परस्परसमाः सत्यः स्वपतिभ्यः शतगुणाधमाः। अत्र पार्वती वारुणी पदं प्राप्यैव मुक्ता भवति। ततः ऐश्वर्याभिमानी इन्द्रः। अवैराग्याधिपतित्वे सति चक्राभिमानी, कामश्चेमौ द्वौ समौ सन्तौ वाय्वपेक्षया दशगुणनीचौ। चक्राभिमानी भरतश्चेन्द्रसमः। पार्वत्यादिभ्यः शतगुणाधमौ। अत्रापीन्द्रः किंचिदधिकः - - - - णे क्षमः[1]। ततस्त्वगिन्द्रियाभिमान्यहङ्कारप्राणो देवेन्द्राद्दशगुणाधमः। ततः कामपुत्रोऽनिरुद्धः, बृहस्पतिः, स्वायंभुवमनुः, दक्षप्रजेश्वरः, देवेन्द्रस्त्री शची, कामस्त्री रतिः षडेते समाः सन्तो अहङ्कारप्राणाद्दशगुणाधमाः। ततो भूतप्रवाहवायुः कामपुत्रादनिरुद्धात्पञ्चगुणाधमः। ततो यमधर्मः, सूर्यश्चन्द्रः, स्वायंभुवमनुस्त्री शतरूपा एते चत्वारः समाः सन्तः प्रवहवायोः सकाशात् द्विगुणाधमाः। ततो वरुणो यमधर्मात्सार्धपादगुणाधमः। ततो नारदऋषिः वरुणात् किञ्चिन्नीचः। ततोऽष्टवसूनां मध्ये अग्निरिति वसुः, भृगुऋषिः दक्षप्रजेश्वरस्त्री प्रसूतिः एते त्रयः समाः सन्तो नारदात्किञ्चिदवराः। वरुणात्पादगुणाधमाश्च। ततः कर्मजदेवानां मध्ये गणनीयः प्रह्लादो भृगोः सकाशत्किंचिन्नीचः। ततो मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः क्रतुः वसिष्ठः विश्वामित्रः वैवस्वतमनुः नवैते परस्परं समाः सन्तो भृग्वादिभ्यः किञ्चिन्नीचाः। ततो द्वादशादित्यानां मध्ये मित्रनामा सूर्यः बृहस्पतिस्त्री तारा, अधर्माभिमानी कोणपो निऋतिः प्रवहवायोः स्त्री प्रवही एताश्चतस्रः समाः सत्यो मरीच्यादिभ्यः किञ्चिदवराः भृग्वादिभ्यो द्विगुणाधमाश्च। ततः शतस्था देवाः आकाशाभिमानी गणेशः, धनाभिमानी कुबेरः, वायुपुत्रो विश्वक्सेनः, एते पञ्च तथा अग्निः द्रोणः प्राणः ध्रुवः अर्कः वसुः विभावसुः द्युः-एते अष्ट वसवः तथा, अर्यमा पूषा त्वष्टा सविता भगः धाता विवस्वान् वरुणः मित्रः शक्रः उरुक्रमः पर्जन्यः एते द्वादशादित्याः। ततो महारुद्रः। रैवतः अजः भवः भीमः वामः उग्रः वृषाकपिः अजैकपादहिर्बुध्निः बहुरूपी एते एकादश रुद्राः। ततो मरुतः अहङ्कारप्राणः शब्दाभिमानी प्राणः स्पर्शाभिमान्यपानः रूपाभिमानी व्यानः रसाभिमानी उदानः गन्धाभिमानी समानः एवमेते षट्। प्रवहवायुः प्रतिभः सौम्यः कूर्मः नागः कृकलः देवदत्तः धनञ्जयः आवहः विवहः संवहः परिवहः उद्वहः एते त्रयोदश, इत्यादयः एकोनपञ्चशन्मरुतः तथा पुरुरवाः आर्द्रवः धनुर्विलोचनः कामः कालः क्रतुः दक्षः सत्यः वसुः एते दश विश्वेदेवाः। तथा वसुरुद्रादित्याः एते त्रयः पितरः, द्यावापृथिव्यौ

---

१. अत्रापीन्द्रः किञ्चिदधिकः। ततस्त्वगिंद्रियाभिमान्यहङ्करप्राणो

द्वे एकः ऋभुगणः इत्यादयः शतस्थाः समाः सन्तो मित्रनामकसूर्यात्किंचिन्न्यूनाः। एतेषां मध्ये केषाञ्चिदधिकानां विवरणम्। अष्टवसुमध्ये अग्निनामा वसुः भृगुऋषिसमः। द्वादशादित्यानां मध्ये विवस्वानिति सूर्यः यमधर्म समः। वरुणनामा सूर्यः शक्रनामा च उरुक्रमनामाऽऽदित्यो ऽनारायणावतारः। मित्रनामकादित्यो निऋतिसमः। एतेऽधिकाः, पर्जन्यनामा सूर्यः सर्वावरः भागीरथीसमः। एकादश रुद्राणां मध्ये महानिति रुद्रः शेषसमः। मरुन्मध्ये अहङ्कारप्राणो देवेन्द्रादनन्तरः। प्रवाहवायुः बृहस्पत्यनन्तरः। तथा पञ्च प्राणाः किंचिदधिकाः। एषां शतस्थत्वं नाम सोमपानार्हत्वमेव। पादाभिमानी जयन्तः उक्तशेषसमः।

अथ कर्मजदेवाः - अग्निपुत्रः पावकः च्यवनऋषिः उचथ्यऋषिः प्रह्लादः एते चत्वारः तथा स्वायंभुवः स्वारोचिषः उत्तमस्तापसः रैवतः चाक्षुषः वैवस्वतः सावर्णिः दक्षसावर्णिः ब्रह्मसावर्णिर्धर्मसावर्णिः रुद्रसावर्णिः देवसावर्णिरिन्द्रसावर्णिः एते चतुर्दशमनवः। ततः चिरपितृमध्ये सप्त पितरः गन्धर्वाणां मध्ये अष्टौ गन्धर्वाः। ततो यज्ञः रोचनः सत्यजित् त्रिशिखः विभुः मन्द्रद्युम्नः१ पुरन्दरः बलिः अद्भुतः विधृतः शंभुः सुधामा दिवस्पतिः शुचिः एते चतुर्दशेन्द्राः। अथ नवाधिकराज्ञां मध्ये नव राजानः। कार्तवीर्यः पृथुः चक्रवर्ती शशबिन्दुः प्रियव्रतः दौष्यन्तिर्भरतः त्रिजन्मभरतः ककुस्थः गयः मान्धाता एते नव। एते षट्पञ्चाशत्कर्मजाः समाः। एषां मध्ये केचनाधिकाः,। चतुर्दशमनुमध्ये तापसमनुः नारायणावतारः, वैवस्वतमनुः सप्तर्षिसमः। स्वायम्भुवमनुः बृहस्पतिसमः, प्रह्लादो भृगुऋषेः किञ्चिन्नीचः मरीचोत्तमश्च। चतुर्दशेन्द्रमध्ये यज्ञनामेन्द्रो नारायणावतारः रोचनो वाय्ववतारः सत्यजित् यमावतारः त्रिशिखो विभुरश्विनोरवतारौ, मन्द्रद्युम्नः पुरन्दरश्चेमौ द्वौ देवेन्द्रावतारौ उर्वरितेन्द्राः उक्तकर्मजदेवाः। एवं सर्वे समाः सन्तो अग्रेः शतगुणावराः। गणेशादिशतस्थापेक्षया किञ्चिन्नीचाः। ततो वरुणस्त्री भागीरथी, यमस्त्री श्यामला, सूर्यस्त्री संज्ञा, चन्द्रस्त्री रोहिणी, कामपुत्रानिरुद्धस्त्री उषादेवी, वृष्ट्यभिमानि पर्जन्यनामा सूर्यः षडेते समाः पावकादिकर्मजदेवेभ्यः किञ्चिदवराः। ततः केचिदनुक्ताः देवाः पर्जन्यादवराः। तथा अग्निस्त्री मन्त्राभिमानिनी स्वाहादेवी पर्जन्याद्विगुणाधमा। ततः उदकाभिमानी बुधः नामाभिमानिनी उषादेवी च द्वे अप्यग्निस्त्रियौ अवरे। भूम्यभिमानी शनैश्चरः उषायाः सकाशान्नीचः। तत पुष्करदेवता शनैश्चरादवरा। ततः आजानजदेवाः तुम्बुर्वाद्यष्टोत्तरशतदेवगन्धर्वाणां मध्ये गन्धर्वशतम्। ततः उर्वशी, रम्भा, मेनका, तिलोत्तमा, पूर्वचित्तिः, घृताची, प्रम्लोचा, अम्लोचना कृतस्थली कृतादिसहस्राप्सरस्त्रियः। पूर्वोक्तसप्तऋषीन् विना सर्वे ऋषयः

शतोत्तरषोडशसहस्राग्निपुत्राः अजगरीभूतविद्याधरः उक्तदेवान् विना अनुक्तदेवाश्चेते समाः। एतेषामग्निपुत्राणां मध्ये करोर्वाह्वयात् किञ्चिदधिकाः। एते सर्वे पावकादिदेवेभ्यः शतगुणावराः। पुष्करादिभ्यः किञ्चिन्न्यूनाः। ततो देवगन्धर्वाः कर्मदेवतामध्ये उक्तशतसंख्याकान् तथा चिरपितृमध्ये अष्टौ च विना अन्यचिरपितृभ्यः शतगुणनीचाः। ततो मनुष्यगन्धर्वाः 'देवगन्धर्वेभ्यः शतगुणाधमाः। ततः क्षितिपा मनुष्यगन्धर्वेभ्यः शतावराः। ततो मनुष्योत्तमाः क्षितिपेभ्यः शतगुणाधमाः। एतत्तारतम्यं उत्तममारभ्य सोपानारोहणन्यायेनोक्तप्रकारस्त्वित्थम्।

आदौ नारायणोऽनन्तगुणपरिपूर्णः तत लक्ष्मीरनन्तगुणाधमा। ततो ब्रह्मवायू कोटिगुणाधमौ। ततः सरस्वतीभारत्यौ शतगुणाधमे। ततो गरुडशेषरुद्राः शतगुणावराः, ततः सौपर्णी वारुणी पार्वतीति तिस्रः शतगुणावराः। ततः इन्द्रकामौ शताधमौ ततो बृहस्पत्याद्यष्टकं, ततो अग्न्यादि, ततः कर्मदेवताः ततः आजानजदेवताः ततश्चिरपितरः, ततोः देवगंधर्वाः, ततो मनुष्यगंधर्वाः, ततः क्षितिपाः, ततो मनुष्योत्तमाः शतावराः इति। एभ्यो नीचानां गुणनियमो नास्ति।

ततो ब्रह्मणा सृष्टा किन्नराः किम्पुरुषाः विद्याधराः यक्षरक्षांसि यातुधानाः गुह्यकाः साध्याः सिद्धाः। तथा दानवाः भूतवेतालसर्पादिरक्षांसि खगमृगादितिर्यग्योनयः क्रिमिकीटाद्यण्डजजरायुजस्वेदजोद्भिज्जाः इति चतुर्विधजन्तवः। एवं मुक्तियोग्यतमोयोग्यनित्यसंसारिणः इति राशित्वेन त्रिविधाः असंख्याताः जीवाः।

केचित्तु - अष्टाशीतिश्चत्वार्यशीतियोनिद्वारा कर्मानुसारेण सृज्याः। एतान् ब्रह्मा स्वावयवेभ्यः स्वायंभुवमनुमरीच्यादिभ्यो मिथुनीभावेन नानाप्रकारेणोत्पाद्य मध्ये नारायणं स्तुवन् तिष्ठति।।

।। अथ दशावताराः।।

स्वायंभुवमन्वन्तरे मधुकैटभयोर्भेदेन मेदसा घनीभूता भूः स्वयमेव गर्भोदके मज्जति सति जगदर्थं ब्रह्मा स्वायंभुवमनुना सह पद्मनाभस्तोत्रं कृतवान्। तेन स्तुतः स्वामी स्वांशेन ब्रह्मनासापुटात् श्वेतवराहावतारं कृत्वा भूम्युद्धारं कुर्वन् ब्रह्मोत्पन्नादिहिरण्याक्षेणावरुद्धः सन् तं स्वदन्तेन विदार्य भूमिमानीय दत्तवान्। ततस्तेन कोपेन

दितिपुत्रहिरण्याक्षः सनकादिशापहतेन 'जयेन[१] सहोत्पन्नः सन् ब्रह्मवरादजेयत्वं प्राप्य भूमिं मज्ञति। अयमेव महावराहभूतः स्वामी पुनः भूम्युद्धारं कुर्वन् हिरण्याक्षावरुद्धः सन् तं दैत्यं कर्णताडनेन हत्वा भूम्युद्धारं कृतवान्।।

।। अथ भूविस्तारः।।

सप्तद्वीपमध्ये वलयाकारतया लक्षयोजनायामो जम्बुद्धीपः। तन्मध्ये नव खण्डाः। तेषां मध्ये इलावृतखण्डश्च[२] चतुरस्रं चतुस्त्रिंशत्सहस्रयोजनात्मकः। तन्मध्ये लक्षयोजनोच्छ्रितः सुवर्णमयमेरुपर्वतः। सोऽपि भूम्यन्तः षोडशसहस्रयोजनपरिमितः प्रविष्टोऽस्ति। सोऽपि कनकपुष्पाकारेण चतुर्दिक्षु द्वात्रिंशत्सहस्रयोजनायामः। [३]उर्वरितचतुरस्रस्त्रिसहस्रयोजनायामः भूमेरुपर्यस्ति। सोऽपि कनकपुष्पाकारेण अधोभागे चतुरस्रेण षोडशसहस्रयोजनायामः। उपर्यष्टदलाकारेण चतुर्दिक्षु द्वात्रिंशत्सहस्रयोजनायामः। तदुपरि तन्मध्यभागे चतुरस्रं दशसहस्रपरिमितप्रदेशे ब्रह्मसभास्थानम्। तस्याष्टभागेषु अष्टौ सहस्रयोजनप्रदेशानन्तरे अष्टदिक्पालकानां गृहाणि सार्धद्विसहस्र योजनायामतया सन्ति। एषः तद्गृहाणां पृष्ठभागे मेरोरग्रस्य सर्वत्र पञ्चाशद्योजनायामप्रदेशो उर्वरितोऽस्ति। तदन्तपूर्वाद्यष्टदिक्षु,

इन्द्रो वह्निः पितृपतिः नैऋतो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्।।

ततः श्रीविष्णोः प्रतिमाभूतस्य मेरोश्च पूर्वादिचतुर्दिक्षु कुलपर्वताः। पूर्वभागे मन्दरः, मेरोर्दक्षिणभागे मेरुमन्दरः। मेरोः पश्चिमभागे सुपार्षदः। उत्तरभागे कुमुदः। एकैकस्य दशसहस्रयोजनौन्नत्यं तावदायामश्च। मन्दरोपरि चूतवृक्षः। क्षीरह्रदः। नन्दनवनम्। तथा मेरुमन्दरोपरि जम्बूवृक्षः। मधुह्रदः चैत्रवनम्। सुपार्षदोपरि कदम्बवृक्षः। इक्षुह्रदः। वैभ्राजकवनम्। कुमुदोपरि न्यग्रोधवृक्षः शुद्धजलह्रदः। सर्वतोभद्रवनम्। एषां वृक्षाणां मध्ये एकैकवृक्षः एकादशयोजनोन्नतः। शतयोजनस्थूलः। मेरोरधः केसरपर्वताः। कुरङ्गः कुररः कुसुमः वैकङ्कः चित्रकूटः त्रिशिरः पतङ्गः रुचकः निषदः

---

१. सनकादिशापितः तेन जयेन सह

२. इलावृतखण्डश्चतुस्त्रिंशत्सहस्र

३. तदुपरि तन्मध्यभागे चतुरस्रं दशसहस्रपरिमितप्रदेशो ब्रह्मस्थानं। तस्याष्टभागेषु अष्टौसहस्रयोजनप्रदेशानन्तरे अष्टदिक्पालकानां गृहाणि सार्धद्विसहस्रयोजनायामतया सन्ति। एषः तद्गृहाणां पृष्ठभागे मेरोरग्रस्य सर्वत्र पंचशतयोजनायामप्रदेश उर्वरितोऽस्ति।

रुशतिवासः कपिलः शङ्खवैडूर्यः।[१] पारधिः हंसः वृषभः नागकालः पानोदः एवमेते अष्टादश केसरपर्वताः।। ततः परिस्तरणपर्वताः। पूर्वभागे जठरदेवकूटाविति द्वौ। दक्षिणभागे कैलासकरवीराख्यौ।। पश्चिमभागे पवनपारियात्राभिधौ द्वौ। उत्तरभागे शृङ्गवान् करवानिति द्वौ। एवमेते अष्टौ परिस्तरणपर्वताः द्विसहस्रयोजनोन्नताः। अष्टादशसहस्रयोजनैः दक्षिणोत्तरायामाः। एवं प्रकाशमानमेरोरुपरितनमध्यभागे श्रीनारायणो वृश्चिकाकारेण शिंशुमाररूपेणाधोमुखमुपरिपुच्छतया वर्तते। एतदाश्रये सर्वे ग्रहाः प्रदक्षिणतया वर्तन्ते। राहुकेतू अपसव्येन चरतः। तत्प्रकारः सूर्यमण्डलं सहस्रम्[२]। चन्द्रमण्डलं विंशत्सहस्रम्। राहूकेतूनां मण्डलं द्विचतुश्चत्वारिंशत्सहस्रम्। अतो मेरुव्यवधानेन ग्रहणादिव्यवहारः। एवं तावेव महाकोपेन निबिडान्धकारं कुर्वन्ति। तत एव स्वस्वगतिमपेक्ष्य वक्रातिचारतया सञ्चरन्ति। ततः कालमपेक्षा ध्रुवः सूर्यरथरज्जूनितस्ततो न्यूनाधिकतया अतिदृढसंगृहणं कुर्वति सति उत्तरायणदक्षिणायने भवतः।।

इतः परं नवग्रहाः भूम्यपेक्षया कियद्दूरे सन्ति, इत्युक्ते भूम्युपरि राहुकेतुमण्डलं दशसहस्रयोजने(नं) अस्ति। सूर्यमण्डलम् एकलक्षयोजने। चन्द्रमण्डलं लक्षद्वये। शुक्रमण्डलं लक्षचतुष्टये। बुधमण्डलं षट्लक्षम्। मङ्गलमंडलम् अष्टलक्षम्। बृहस्पतिमण्डलं दशलक्षम्। शनैश्चरमण्डलं द्वादशलक्षम्। सप्तर्षिमण्डलं दशलक्षम्[३]। ध्रुवमण्डलं षट्त्रिंशल्लक्षम्। सूर्यरथः मेरोः समीपे अस्ति। तस्य सुवर्णात्मकं श्रीविष्णुना व्याप्तम् एकचक्रम्। एतस्यैको भागः मेरोरुपरि। अधरभागे ध्रुवमण्डलपर्यन्तं षट्त्रिंशल्लक्षयोजनः। तस्य सप्ताश्वाः। अरुणः सारथिः। तच्चक्रं पुष्करद्वीपे भ्रमति। दिवारात्रिषष्ठिघटिकात्मककालस्य रथ(रवि)चक्रं नव कोट्येकपञ्चाशल्लक्षयोजनं भ्रमति। मेरुपर्वतमध्यान्मानसोत्तरपर्वतमध्यस्य पूर्वभागस्य एककोटिसप्तपंचाशल्लक्षषट्पञ्चसहस्रयोजनम्। मेरोः पश्चिमस्य त्रिकोटिपञ्चाशल्लक्षम्। एतत् त्रिगुणं सर्वत्र प्रदक्षिणीकरणे नवकोटिचत्वारिंशल्लक्षं भवति। सूर्यरथः द्वात्रिंशत्सहस्रपञ्चाशदायामः। रथचक्रं सप्तनवतिसहस्रं पञ्चाशतमुन्नतं तद्युगस्य विस्तृतिः। द्विलक्षं मेरोरुपरि ततः ब्रह्मसभायां बहिरावरणोदकं पतित्वा चतुर्दिक्षु भागचतुष्टयेन गच्छति। पूर्वदिशि मन्दाकिनी। दक्षिणदिशि अलकनन्दिनी। भगीरथेन प्रार्थितत्वाद्भागीरथी। पश्चिमे चक्षुरिति। उत्तरे भद्रेति। ततः सप्तद्वीपाधिपतिप्रियव्रतराज्ञः सप्त पुत्राः। आग्नीध्रस्य जम्बुद्वीपः, इध्मजिह्वस्य प्लक्षद्वीपः, यज्ञबाहोः शाल्मलि-

---

१. शंखः वैदूर्यः

२. सूर्यमण्डलं दशसहस्रं।

३. सप्तविंशतिलक्षं क. सप्तर्षिमण्डलं त्रयोविंशतिलक्षम्

द्वीपः, हिरण्मयस्य कुशद्वीपः, धृतपृष्ठस्य क्रौञ्चद्वीपः, मेधातिथेः शाकद्वीपः, वीतिहोत्रस्य पुष्करद्वीपः एवं विभागः।। ततो जम्बुद्वीपाधिपतेराग्नीध्रस्य नव सुताः। जम्बुद्वीपमध्ये चतुरस्रं द्वत्रिंशत्सहस्रं इलावृतखण्डः। तस्य तन्नामा राजा तस्मिन्पार्वतीरुद्रान्तर्गत एवोपासनीयः। तत्र चतुर्दिक्षु भागीरथीति नदी। तत्र द्विसहस्रायामः चतुस्त्रिंशत्सहस्रोन्नतो गन्धमादनाख्यो मर्यादापर्वतः। ततः एकत्रिंशत् सहस्रयोजनो भद्राश्वखण्डः। तस्य तन्नामक राजा हयग्रीवः उपासनीयः। मन्दाकिनीति भागीरथी। मेरोः पश्चिमस्येलावृतं संबध्य द्विसहस्रायामः। चतुस्त्रिंशत्सहस्रोन्नतो माल्यवान् मर्यादागिरिः। तत एकत्रिंशत्सहस्रः केतुमालाखण्डः। तस्य खण्डस्य तन्नामकराजः रतिकामान्तर्गत उपासनीयः। चक्षुरिति भागीरथी। एवमेतत्खंडत्रयं मृदङ्गाकारेणास्ति। ततो मेरोरुत्तरे त्रयो मर्यादागिरयः। इलावृतखण्डं सम्बध्य तिर्यक् लक्षोन्नतद्विसहस्रायामः। नीलाख्यमर्यादागिरिः। ततो नवसहस्र रमणखण्डः। तस्य तन्नामा राजा तत्र वैवस्वतमनुनार्य मत्स्य उपासनीयः। भद्रेति भागीरथीति। तत्संबंध्य तिर्यङ्नवतिसहस्रः द्विसहस्रायामः श्वेताख्यमर्यादागिरिः। ततो नवसहस्रो हिरण्मयखण्डः। तस्य तन्नामा राजा। पितृगणाधिपेन अर्यम्णा कूर्मः उपासनीयः। भद्राख्या भागीरथी। ततो द्विसहस्रोन्नतायामः तिर्यङ्गशीतिसाहस्रः शृङ्गवानिति मर्यादागिरिः।। ततो नवसहस्रः कुरुखण्डः। तस्य तन्नामा राजा। भूम्या भूवराहः उपासनीयः। तत्र भद्राख्या भागीरथी। एतत् खण्डत्रयं धनुराकारतया अस्ति। मेरोर्दक्षिणस्य च मर्यादागिरित्रयं खण्डत्रयं च। इलावृतखण्डं संबध्य तिर्यक् लक्षद्विसहस्रोन्नतायामः निषदाख्यमर्यादागिरिः। ततो नवसहस्रः हरिवर्षः। तस्य तन्नामाधिपः। तत्र प्रह्लादो नरसिंहोपासनं करोति। अलकनन्दीति नदी। तत्सम्बध्य द्विसहस्रोन्नतायामः दैर्घ्ये नवतिसहस्रयोजनः तिर्यङ्नवसहस्रः हेमकूटमर्यादागिरिः।। ततो नव सहस्रः किंपुरुषखण्डः। तस्य तन्नामा राजा। तत्र हनूमान् श्रीरघुनाथोपासनं करोति। अलकनन्दिनीति भागीरथी। ततो द्विसहस्रोन्नतायामः तिर्यङ्नवसहस्रः हिमालयाख्यमर्यादागिरिः। ततो नवसहस्रयोजनो साधनसम्पत्तियोग्यो भारतखण्डः। तस्य तन्नामा राजा। भरतपालितत्वाद्भारतमिति नाम। तत्र नारदः नारायणोपासां करोति। अलकनन्दनीति भागिरथी। त्रयः खण्डा अपि धनुराकाराः।

---

१. तत्सम्बध्य यशःखण्डः

२. सावित्र्याख्यनदी। पञ्चमखण्डस्य धूम्रवानिति मर्यादागिरिः। तत्सम्बध्य यशः खण्डः। तस्य तन्नामा राजा नृगणाख्या नदी

३. अभयखण्डः। तन्नामास्वामी। सत्यंभरनदी

अत्रैवं विवेकः। पञ्चमस्कन्धे पुराणवाक्यमेकैकं खण्डं नव सहस्रमिति वदति। तत्प्रकारेण खण्डत्रयं मर्यादागिरिद्वयम्। एतत्सहस्रस्यायामे मिलित्वैकत्रिंशत्सहस्रं भवति। लक्षस्यातीव न्यूनम्। तथा दक्षिणोत्तरस्येलावृतखण्डेन सह सप्त खण्डाः षण्मर्यादा गिरयः मिलित्वैकसप्ततिसहस्रं भवति। तत्रापि लक्षस्य न्यूनम्। अतः पुराणान्तरानुसारेण मध्ये इलावृतखण्डः चतुःस्त्रिंशत्सहस्रम्। मर्यादापर्वतद्वयस्य चतुःसहस्रं। एवमष्टत्रिंशत्सहस्रम् उर्वरितं द्विषष्टि सहस्रं विभज्य भद्राश्वखण्डस्यैकत्रिंशत्सहस्रम्, केतुमालखण्डस्यैक त्रिंशत्सहस्रम्। एवं प्रमाणार्थोऽवगन्तव्यः। तत्तत्खण्डस्य धनुराकारत्वादेकदेशमादाय तथा वदन्ति।

अथवा- तिर्यक् भूमिमितिवत् फलितगणनं वा। इलावृतखण्डः चतुरस्रं चतुस्त्रिंशत्सहस्रः। तन्मध्ये मेरुः षोडशसहस्रेण व्याप्त नव सहस्रमुर्वरितं समानम्। भद्राश्वकेतुमालखण्डयोः कथमित्युक्ते तिर्यङ् मृदङ्गाकारः। तयोः मृदङ्गाकारत्वेन कारणेन उत्सवे ललाटभूषणाकारवते खण्डे वर्तते तिर्यग्भूमीतिवत्। तयोरपि चतुरस्रं नवसहस्रमेवं यथोक्तमंगीकार्यम्। एवं लक्षयोजनात्मकजम्बूद्वीपस्य कङ्कणाकारेणावृतो लवणोदधिः एक लक्षयोजनः। तन्मध्ये लङ्काद्वीपादिद्वीपाः वर्तन्ते। तदावरको द्विलक्षः प्लक्षद्वीपः। तस्य प्रियव्रतद्वितीयपुत्रः इध्मजिह्वाख्यः अधिपः। तस्य सप्त पुत्राः। प्लक्षद्वीपस्य सप्त खण्डाः। तत्र प्रथमतः मणिगिरिरिति मर्यादा गिरिः तत्सम्बध्य शिवरायखण्डः। तस्य तन्नामा राजा। आरण्याख्या नदी। द्वितीयखण्डस्य स्वर्णकूटाभिधमर्यादागिरिः। तत्सम्बध्य शताख्यखण्डः। तस्य तन्नामा अधिपः। नृगणाख्यनदी। तृतीयखण्डस्यैन्द्रसेनाख्यमर्यादागिरिः। तत्सम्बध्य सुभद्राखण्डः। तस्य तन्नामा स्वामी। अङ्गिराख्या नदी। चतुर्थखण्डस्य ज्योतिष्मानिति मर्यादागिरिः तत्सम्बध्य शताख्यखण्डः[१]। तस्य तन्नामाऽधिपः। सावित्र्याख्यनदी। पंचमखंडस्य धूमवानिति मर्यादागिरिः ततः क्षेमखण्डः। तस्य तन्नामा स्वामी। सुभद्राख्यनदी। ततो हिरण्मयाख्यमर्यादागिरिः। अभयाख्यखण्डः। तन्नामा स्वामी (तुम्बरनदी) सत्यंभरनदी। ततो मेघमालाख्यमर्यादागिरिः। एतादृशप्लक्षद्वीपस्य आवरकः इक्षुरससमुद्रः द्विलक्षयोजनः। एतदावरकः चतुर्लक्षयोजनः सप्त खण्डात्मकः शाल्मलिद्वीपः। तस्य यज्ञबाहुरित्यधिपस्तस्य सप्त पुत्राः। तत्रादौ स्पर्शाख्यमर्यादागिरिः। सुरोचनखण्डः तन्नामाधिपः। अनुमत्याख्यनदी। ततः शतशृङ्गाख्यगिरिः। सौमनुष्याख्यखण्डः। तस्य तन्नामाधिपः। शिनीवालीनदी। ततो वामदेवाख्यमर्यादागिरिः। रमणखण्डः। तस्य तन्नामा राजा। सरस्वती नदी। ततः कुन्दराख्य (कन्दकाख्य) मर्यादागिरिः। देवबर्हखण्डः। तस्य

तन्नामा राजा। कुहूनदी। ततः कुमुदाख्यमर्यादागिरिः। बलभद्राखण्डः। तस्य तन्नामा राजा। राजनी नदी। तत पुष्पवर्णमर्यादागिरिः। आप्याख्यखण्डः। तस्य तन्नामा राजा। नन्दा नदी। ततः सहसतिरिति मर्यादागिरिः। अभिजाताख्यखण्डः। तस्य तन्नामा राजा। राका नदी।

सप्तखण्डाः समाः- एतच्छाल्मलीद्वीपस्यावरकः सुरोदधिः। चतुर्लक्षयोजनः तदावरकः सप्तख(ण्डात्मको त्र्यष्टलक्षयोजनः कुशद्वीपः। एतस्य हिरण्यरेता राजा। तस्य सप्त पुत्राः। तत्रादौ चक्राख्यमर्यादागिरिः'। वसु(माल)यानखण्डः। तन्नामा राजा। रसकुल्या नदी। कृतशृंगाख्यमर्यादागिरिः। द्दढकविखण्डः। तस्य तन्नामा राजा। मधुकुल्यनदी। पिप्पलाख्यमर्यादागिरिः। नागाख्यखण्डः। तन्नामा राजा। सुविन्ध्य नदी। चित्रकूटमर्यादागिरिः। अभिगुप्तखण्डः। तन्नामा राजा। मित्रविन्दा नदी। देवानीकमर्यादागिरिः। सत्यव्रतखण्डः। तन्नामा राजा। वेदगर्भा नदी। ऊर्ध्वरोमा मर्यादागिरिः। प्रियव्रतखण्डः। तस्य तन्नामा राजा। घृतच्युता नदी। द्रविणाख्यमर्यादागिरिः। वामदेवखण्डः। तन्नामाऽधिपः। मन्त्रमाला नदी। एते सप्तखण्डाः समाः। एतत्खण्डावरकः सर्पिः समुद्रोऽष्टलक्षयोजनायामः। तदावरकः षोडशलक्षयोजनः सप्तखंडात्मकः क्रौञ्चद्वीपः। तस्य घृतपृष्ठराजा। तस्य सप्त पुत्राः। तत्रादौ शुकाख्यमर्यादागिरिः। अमोघखण्डः। तन्नामा राजा। अभयनदी। वर्धमानमर्यादागिरिः मध्वर्हखण्डः। तन्नामाऽधिपः। अमृतोत्थनदी। उपबर्हमर्यादागिरिः। मेघपृष्ठखण्डः। तन्नामा राजा। आर्यकनदी। उपभोजनमर्यादागिरिः। सुधामखण्डः। तन्नामा राजा। तीर्थकवती नदी। नन्दाख्य मर्यादागिरिः। ऋषि (ज्वाला) खण्डः। तन्नामा राजा। रूपवती नदी। जघनाख्यमर्यादागिरिः। लोहास्तरणखण्डः। तन्नामा राजा। पवित्रनदी। सर्वतोभद्राख्य मर्यादागिरिः। वनस्पतिखण्डः। तन्नामा राजा। शुक्लवती नदी। सप्तखण्डाः समाः। क्रौञ्चद्वीपावरकः षोडशलक्षयोजनो दधिसमुद्रः। एतदावरकः द्वात्रिंशल्लक्षयोजनः शाकद्वीपः। तस्य मेघातिथिः राजा। तस्य सप्तपुत्राः। तत्रादौ ईशानाख्यमर्यादागिरिः। पुरोचनखण्डः। तन्नामा राजा। अनघनदी। उत (रु) शृङ्गाख्य मर्यादागिरिः। मनोजवखण्ड। तस्य तन्नामा राजा। आयुर्दा नदी। बलभद्राख्यमर्यादागिरिः। पवमानखण्डः। तन्नामा राजा। उभयस्पृष्ट नदी। केसराख्यमर्यादागिरिः। धूम्रानीक (धूमनि) खण्डः। तन्नामा राजा। अपराजितानदी। सहस्रश्रोताख्यमर्यादागिरिः। चित्ररेखाख्यखण्डः। तन्नामाऽधिपः। पञ्चपादी नदी। देवलाख्य मर्यादागिरिः। बहुरूपाख्यखण्डः। तन्नमाऽधिपः। सृत्याख्या (सत्याख्या) नदी। मानस्यत्वाख्यमर्यादागिरिः। स च विश्वधाराख्य (विश्वम्भर)

खण्डः। तन्नामा राजा। निजधृति नदी। सप्तखण्डाः समाः। एतस्यावरकः द्वात्रिंशल्लक्ष-योजनः क्षीरसमुद्रः। चतुःषष्ठिलक्षयोजनो द्वीपद्वयात्मकः पुष्करद्वीपः अस्य वीतीहोत्रा-ख्याधिपः तस्य द्वौ पुत्रौ। तत्रादौ रमणखण्डः। तन्नामाधिपः। धाताख्यखण्डः। तन्नामा राजा एतयोर्मध्ये कङ्कणाकारेण मानसोत्तराख्यमर्यादागिरिः। स च दशसहस्रयोजनो-न्नतायामाभ्यां युक्तः। तदुपरि सूर्यरथचक्रं भ्रमति। तत्राष्टदिक्पालकपुराणि सन्ति। एतत्पुष्करद्वीपावरकः चतुःषष्ठियोजनात्मकस्वादूदकाब्धिः। तदावरका सार्धलक्षयोज-नात्मकवज्रभूमिः। तदावरकः सार्धचतुर्लक्षाधिकनवतियोजना सुवर्णभूमिः। तदावरक लोकगिरिः। अयं पञ्चाशल्लक्षः स्वर्गलोकपर्यन्तोन्नतः तावदायाम इति पञ्चमस्कन्धे। तत्रापि श्रीमदाचार्यैः-- पञ्चाशत्सहस्राधिकपञ्चाशल्लक्षयोजनायाम इत्युक्तम्। तट्टीकाका-राः- एकपञ्चाशल्लक्षयोजनायाम इति वदन्ति।

केचनः-- तं पक्षमाश्रित्य भुवः स्वर्गमप्येकपञ्चाशल्लक्षमित्युक्तोर्वरितं भूकन्दा-न्तः प्रविष्टमिति वदन्ति। प्रमाणान्तरे तु पञ्चाशल्लक्षमिति भाति। अत एव तद्विचारणी-यम्। एतल्लोकलोकगिर्युपरि चतुर्दिक्षु इन्द्रादिलोकपालकानां भुवनानि सन्ति। अत्र अष्ट दिग्गजा वर्तन्ते। तथा अधोलोकाः। ब्रह्माण्डाग्रं सम्बध्य सन्तीति पक्षे नरकलोका-न्प्रति गन्तॄणां दक्षिणदिशि द्वाराणि सन्ति। लोकालोकपर्वतस्य इत एव सूर्यप्रकाशः पर्वतात्परस्तात्स्वप्रकाशः। लोकालोकगिरेरावरकं सप्तकोटियोजनं तमः। तदावरकं चतुर्दशकोटियोजनायाममेककोट्युन्नतं ब्रह्माण्डपर्यन्तं घनोदकमस्ति। सर्वं मिलित्वा जम्बूद्वीपमारभ्य ब्रह्माण्डनेमिपर्यन्तं पञ्चाशत्सहस्राधिकं पञ्चत्रिंशत्कोटियोजनानि गणितानि। तथात्वे पंचाशत्सहस्रमधिकं जातम्। तस्य तु जम्बूद्वीपः पूर्णलक्ष इति न ग्राह्यः। किन्तु मेरुमध्यमारभ्य जम्बूद्वीपः पञ्चसहस्रात्मक इत्येवं ग्राह्यः। अतः अधिकं पञ्चाशत्सहस्रमेतज्जम्बूद्वीपमध्य एव गतम्। ततो मेरुमध्यमादाय ब्रह्माण्डपर्यन्तं पञ्चाशत्कोटियोजनानीत्यवगन्तव्यम्। तथोत्तरभागे तथेतरपञ्चविंशत्कोटियोजनानि मिलित्वा पञ्चाशत्कोटियोजनानि। ततो ब्रह्माण्डान्तः ऊर्ध्वं चतुर्दशलोकगणनम्। ब्रह्माण्डपुराणोक्तानुसारेण भुवोऽन्तरिक्षलोको लक्षयोजनः। भुवः स्वर्गलोकः पञ्चलक्षयोजनः। तद्दलं पञ्चाशत्सहस्रं स्वर्गेण महर्लोकः पञ्चसप्ततिलक्षयोजनः। तद्दलं पंचविंशल्लक्षाधिकैककोटियोजनम्। तद्दलं तस्माज्जनो लोकः एककोटिद्वादशलक्ष पंचा-शत्सहस्रयोजनः। तद्दलं सार्धैककोट्यात्मकम्। तस्मात्तपोलोकः एककोट्यष्टषष्ठिलक्षपञ्चसप्ततिसहस्रयोजनः। तद्दलं सार्धैककोटियोजनम्। तस्मात्सत्यो लोकः चतुःकोटिषड्लक्षपंचविंशत्सहस्रयोजनः। तद्दलं सार्धैककोटियोजनम्। तस्य

विरजापरनामिका गङ्गा आवरणभूता। तस्मात् वैकुण्ठः अष्ट कोटिद्वादशलक्षपञ्चाशत्सहस्रयोजनः। तद्दलं द्विकोटिसार्धनवनवतिलक्ष पञ्चाशत्सहस्रयोजनम्। एतत्सर्वं मिलित्वा भुवः सकाशात् ब्रह्माण्डखर्परपर्यन्तं पंचविंशतिकोटियोजनानि। एतन्मध्ये अन्तरिक्षभूतः स्वर्गः कोटियोजनायामः सन् छत्राकारेणास्ति। तदुपरि उर्वरिताः सर्वे लोकाः ब्रह्माण्डाग्रपर्यन्तं सन्ति। ततो भुवः अधोभागे पञ्चाशत्कोटि योजनानि।

योजनानां विवेकस्त्वित्थम्-- भूदलं द्विसहस्रयोजनम्। ततोऽधोऽतललोकावकाशो दशसहस्रयोजनः। तद्दलमपि द्विसहस्रम्। ततो वितललोकावकाशो दशसहस्रयोजनः। तद्दलमपि द्विसहस्रयोजनम्। ततो दशसहस्रयोजनतः सुतललोकावकाशः। तद्दलं द्विसहस्रम्। ततस्तलातललोकावकाशो दशसहस्रयोजनः। द्विसहस्रं तद्दलम्। ततोऽधो नरकलोकावकाशो द्वादशसहस्रयोजनं तद्दलं द्विसहस्रम्। तदावरकस्थनरकाणि तामिस्रमन्धतामिस्रं रौरवो महारौरवः कुम्भीपाकः कालसूत्रम् असिपत्रम् सूकरमुखम् अन्धकूपः क्रिमिभोजनं श्वदंशकः वज्रकण्टकः शाल्मली वैतरणी पूयोदा प्राणरोधनं सुसरक्षिः विषाशनः लालाभक्षः सारमेयादनः बिचारः रेतोपानं क्षारकर्दमः रक्षोगणभोजनम्। शूलप्रोतः दन्दशूकः अवकण्ठनिरोधनं परिवर्तनं सूचीमुखम्। एतद्गमने द्वारम्। भरतखण्डदक्षिणभागे गोकर्णाख्यम्। एते लोकाः ब्रह्माण्डाग्रपर्यन्तं भरतखण्डाधोभाग एव दशसहस्रायामेन बिलाकारतया सन्ति। ततः पाताललोके भूमिं शेषो बिभर्ति। तदाधारः कूर्मः ततो वायुः ततो लक्ष्मीः तदाधारः परमपुरुषः। अधोलोकाः सर्वैः नरकैः सह लक्षयोजनाः। उर्वरितं किञ्चिन्न्यूनं विंशत्कोटियोजनं गर्भोदकम्। एवमधोपरि पञ्चाशत्कोटियोजनम्। ततो नारायणधामत्रयम्। घनोदकोपरि ब्रह्माण्डाग्रपर्यन्तं कङ्कणाकारेण लक्षद्वयमनन्तासनम्। तन्मध्ये लक्षयोजनोन्नतायामाभ्यां श्रीभागः। ततो ब्रह्माण्डाग्रं सम्बध्य दशसहस्रोन्नतायामाभ्यां दुर्गाभागः। इतो घनोदकं संबध्य दशसहस्रयोजनोन्नतायामाभ्यां भूभागः। श्रीभागभूभागयोर्मध्ये दशसहस्रयामेन ण्याख्यामृतो दधि। श्रीभागदुर्गाभागयोर्मध्ये दशसहस्रविस्तृतः ण्यानामोमृतसमुद्रः। मध्ये मध्ये योग्यतास्थलं विहाय षष्ठिसहस्रम्। एतादृशानन्तासने अनन्तशयनमूर्तिः क्षीरसमुद्रमध्ये विंशल्लक्षायामः। पञ्चाशल्लक्षयोजनोन्नतः श्वेतद्वीपः कङ्कणाकारेणास्ति तन्मध्येऽष्टलक्षयोजनायामः पञ्चाशल्लक्षयोजनोन्नतः श्रीभागः स्वर्गपर्यन्तः। ततः षड्लक्षयोजनोन्नतायामाभ्यां दुर्गाभागः। ततः षड्लक्षयोजनोन्नतायामाभ्यां भूभागः। श्रीदुर्गाभागयोर्मध्ये ण्याख्यामृतसमुद्रः एकलक्षयोजनः। श्रीभूभागयोर्मध्ये अराख्यामृतसमुद्रः एकलक्षयोजनः। श्रीभागे

सर्वावतारैक्याश्रयः श्रीपद्मनाभः। श्रीः तथा क्षीरसागरे वैजयन्त्याख्यो गिरिः। तत्र ब्रह्मा तपःकरोति। ततः सत्यलोकोपरि वैकुण्ठः। तन्मध्ये अष्टाविंशत्कोटियोजनायामः श्रीभागः। तस्यादितो दुर्गाभाग एककोट्यायामः। ततः श्रीभागात्परस्तात् एककोट्यायामे भूभागः। भागत्रयौन्नत्यं समम्। तिर्यक् पूर्वपश्चिमयोः ब्रह्माण्डाग्रपर्यन्तं श्रीदुर्गाभागयोर्मध्ये अराख्यामृताब्धिः द्विलक्षायामः। श्रीभूभागयोर्मध्ये अराख्यामृताब्धिः द्विलक्षायामः। श्रीभागे वैकुण्ठमूर्तिः। वैकुण्ठस्य विरजानदी परिस्तरणतयास्ति। तत्र श्रीभागे नन्दकाख्यसिंहासनम्। सिंहिकाख्यप्रसादः। पञ्चाशत्कोट्यायाम ब्रह्माण्डस्य पृथिवी कोटिशतेनावलिप्ता। मेरुमध्यं गृहीत्वा ब्रह्माण्डपर्यन्तब्रह्माण्डदलं पञ्चाशत्कोटियोजनम्। बहिरावरणतत्वानि एकैकापेक्षयैकैकं दशाधिकम्। शतकोटिपृथिव्या दशाधिक्येन आप अर्बुदः अब्दः तद्दशाधिकं। एकनिर्बुदं तेजः। तद्दशाधिकैकखर्वो वायुः। तद्दशाधिकैकमहाखर्वमाकाशम्। तद्दशाधिकैकाक्षौहिण्यहङ्कारः। तद्दशाधिकैकमहाक्षौहिणी महत्तत्त्वम्। तद्दशाधिकैकनिधिः गुणत्रयाख्यमव्याकृताव्यक्ततत्वम्। मेरुमध्यमारभ्य अव्याकृताव्यक्ततत्वपर्यन्तं गणनम् एकनिधिः एकमहाक्षोहिणी एकाक्षोहिणी एकमहाखर्वः एकखर्वः एकनिर्बुदः शतकोटिपंचसप्ततिकोट्यव्यक्ततत्त्वस्य आवरकम् अनिरुद्धरूपम्। तदावरकं प्रद्युम्नरूपम्। तदावरकम् सङ्कर्षणरूपम्। तदावरिका लक्ष्म्यात्मिका प्रधानविरजा नदी। तदावरकं वासुदेवरूपम्। इमानि नारायणापरिच्छिन्नरूपाणि। तदावरकम् अपरिच्छिन्नरूपम्। एवं बहिरावरणसहितब्रह्माण्डमध्यस्थभूमिं श्वेतवराहो दधार। एतादृशवराहाय नमः।।

।। एवं प्रमेयसंग्रहः सम्पूर्णः।।

अथैनमिति देवाः प्राणाः अमृता आविशंति। एतस्यायमर्थः। अथ मुक्त्यनन्तरम् एवं सप्तान्नविदं मुक्तं एते प्राणाः वाङ्मनःप्राणाभिमानिनः सरस्वत्यादयो देवाः अमृतात्मकाः सन्तः स्वरूपभूतवागादिनियामकत्वेन आविशन्ति। अत्र मुक्तजीवप्राणप्रवेशः वायोरुच्यमानः विरिञ्चस्यैव रूपान्तरेण ज्ञेयम्। अत्रैव बृहदारण्यकभाष्यं अमुक्तानां देववागादिरावेशः संप्रकीर्तितः। इति।

।। इति श्रीराघवेन्द्रयतिकृतः प्रमेयसंग्रहः समाप्तः।।

।। श्रीकृष्णार्पणमस्तु।।

श्रीराघवेन्द्रयतिकृतं

दशावतारस्तोत्रम्

वेदसिद्धमणुतोऽप्यणुभावं मोददायि महतोऽपि महत्त्वम्।
बिभ्रतं प्रथयितुं मनवे त्वां मीनतां शरणयामि भवन्तम्।। १।।

वेदविप्लुतिकृतं विधिजाड्यं हन्त हन्तुमदधाज्झलजन्म।
मीनभावनभरेण ततो मे विस्तृणीहि विमलं प्रतिबोधम्।। २।।

आत्मनैव कमठेन वितन्वन्मन्दरेण च भवानरणी द्वे।
मथ्नतोऽकृत हलाहलवह्निं होतुमिन्द्ररिपुवृन्दहवींषि।। ३।।

आदिसूकर धरोद्धरणं ते सिन्धुबन्धुजठरात् श्रुतिगीतम्।
मादृशां भवपयोधिगतानां रक्षणे परिचयं तदवैमः।। ४।।

पूर्णचन्द्रगतलक्षणरेखा लक्षिता यदि तदैककलायाम्।
संश्रितेन्दुमणिदंष्ट्रधरं स्यात्सोपमा भवति सूकररूप।। ५।।

तावकं नरहरेऽतिविरुद्धं वेषधारणमिदं तनुते नः।
अत्यसंघटितकर्म च कृत्वा पालये प्रणतमित्युपदेशम्।। ६।।

दारितोदरहिरण्यकशत्रोरान्त्रमाल्यकलितं तव रूपम्।
नारसिंह कलयेऽननुभूतं शारदं जलधरं सहशम्पम्।। ७।।

जानतां निजमनःपरमाणौ मातुमेव बलिनिग्रहदम्भात्।
वामनं यदभवत्तव रूपं तत्सुखेन भगवन्हृदि कुर्मः।। ८।।
चन्द्रमा इव भुवो रचयन्नक्षत्रयोगमपि यत्त्वमलासीः।
तेन शात्रवयशोम्बुजराजीमुद्रणं तव कृतिं बहु मन्ये।। ९।।

तारणे दुरितनीरनिधेर्नः सेतुभावमचिरेण यियासोः।
भासते तव विभो करुणायाः पूर्वरङ्ग इव दक्षिणसेतुः।। १०।।

बन्धनाय कृतमात्मजनन्यास्तादृशं च गुणमङ्ग्यकरोर्यत्।
तेन निर्गुणमतानि निरस्यन्दर्शयस्यपि निजां गुणवत्ताम्।।११।।

सर्वदेवरथचेष्टनमङ्गीकुर्वतस्तव सदैव जगत्याम्।
अर्जुनैकरथसारथिभावो विस्मयाय विदुषां न कथञ्चित्।।१२।।

त्वं कुचेलमुनिमीश कुचेलाद्यार्पणेन कृतवानकुचेलम्।
सोऽभवत्तदपि चारुकुचेलालङ्कृतस्तदिदमद्भुतमासीत्।। १३।।

एवमादिविविधैरवतारैः पालिताखिलजनौघममोघम्।
सन्निरस्य कमलास्य नमस्यां स्वीकुरुष्व रघुवंशवतंस।। १४।।

।। इति श्रीराघवेन्द्रयतिकृतं दशावतारस्तोत्रं सम्पूर्णम्।।

इन्दु एनगे गोविन्द (पद्यम्)

इंदु एनगे गोविंद निन्नय पादार-
विंदव तोरो मुकुंदने।। प।।
सुन्दरवदनने नंदगोपिय कंद
मंदरोद्धार आनंद इंदिरे रमण।। अ. प.।।

नोंदेनय्य भव बंधनदोळु सिलुकि
मुंदे दारिगाणदे कुंदिदे जगदोळु।
कंदनेंतेंदेन्न कुंदुगळेणिसदे
तंदे कायो कृष्ण कंदर्पजनकने।। १।।

मूढतनदि बलु हेडि जीव ना नागि
दृढ भकुतियन्नु माडलिल्लवो हरिये।
नोडलिल्लवो निन्न पाडलिल्लवो महिमे
गाडिकार कृष्ण बेडिकोंबेनो निन्न।। २।।

धारुणियोळु बलु भारजीवननागि
दारितप्पि नडेदे सेरिदे कुजनर।
आरू कायुवरिल्ल सारिदे निनगय्य
धीरवेणुगोपाल पारुगाणिसो हरिये।। ३।।

श्रीराघवेंद्रतीर्थकृतकृतिरत्नानां आद्यन्तश्लोकाः

१. सूत्रप्रस्थाने

१.१ तत्त्वप्रकाशिकाभावदीपः

आदिश्लोकाः

लक्ष्मीनारायणं नत्वा पूर्णबोधान् गुरूनपि।
तत्त्वप्रकाशिकाभावदीपं कुर्यां यथामति।। १।।

तत्त्वप्रकाशिकाऽऽकूतं चन्द्रिकातः प्रकाशितम्।
अपि मन्दकृते सर्वविषया च कृतिर्मम।। २।।

नूतनैरुदिता ये तु दोषास्तेषामलग्नताम्।
संप्रदर्शयितुं चातः प्रसन्नाः सन्तु सज्जनाः।। ३।।

प्रथमः अध्यायः १

टीकातात्पर्यविवृतौ व्यासतीर्थादयः क्षमाः।
वयं तु तत्कृतव्याख्यालेशभाजो (भावं) वदामहे।। ४।।

(पा० १. अधि-१)

टीकागाम्भीर्यमुद्धर्तुं मर्शं मर्शं पुरो मनः।
नैति तद्विस्तरभयात् करोत्यग्रेसरं मतिः।। ५।।
देवोत्तमैर्लालनीयो भाष्यकारनिरूपितः।
सूत्रार्थोऽनेकमानेतः सर्वैर्ग्राह्यो बुभूषुभिः।। ६।।

(पा० १ अधि० ५)

द्वितीयः अध्यायः

यत्पादपद्मे संस्मृत्य लोकोऽवद्यान्यवद्यति।
तं वन्दे परमा(नंद)त्मानमिन्दिरामंदिरोरसम्।। ७।।
(पा० १ अधि० १)

तृतीयः अध्यायः

अत्यादरेण यत्पादौ त्यक्तेतरसुखस्पृहाः।
प्राज्ञा उपासते नित्मं तमुपासे श्रियःपतिम्।। ८।।
(पा० १ अधि० १)

चतुर्थः अध्यायः

यं विजिज्ञास्य विद्वांसो निर्मुक्ताः क्लेशबन्धनात्।
लभन्ते परमानन्दं तं वन्दे श्रीनिकेतनम्।। ९।।
(पा० १ अधि० १)

अन्तिमश्लोकः

सर्वेन्द्रियप्रेरकेण श्रीप्राणपतिनेरितः।
यदवोचमहं तेन प्रीणातु करुणाकरः।।

१.२. श्रीमन्न्यायसुधापरिमळम्

आदिश्लोकाः-

पूर्णागण्यगुणोदारमूर्तये पुण्यकीर्तये।
नमः श्रीपतये भक्तदत्तस्वानन्दमूर्तये।। १।।

पूर्णागण्यगुणोदारनित्यसुन्दरमूर्तये।
श्रीब्रह्मवीन्द्रपूर्वेड्यकीर्तिने ब्रह्मणे नमः।। २।।

विश्वं यस्य वशे सर्वं अनिशं शंकरादिकम्।
तस्य वायोस्तृतीयांशम् आश्रये शमवाप्तये।। ३।।

सत्पद्मबन्धवो यस्य गावो विश्वतमोनुदः।
स स्यात्तत्त्वप्रकाशाय जयतीर्थरविर्मम।। ४।।

पदवाक्यप्रमाणज्ञो दुर्मतध्वान्तभास्करः।
व्यासतीर्थमुनीन्द्रो मे भूयात् ज्ञानसमृद्धये।। ५।।

अस्मद्देशिकपादानां प्रणम्य चरणाम्बुजम्।
श्रीमन्न्यायसुधावाक्यव्याख्यां कुर्यां यथामति।। ६।।

प्रतिवाक्यं प्रतिपदम् अनेकाकूतगर्भिता।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते।। ७।।

(अध्याय-१)

भवापदो विनश्यन्ति यत्पादस्मृतिमात्रतः।
तं वन्दे कुमतध्वान्तभास्करं नृहरिं सदा।। ८।।

(अध्याय-२)

आराधितः साधनैर्यो मुक्तिं दद्याच्चतुर्विधाम्।
तं वन्दे कमलानाथमभीष्टावाप्तिसिद्धये।। ९।।

(अध्याय-४)

अन्तिमश्लोकाः

सर्वेन्द्रियप्रेरकेण श्रीप्राणपतिनेरितः।
यदवोचमहं तेन प्रीणातु (यतां) कमलालयः।। १०।।

ये तु न्यायसुधापानकामुका रसिका बुधाः।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम्।। ११।।

ज्ञानाब्धिरप्यवादीद्यत् स्खलत्वं स्वात्मनस्तदा।
मादृशानां स्खलत्वं किं वाच्यं क्षाम्यन्तु तद्बुधाः।। १२।।

१.३. अणुभाष्यटीकातत्त्वमञ्जरी

आदिश्लोकाः

समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम्।
लक्ष्मीनारायणं वन्दे भक्ताभीष्टफलप्रदम्।। १३।।

संसारक्लेशसंश्रान्तसज्जनावनतत्पराः।

दयाल्वो महान्तस्तान् गुरून्नत्वा हरिं (गिरं) भजे।। १४।।

ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम्।
इत्युक्तिसाम्यात् संक्षेपभाष्यं चात्यर्थविस्तरम्।। १५।।

अनन्तोऽर्थः प्रकटितस्त्वयाणौ भाष्यसङ्ग्रहे।
इत्याहुः श्रीमदानन्दतीर्थार्योपसदा अपि।। १६।।

अतोऽनेकार्थगुम्फस्य (युक्तस्य) नैतद्भाष्यस्य विस्तृतौ।
शक्तोऽस्म्यथापि लेशेन व्याख्यां कुर्यां यथामति।। १७।।

सूत्रार्थं हृदि कृत्वैव भाष्यार्थं सम्प्रकाशये।
अविक्षेपेण बोधार्थं बुद्ध्यन्तां तं विवेकिनः।। १८।।

अंतिमश्लोकाः

पूर्णचित्सुखदेहाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ति(क्त)मुक्तिप्रदायिने।। १९।।

संक्षेपभाष्यविवृतिः या कृता तत्वमञ्जरी।
तया दयालुर्लक्ष्मीशः प्रीयतां प्राणवल्लभः।। २०।।

सुधीन्द्रगुरुशिष्येण राघवेन्द्रेण भिक्षुणा।
कृतायां तत्त्वमञ्जर्यां अन्तिमाध्याय ईरितः।। २१।।

१.४. तात्पर्यचन्द्रिकाप्रकाशः

आदिमश्लोकाः

समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम्।
ज्ञानिप्रियतमं वन्दे मुक्तिदं कमलापतिम्।। २२।।

शर्वादिसर्वगीर्वाणनिर्वाणगतिहेतवः।
पूर्णप्रज्ञपदाम्भोजपांसवः पान्तु नः सदा।। २३।।

विधूतदुर्मतध्वान्तो विशदीकृतपद्धतिः।
यः सज्ञानानुग्रहार जयतीर्थरविं भजे।। २४।।

पदवाक्यप्रमाणज्ञान् सम्प्रदायार्थकोविदान्।
व्यासतीर्थमुनीन् सेवे दुर्वादिफणिपक्षिपान्।। २५।।

अस्मद्देशिकपादानां प्रणम्य चरणाम्बुजम्।
तात्पर्यचन्द्रिकाव्याख्यां विधास्यामि यथामति।। २६।।

अन्तिमश्लोकः-

निर्दोषगुणपूर्णेन श्रीप्राणपतिनेरितः।
यदवोचमहं तेन प्रीणातु पुरुषोत्तमः।। २७।।

१.५. तन्त्रदीपिका

आदिमश्लोकौ-

प्रणम्य गुणसम्पूर्णं दोषातीतं रमापतिम्।
पूर्णबोधं गुरूनन्यान् कुर्मः सूत्रार्थसङ्ग्रहम्।। २८।।

गुरुपादकृतोऽप्यस्ति सङ्ग्रहो हृदयङ्गमः।
प्रस्थानभेदप्रोक्तार्थसङ्ग्रहोऽथाप्ययं मम।। २९।।

अन्तिमश्लोकौ-

कल्याणगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने।। ३०।।

सुधीन्द्रगुरुपादानां शिष्येण श्रीशतुष्टये।
राघवेन्द्रेण यतिना कृतेयं तन्त्रदीपिका।। ३१।।

१.६. न्यायमुक्तावली

आदिमश्लोकः

प्रणम्य रमणं लक्ष्म्याः पूर्णबोधगुरूनपि।
न्यायमुक्तावलिं कुर्मः विदुषां कण्ठभूषणम्।। ३२।।

अन्तिमश्लोकः

कल्याणगुणपूर्णाय दोषदूराय विष्णवे।

नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिते।। ३३।।

२. गीताप्रस्थाने

२.भगवद्गीतार्थसग्रहः। (भगवद्गीताविवृत्तिः)

आदिमश्लोकः

लक्ष्मीनारयणं नत्वा पूर्णबोधान् गुरूनपि।
कुर्मः श्रीकृष्णङ्गीतायाः भाष्याद्युक्तार्थसङ्ग्रहम्।। १।।

अन्तिमश्लोकः

अशेषगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने।। २।।

इति श्रीकृष्णगीतायाः भाष्याद्युक्तार्थसङ्ग्रहः।
राघवेन्द्रेण यतिना कृतः सज्ज्ञनसंविदे।। ३।।

२.२. गीताभाष्यप्रमेयदीपिकाभावदीपः

आदिमश्लोकः

लक्ष्मीनारायणं नत्वा तथा मध्वादिदेशिकान्।
प्रमेयदीपिकाभावदीपं कुर्यां यथामति।। ४।।

अन्तिमश्लोकः

कल्याणगुणपूर्णाय दोषदूराय विष्णवे।
अमन्दानन्दसन्दोह सुंदराकृतये नमः।। ५।।

२.३. श्रीमन्महाभारततात्पर्यनिर्णयभावसङ्ग्रहः

आदिमश्लोकः

अंतिमश्लोकः

३. ऋक् प्रस्थानम् (उपनिषत् खण्डार्थाः)

३.१. ईशावास्योपनिषत् खण्डार्थः

आदिमश्लोकः

श्रीप्राणपतिमानभ्य पूर्णबोधादिदेशिकान्।
ईशावास्योपनिषदः करिष्याम्यर्थसंग्रहम्।। ७।।

अन्तिमश्लोकः

समस्तगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने।। २।।

ईशावास्योपनिषदो भाष्याद्युक्तार्थसंग्रहः।
राघवेन्द्रेण यतिना कृतोऽयं शिष्ययाज्ञया।। ३।।

३.२. तलवकारोपनिषत् खण्डार्थः

आद्यश्लोकः

अनन्तगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्तेभ्योऽभीष्टदायिने।। ४।।

अन्तिमश्लोकौ

श्रीमत्तलवकारार्थसंग्रहोऽयं मया कृतः।
राघवेन्द्रेण यतिना प्रीयतां तेन केशवः।। ५।।

अनन्तगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने।। ६।।

३.३. काठकोपनिषत् खण्डार्थः

आदिमश्लोकः

समस्तगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय वामनायेष्टदायिने।। ७।।

अन्तिमश्लोकौ

निर्दोषगुणपूर्णाय दोषदूराय विष्णवे।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने।। ८।।

इति श्रीकाठकार्थानां संग्रहोऽकारि यन्मया।
राघवेन्द्रेण यतिना प्रीयतां तेन केशवः।। ९।।

३.४. षट् प्रश्नोपनिषत् खण्डार्थः

आदिमश्लोकः

प्रणम्य रमणं लक्ष्म्याः पूर्णबोधादिकान् गुरून्।
करोमि वैष्णवप्रीत्यै षट्प्रश्नार्थस्य संग्रहम्।। १०।।

अन्तिमश्लोकः

३.७. तैत्तिरीयोपनिषत् खण्डार्थः

आदिमश्लोकाः

श्रीब्रह्मेशरुद्रादिदैवतैः सर्ववेदगैः।
वचोभिरीडितं विष्णुं नानारूपमुपास्महे।। ११।।

प्रणम्य श्रीमदानन्दतीर्थादिगुरुशेखरान्।
तैत्तिरीयोपनिषदः करिष्याम्यर्थसंग्रहम्।। १२।।

भाष्यस्यार्थो व्यासतीर्थटीकातोऽध्यवगम्यते।
विक्षिप्तस्याप्युपनिषदर्थस्यैवार्यसंग्रहः।। १३।।

अन्तिम श्लोकः

तैत्तिरीयोपनिषदो भाष्याद्युक्तार्थसंग्रहः।
राघवेन्द्रेण यतिना कृतः सज्जनसंविदे।। १४।।